—से लगाना, मु., आलिंग् (भ्वा. प. से.)।

कलेवर, सं. पुं. (सं. न.) शरीरं, देहः।

—बदलना, क्रि. अ., पुनः जन् (दि. आ. से.) २. नववस्त्राणि परिधा (जु. उ. अ.)।

कलेवा, सं. पुं. (सं. कल्यवर्तः) प्रातराशः, प्रातर्भोजनं, कल्यजग्धिः (स्त्री.), जलपानम्।

कलोल, सं. स्त्री. (सं. कल्लोलः>) क्रीडा, खेला, केलिः (पुं. स्त्री.), लीला, विलासः।

कलौंजी, सं. स्त्री. (सं. कालाजाजी) पृथुका, [illegible]या, काला।

कल्क, सं. पुं. (सं. पुं. न.) घृततैलादिशेषः २. दंभः ३. विष्ठा ४. किट्टम् ५. पापम् ६. वस्तुनः चूर्णम् ७. अवलेहः।

कल्कि, सं. पुं. (सं.) विष्णोर्दशमावतारः।

कल्प, सं. पुं. (सं.) धर्मकृत्यविधायको वेदांगभेदः २. ब्रह्मदिनम्, दैवसहस्रयुगम् (=४३२०००००० वर्ष) ३. महाप्रलयः, सृष्टिसंहारः ४. विधानं, कृत्यम् ५. प्रातःकालः ६. रोगनिवृत्तियुक्तिः (स्त्री.) ७. प्रकरणं, विभागः ८. विकल्पः, पक्षः ९. संदेशः १०. निश्चयः ११. उद्देशः। वि., तुल्य, सदृश।

—तरु, सं. पुं. (सं.) कल्प,-वृक्षः-पादपः-द्रुमः।

कल्पना, सं. स्त्री. (सं.) उद्भावना-नं, कल्पनं, मनः कल्पना २. रचना, विधानम् ३. प्रसाधनं, मंडनम् ४. तर्कः, ऊहा ५. अध्यारोपः ६. गजसज्जीकरणं।

—करना, क्रि. अ., उत्प्रेक्ष्-ऊह् (भ्वा. आ. से.), तर्क् (चु.), मनसा कल्प् (प्रे.), संभू (प्रे.)।

कल्पित, वि. (सं.) रचित, विहित २. सुव्यवस्थित ३. वि-सं,-भावित ४. उद्भावित, वासना,-भावना,-सृष्ट, मानस, काल्पनिक ५. असत्य, निर्मूल ६. कृत्रिम, कृतक।

कल्मष, सं. पुं. (सं. न.) अघं, पापम् २. मलं मालिन्यम्।

कल्य, सं. पुं. (सं. न.) प्रत्यूषः, प्रभातम् २. मधु (न.) ३. सुरा ४. श्वः (अव्य.), आगामिदिनम्। वि., स्वस्थ, निरामय २. मूकबधिर।

कल्याण, सं. पुं. (सं. न.) सुखं, मंगलं, हितं, शिवं, कुशलं, क्षेमं, भद्रं, सुस्थितिः (स्त्री.) २. सुवर्णम् ३. रागभेदः । वि. शिव, मंगल, शंकर ।

—कारी, वि. (सं.-रिन्) सुख-मंगल-हित-, कारक ।

कल्याणी, वि. स्त्री. (सं.) मंगलकारिणी, सुंदरी । सं. स्त्री. (सं.) गौः (स्त्री.) २. माषपर्णी ।

कल्लर, सं. पुं. (देश.) ऊषरः-रं, वंध्या भूमिः (स्त्री.) ।

कल्ला, सं. पुं. (सं. करीरः-रं >) प्ररोहः, किसलयः, उद्भिद् ।

कल्लोल, सं. पुं. (सं.) महातरंगः, उल्लोलः, महोर्मिः २. दे. 'कलोल' ।

कल्लोलिनी, सं. स्त्री. (सं.) नदी, तटिनी ।

कवच, सं. पुं. (सं. पुं. न.) सन्नाहः, कंचुकः, वर्मन् (न.), तनु,-वारं-त्राणं-त्रम् २. भेरी, दुंदुभिः ३. रक्षाकरंडः ।

—पत्र, सं. पुं. (सं. न.) भूर्जपत्रम् ।

कवर, सं. पुं. (सं. पुं. स्त्री. न.) केश,-वंधः-पाशः २. ग्रासः, कवलः, पिण्डः ।

कवरी, सं. स्त्री. (सं.) केशविन्यासः, वेणी-णिः (स्त्री.), धमिल्लः २. वनतुलसी ।

कवर्ग, सं. पुं. (सं.) ककारादिवर्णपंचकम् ।

कवल, सं. पुं. (सं.) ग्रासः, पिंडः-डम् ।

कवलगट्टा, सं. पुं. (सं. कमलग्रंथिः >) कमलाक्षः, पद्मवीजम् ।

कवलित, वि. (सं.) भक्षित, निगीर्ण, भुक्त २. गृहीत, आदत्त ।

कवायद, सं. पुं. (अ. 'क़ायदा' का वहु.) नियमाः-विधयः (वहु.) २. व्यायामः ३. सेनाव्यायामः ४. व्याकरणनियमाः ।

कवि, सं. पुं (सं.) काव्यकरः, सूरिः, सत्सारः २. ऋषिः ३.सूर्यः ४. ब्रह्मन् (पुं.) ।

—राज, सं. पुं. (सं.) कवीन्द्रः, महाकविः २. वैतालिकः ३. वैद्योपाधिः ।

कविता, सं. स्त्री. (सं.) काव्यं, काव्यप्रवन्धः, काव्यवंधः २.काव्यरचना, कवित्वं, कविताकला ।

कवित्त, सं. पुं. (सं. कवित्वम् >) काव्यं, कविता २. हिन्दीछन्दोभेदः ।

कवित्व, सं. पुं. (सं. न.) काव्यरचनाशक्तिः (स्त्री.) १. काव्यगुणः ।

कश, सं. पुं., दे. 'कशा' ।

कशमकश, सं. स्त्री. (फ़ा) संघर्षः, प्रतिस्पर्द्धा २. जनौघः ३. संशयः ।

कशा, सं. स्त्री. (सं.) कषा, प्रतोदः, प्रतिष्कशः-षः ।

कशिश, सं. स्त्री. (फ़ा) दे. 'आकर्षण' ।

कशीदा, सं. पुं. (फा.) सूची,-शिल्पं-कर्मन् (न.) ।

—काढ़ना, क्रि. स., सूच्या पुष्पादिकं चित्र् (चु.) ।

कश्ती, सं. स्त्री. (फ़ा.) दे. 'नौका' ।

कश्मल, सं. पुं. (सं. न.) मोहः, मूर्च्छा २. पापं, अघम् । वि. मलिन, आविल ।

कश्मीर, सं. पुं. (सं.) काश्मीरदेशः, शास्त्र-शिल्पिन् ।

कष, सं. पुं. (सं.) कषपट्टिका, निकषः, निकष,-उपलः-पाषाणः । २. शाणः-णी ३. परीक्षणं, परीक्षा ।

कषण, सं. पुं. (सं. न.) निकषेण स्वर्णादिकस्य परीक्षणम् ।

कषाय, वि. (सं.) तुवर, कुवर, २. सुवास, सुगंधि ३. रंजित, रंगवत् ४. गैरिकवर्ण, रक्त-श्याम । सं. पुं. क्रोधः २. क्वाथः ३. कुवरः, रसभेदः ।

कष्ट, सं. पुं. (सं. न.) दुःखं, क्लेशः, पीडा, व्यथा २. आपद्, विपद्, आपत्तिः, विपत्तिः (सव स्त्री.) ।

—साध्य, वि. (सं.) दुस्साध्य, दुष्कर, कष्ट ।

कस[1]**,** सं. पुं. (सं. कषः) निकषः, कषपट्टिका २. परीक्षणम् २. खड्गकुंचनीयता ।

कस[2]**,** सं. पुं. (हिं. कसना) वलं, शक्तिः (स्त्री.) २. निग्रहः, निरोधः ३. विघ्नः ।

कस[3]**,** सं. पुं. (फ़ा.) नरः, जनः, व्यक्तिः (स्त्री.) ।

फ़ी—, क्रि. वि., प्रतिपुरुषं, प्रतिजनम् ।

वे—, वि., असहाय, अनाथ ।

कसक, सं. स्त्री. (सं. कष् = हिंसा >) वेदना, पीडा, व्यथा २. चिर,-वैरं-विरोधः ३. अभिलाषः ४. सहानुभूतिः (स्त्री.) ।

—निकालना, क्रि. स., चिरवैरं शुध् (प्रे.)।

कसकना, क्रि. अ. (हिं. कसक) व्यथ् (भ्वा. आ. से.), पीड् (कर्म.)।

कसकुट, सं. पुं. दे. 'काँसा'।

कसना, क्रि. स. (सं. कर्षणम्) दृढीकृ, नियम् (भ्वा. प. अ.), द्रढयति (ना. धा.), २. बंध् (क्र्. प. अ.) ३. पीड् (चु.) ४. परीक्ष् (भ्वा. आ. से.) ५. सज्जीकृ ६. मूल्यं वृध् (प्रे.)।

क्रि. अ. दृढीभू, नियम् (कर्म) २. बंध्, नियंत्र् (कर्म.) ३. पिंडीभू।

सं. पुं., दृढीकरणं, नियमनम् २. बंधनम् ३. पीडनम् ४. परीक्षणम् ५. सज्जीकरणम्।

कसब, सं. पुं. (अ.) व्यवसायः, वृत्तिः (स्त्री.) २. गणिकावृत्तिः (स्त्री.)।

कसबी, सं. स्त्री. (अ. कसब >) वेश्या, गणिका २. कुलटा, पुंश्चली।

कसम, सं. स्त्री. (अ.) शपथः, प्रतिज्ञा, समयः

—खाना, क्रि. अ., शप् (भ्वा. दि. उ. अ.)।

कसर, सं. स्त्री. (अ.) न्यूनता, अल्पता २. अभावः, हीनता ३. दोषः ४. वैरम् ५. हानिः (स्त्री.)।

—निकालना, मु., क्षतिं पूर् (चु.), प्रतिफलं दा (जु. उ. अ.)।

कसरत[1], सं. स्त्री. (अ.) बाहुल्यं, प्रचुरता, आधिक्यम् २. बहुतरभागः, अधिकसंख्या।

—राय, सं. स्त्री., बहुमतं, मताधिक्यम्।

कसरत[2], सं. स्त्री. (अ.) व्यायामः, परिश्रमः २. अभ्यासः, आवृत्तिः (स्त्री.)।

कसरती, वि. (अ. कसरत >) व्यायामिन्, दृढांग।

कसा, वि. (हिं. कसना) गाढ, दृढ, सुसंहत २. दृढबद्ध।

क़साई, सं. पुं. (अ. क़स्साब) सौ (शौ) निकः २. मांसिकः, घातकः, विशसितृ। वि., क्रूर, निर्दय।

कसाना, क्रि. अ. (हिं. काँसा) कषाय-विकृत-स्वाद (वि.) भू।

कसाला, सं. पुं. (सं. कषः = पीड़ा >) दुःखं, कष्टम् २. आयासः, परि-, श्रमः।

कसाव, सं. पुं. (सं. कषायः >) कषायता, रूक्षता।

कसी, सं. स्त्री. (सं. कषणम् >) खनित्रं, टंगः-गम्।

कसीदा, सं. पुं., दे. 'कशीदा'।

कसीस, सं. पुं. (सं. कासीसम्) शोधनं, शुभ्रं, धातुशेखरम्, खेचरम्।

क़सूर, सं. पुं. (अ.) अपराधः, दोषः, स्खलितम्।

—वार, वि., अपराधिन्, दोषिन्।

कसेरा, सं. पुं. (हिं. काँसा) कांस्यकारः, पीतलोहकारः।

कसैला, वि. (हिं. कसाव) कषाय, तुवर, कुवर।

कसैली, सं. स्त्री. (हिं. कसैला) दे. 'सुपारी'। वि. स्त्री. कषाया, रूक्षा।

कसोरा, सं. पुं. (हिं. काँसा) (कांस्य-) चषकः-शरावः-भाजनं-पात्रम्। २. मृण्मय-मार्त्तिक,-चषकः।

कसौटी, सं. स्त्री. (सं. कषपट्टी) नि-, कषः, कषपट्टिका, निकषोपलः २. परीक्षा, प्रमाणम्।

—पर कसना, मु., परीक्ष् (भ्वा. आ. से.)।

कस्तूरी, सं. स्त्री. (सं.) कस्तूरिका, मृग,-नाभिः-मदः, अंडजा, वातामोदा, गंधधूलिः (स्त्री.)।

—मृग, सं. पुं. (सं.) गंधमृगः।

क़स्बा, सं. पुं. (अ.-ब्रः) बृहत्-महा,-ग्रामः, लघु,-नगरं-पुरम्।

क़हक़हा, सं. पुं. (अ. अनु.) अट्टहासः, उच्चैर्हासः, अति-प्र-,हासः।

क़हत, सं. पुं. (अ.) दुर्भिक्षं, नीवाकः, आहाराभावः, अकालः।

कहना, क्रि. स. (सं. कथनम्) गद्-वद्-भण् (भ्वा. प. से.), ब्रू (अ. उ.), वच् (अ. प. अ.), उच्चर्-उदीर् (प्रे.), उदा-व्या,-हृ (भ्वा. प. अ.) २. कथ् (चु.), शंस् (भ्वा. प. से.), आचक्ष् (अ. आ.), नि-आ,-विद् (प्रे.), आ-, ख्या (अ. प. अ.), वर्ण्-निरूप् (चु.), अभिधा (जु. उ. अ.) ३. आज्ञा (प्रे. आज्ञापयति) ४. श्लाघ् (भ्वा. आ. से.) ५. प्रकाश् (प्रे.) ६ उपदिश् (तु. प. अ.)। सं. पुं., वचनं, भाषणं, कथनं, व्याहरणं, उदीरणम् २. आज्ञा, आदेशः ३. उपदेशः, अनुशासनम् ४. दे. 'कहावत'।

—योग्य, वि. गदनीय, वदनीय, कथनीय, भणितव्य, वक्तव्य।

—वाला, सं. पुं., वाचकः, वक्तृ, वादिन्, व्याहर्तृ, अभिधातृ।

—हुआ, वि., गदित, उदित, भणित, उक्त, कथित, उच्चारित, उदीरित।

कहने को, मु., नाममात्रम्।

कहर, सं. पुं. (अ.) विपत्तिः (स्त्री.)।

कहरवा, सं. पु. (हिं. कहार) (१-३) ताल-गीत-नृत्य,-भेदः।

कहलाना, क्रि. प्रे., 'कहना' के धातुओं के प्रे. रूप।

कहवा, सं. पुं. (अ.) वृक्षभेदः २. तस्य बीजानि (बहु.) ३. तेषां पेयम्।

कहाँ, क्रि. वि. (सं. कुह) क्व, कुत्र, कस्मिन् स्थाने।

—का, वि., क्वत्य, कुत्रत्य, किंदेशीय।

—तक, क्रि. वि., कियद्दूरं-रे, कियतांऽशेन, किंपर्यन्तम्।

कहा, सं. पुं. (हिं. कहना) कथनं, वचनं, उक्तिः (स्त्री.), आज्ञा, उपदेशः।

कहानी, सं. स्त्री. (सं. कथानिका) कथा, आ-उपा,-ख्यानम्, आख्यायिका, वृत्तान्तः।

कहार, सं. पुं. [सं. कं (=जल)+हारः] कहारः, जल-उद,-वाहः, दृतिहारः। २. शिविका-नरयान,-वाहः ३. पात्र,-क्षालकः-मार्जकः।

कहावत, सं. स्त्री. (हिं. कहना) आभाणकः, लोकवादः, जनप्रवादः, जनोक्तिः-लोकोक्तिः (स्त्री.)

कहासुनी, सं. स्त्री. (हिं. कहना+सुनना) कलहः, विवादः, वाग्युद्धम्।

कहीं, क्रि. वि. (हिं. कहाँ) क्वापि, क्वचित्, कुत्रापि, कुत्रचित्, यत्रकुत्रचित्। २. न, न कदापि ३. यदि, चेत् ४. अत्यन्तम्।

—कहीं, क्रि. वि., क्वचित् क्वचित्, यत्र कुत्रचिदेव।

—न कहीं, क्रि. वि., अत्र अन्यत्र वा।

काँइयाँ, वि. (अनु. काँव) धूर्त्त, कितव।

काँ काँ, सं. स्त्री. (अनु.) काका,-शब्दः-ध्वनिः, २. काकरुतम्।

काँक्षा, सं. स्त्री. (सं.) अभिलाषः, कामना।

काँख, सं. स्त्री. (सं. कक्षः) कक्षा, बाहुमूलं, भुजकोटरः-रं, दोर्मूलम्।

कांग्रेस, सं. स्त्री. (अं.) महासभा, प्रतिनिधिसभा, समाजः।

काँच[1], सं. स्त्री. (सं. कक्षः) कच्छः-च्छं, कच्छाटी-टिका २. गुदावर्तः, गुदचक्रम्।

काँच[2], सं. पुं. (सं. काचः) स्फटिकः।

कांचन, सं. पुं. (सं. न.) स्वर्णम्, सुवर्णं, कनकम् २. धनं, संपत्तिः (स्त्री.)। (सं. पुं.) धुस्तूरः २. चंपकः ३. कोविदारः ४. कांचनालः।

—मय, वि. सुवर्णमय, हैम (-मी स्त्री.)।

काँजी, सं. स्त्री. (सं.) गृहाम्लं, रक्षोघ्नं, सुवीराम्लं, काञ्जि(ञ्जी)कम्।

काँजी हौद, सं. पुं. (अं. काइन हाउस) पशु,-शाला गुप्तिः (स्त्री.), गोगृहं, अवरोधः।

काँटा, सं. पुं. (सं. कंटकः-कम्) तरु-द्रुम-, नखः, शिताग्रः, शल्यम् २. पृष्ठवंशः, कशेरुका ३. नखः-खं, नखरः-रम् ४. लघु,-तुला-धटः ५. शूलः-लम् ६. मयूरकुक्कुटादीनां नखः। ७. तुला,- जिह्वा-सूची ८. वडिशं, मत्स्यवेधनम् ९. मत्स्यास्थि (न.) १०. जिह्वोद्भेदः ११. शलं, शललम् १२. घटीसूची १३. कूपकंटकः १४. रोमांचः।

—खटकना, मु, (हृदयं) कंटकमिव व्यध् (दि. प. अ.)

—होना, मु., अतिकृश (वि.) भू।

काँटे बोना, मु, पीड् (चु.)।

काँटों में घसीटना, मु., मिथ्या स्तु (अ.प.अ.)।

रास्ते में काँटे बिखेरना, मु., विघ्नयति (ना. धा.)।

काँटी, सं. स्त्री. (हिं. काँटा) क्षुद्रकंटकः २. लघु-क्षुद्र,-धरणी-आकर्षणी ३. क्षुद्रतुला ४. क्षुद्रकीलः ५. कार्पासमलम्।

कांड, सं. पुं. (सं. पुं. न.) अध्यायः, उच्छ्वासः, प्रकरणं, परिच्छेदः, स्कंधः २. वि-, भागः, खंडः-डम् ३. दण्डः, यष्टिः (स्त्री.) ४. बाणः ५. शरवृक्षः ६. अवसरः ७. तृणादिगुच्छः ८. तरुस्कन्धः ९. समूहः १०. वंशादेः पर्वन् (न.) ११. शाखा १२. व्यापारः, घटना १३. नालम्।

कांडी, सं. स्त्री. (सं. कांडः >) दीर्घ,-स्थूणा-काष्ठम्, गृहस्थूणा, तुला।

कांत, सं. पुं. (सं.) पतिः, भर्तृ २. अयस्-लोह,-कान्त, चुंबकः ३. चन्द्रः ४. वसन्तः ५. श्रीकृष्णः। वि., मनोरम, शोभन।

कांता, सं. स्त्री. (सं.) पत्नी, भार्या २. दयिता, प्रिया ३. सर्वांगसुन्दरी नारी।

कांतार, सं. पुं. (सं. पुं. न.) महावनं, बृहद्-गहनं, अरण्यानी २. वेणुः, वंशः ३. बिलं, छिद्रम्।

कांति, सं. स्त्री. (सं.) द्युतिः-दीप्तिः-छविः (स्त्री.), भा, अभिख्या २. सौन्दर्य, लावण्यम्।

काँप, सं. स्त्री. (सं. कंपा) (१-२) गज-वराह,-दन्तः २. वंशकाशादीनां शलाका ३. कर्णभूषणभेदः।

काँपना, क्रि. अ. (सं. कम्पनम्) कंप्-स्पंद्-वेप् (भ्वा. आ. से.), स्फुर् (तु. प. से.) २. विचल्-वेल्ल् (भ्वा. प. से.) ३. दे. 'डरना'।

काँव-काँव, सं. स्त्री. (अनु.) दे. 'काँ-काँ' २. प्रजल्पः, विप्रलापः।

काँस, सं. पुं (सं. काशः) अमरपुष्पकः, वन-हासकः, काशा-शी २. कलहः।

काँसा, सं. पुं. (सं. कांस्यम्) कंसं, कंसास्थि (न.), ताम्रार्द्धम्, दीप्ति-पीत,-लोहम्, घोषम्।

कांस्यकार, सं. पुं. (सं.) कंसकारः, दे. 'कसेरा'।

का, प्रत्य. (सं. प्रत्य. 'कः') षष्ठी वा समास द्वारा। (उ० राम की पुस्तक=रामस्य पुस्तकं, रामपुस्तकम्)।

काई, सं. स्त्री. (सं. कावारम्) शैव (वा) लः, शैव (वा) लः-लं, जलनीली २. अयोमलम् ३. मलम्।

काक[1], सं. पुं. (सं.) वायसः, ध्वांक्षः।

—तालीय, वि. (सं.) आकस्मिक-यादृच्छिक (-की स्त्री.), अतर्कित।

—पक्ष, सं. पुं. (सं.) शिखंडः-डकः, अलकः, चूर्णकुन्तलः, केशकलापः।

—पद, सं. पुं. (सं. न.) हस्तलेखेषु उज्झित-वर्णद्योतकचिह्नम् (= ∧)

—वन्ध्या, सं. स्त्री. (सं.) एकापत्यजननी।

काक[2], सं. पुं. (अं. कार्क) पिधानं, कूपी-छिद्रपिधानम् २. रोधनी, स्तम्भनी।

काकली, सं. स्त्री. (सं.) सूक्ष्ममधुरास्फुटध्वनिः।

काका, सं. पुं. (फ़ा. काका=बड़ा भाई>) पितृव्यः, पितुः भ्रातृ २. (पं.) बालः, शिशुः।

काकी, सं. स्त्री. (फ़ा. काका>) पितृव्या, पितृव्यपत्नी २. (पं.) कन्यका, बालिका।

काकु, सं. पुं. (सं.) भिन्नकण्ठध्वनिः २. आक्षेपः, व्यंग्यवचनं, आ-अधि,-क्षेपः ३. अलङ्कारभेदः (सा.) ४. जिह्वा।

काकुत्स्थ, सं. पुं. (सं.) श्रीरामचन्द्रः।

काकुल, सं. पुं. (फ़ा.) काकपक्षः, शिखंडकः।

काग, सं. पुं. दे. 'काक' (दोनों)।

काग़ज़, सं. पुं. (अ.) कागदः-दं, पत्रं, कर्गलम्।

—पत्र, सं. पुं. (अ.+सं.) लेख्यपत्राणि, पत्र-काणि, लेख्यानि (सब बहु.)

—की नाव, मु, क्षणभंगुर, विनश्वर।

काग़ज़ी, वि. (अ. काग़ज़>) कागद-पत्र,-मय. २. सूक्ष्मत्वच् ३. प्रतनु। सं. पुं., पत्रवि-क्रयिन् २. श्वेतकपोतः।

—घोड़े दौड़ाना, मु., पत्रैः व्यवह (भ्वा. प. अ.)।

काच, सं. पुं. (सं.) स्फटिकः २. नेत्ररोगभेदः (सं. न.) काचलवणम् २. सिक्थकम्।

काछ, सं. स्त्री. (सं. कक्षा>) कटी-जघन,-वस्त्रम्।

काछना[1], क्रि. स. (सं. कक्षा>) धौताप्रान्तं पृष्ठे निविश् (प्रे.)।

काछना[2], क्रि. स. (सं. कषणम्) फेनं अपनी (भ्वा. उ. अ.)।

काछनी, सं. स्त्री. (हिं. काछना) ऊरुवसनं, सक्थिवस्त्रम्।

काछा, सं. पुं., दे. 'काछनी'।

काछी, सं. पुं. (सं. कच्छः>) शाक,-उत्पादक-विक्रेतृ २. जातिभेदः।

काज[1], सं. पुं. (सं. कार्यम्) कृत्यं, कार्यं, कर्मन् (न.), कृतिः (स्त्री.) २. वृत्तिः (स्त्री.), आजीविका ३. उद्देश्यं, प्रयोजनम् ४. विवाहः।

काज[2], सं. पुं. (अ. कायज़ा>) गण्डाधारः, कुड्मपाधारः (=बटन का छेद)।

काजल, सं. पुं. (सं. कज्जलम्) लोचकः, दीप-किट्टं, अंजनम्।

—की कोठरी, मु., निन्द्यस्थानम्।

काज़ी, सं. पुं. (अ.) न्यायाधीशः, धर्माध्यक्षः (इस्लाम)।

काट, सं. स्त्री. (हिं. काटना) छेदनं, कर्तनं, लवनं, कृन्तनं, व्रश्चनम् २. कर्तनरीतिः (स्त्री.) ३. व्रणः, क्षतम् ४. खण्डः-ण्डं, लवः ५. छलं, कपटम्।

—छाँट, सं. स्त्री., संक्षेपणं २. शोधनम्।

काटना, क्रि. स. (सं. कर्तनम्) कृत् (तु. प. से.), लू (क्र्. उ. से.), छिद् (रु. प. अ.), व्रश्च् (तु. प. वे.) २. तुद् (तु. प. अ.), व्रण् (चु.) ३. ऊन् (चु.), संक्षिप् (तु. प. अः) ४. हन् (अ. प. अ.), व्यापद् (प्रे.) ५. दे. 'कतरना' ६. संधिं त्रुट् (प्रे.) ७. विफलीकृ ८. दंश् (भ्वा. प. अ.) ९. अल्पांशं उद्धृ (भ्वा. प. अ.) १०. अतिक्रम् (भ्वा. प. से.)।

सं. पुं. तथा भाव, दे. 'काट'।

—योग्य, वि., कर्तनीय, छेदनीय, छेत्तव्य, लवनीय।

—वाला, सं. पुं. छेदकः, लावकः, कर्तनकरः।

काटा हुआ, वि., कृत्त, लून, वृक्ण, छिन्न।

काटने दौड़ना, मु. निर्जन (वि.) दृश् (कर्म.)।

काटो तो खून नहीं, मु., सं-, स्तब्ध।

क़ाठ, सं. पुं. (सं. काष्ठम्) दारु (न.) २. इध्मं, इंधनं ३. काष्ठनिगडः-डम् ४. दे. 'शहतीर'। वि. क्रूर २. मूर्ख।

—का उल्लू, सं. पुं. जड़धीः, मूढः, अज्ञः।

—की हाँडी, सं., आपातरमणीयं वस्तु।

—मारना, मु., काष्ठनिगडेन बंध् (क्र्. प. अ.)।

काठिन्य, सं. पुं. (सं. न.) दे. 'कठिनता'।

काठी, सं. स्त्री. (हिं. काठ) पर्याणं, पर्ययणं, पल्ययनम् २. शरीर,-रचना-संस्थानम् ३. असिकोषः।

काढ़ना, क्रि. स. (सं. कर्षणम्) निष्-आ, कृष् (भ्वा. प. अ.), निष्-सं,-पीड् (चु.), निर्-उद्,-हृ (भ्वा. प. अ.) २. सूच्यां पुष्पादिकं सिव् (दि. प. से.) ३. काष्ठपाषाणादिषु पुष्पादिकं उल्लिख्-उत्कॄ (तु. प. से.) ४. पृथक् कृ, वियुज-विश्लिष् (प्रे.) ५. कथ् (भ्वा. आ. से.)।

काढ़ा, सं. पुं. (हिं. काढ़ना) क्वाथः, कषायः, निर्यासः।

कातना, क्रि. स. (सं. कर्तनम्) तन्तून् सृज् (तु. प. अ.), कृत् (रु. प. से.)।

सं. पुं. तथा भाव, कर्तनं, तन्तुनिर्माणम्।

—योग्य, वि., कर्तनीय, कर्तनार्ह।

—वाला, सं. पुं., कर्तकः, तन्तुकारः।

काता हुआ, वि., कृत्त।

कातर, वि. (सं.) व्याकुल, विह्वल २. भीत, त्रस्त ३. भीरु ४. आर्त्त।

कातरता, सं. स्त्री. (सं.) व्याकुलता, धैर्याभावः २. भयं, त्रासः ३. भीरुता, कातर्यम् ४. अवसादः विषादः।

क़ातिब, सं. पुं. (अ.) लेखकः २. अक्षरचंचुः।

क़ातिल, सं. पुं. (अ.) घातकः, हन्तृ।

कादम्ब, सं. पुं. (सं.) (१-३) कदंब,-वृक्षः-पुष्पं-फलम् ४. कलहंसः ५. इक्षुः ६. बाणः ७. कदंबसुरा।

कादंबरी, सं. स्त्री. (सं.) कोकिला २. मदिरा ३. सरस्वती ४. बाणरचितो गद्यकाव्यविशेषः।

कादंबिनी, सं. स्त्री. (सं.) मेघमाला, जलदावली।

कान, सं. पुं. (सं. कर्णः) श्रोत्रं, श्रवणं, श्रुतिः (स्त्री.), श्रावः, शब्दग्रहः।

—में कहना, क्रि. स., कर्णे जप् (भ्वा. प. से.)।

—का परदा, सं. पुं., कर्ण,-पटहः-दुन्दुभिः।

—का बहना, सं. पुं., कर्णस्रावः।

—का मैल, सं. पुं., कर्ण,-मलं-गूथं, पिंजूषः।

—की शांय-शांय, सं. स्त्री., कर्णप्रणादः।

—उमेठना, मु., दंडरूपेण कर्णौ मुट् (चु.)।

—का कच्चा, मु., विश्वासिन्।

—काटना, मु., अतिशी (अ. आ. से.), अतिरिच् (कर्म.)।

—खड़े होना, मु., विस्मि (भ्वा. आ. अ.)।

—खा जाना, मु., कोलाहलं कृ।

—पकड़ना, मु., पश्चात्तापेन कर्णौ स्पृश् (तु. प. अ)।

—पर जूँ न रेंगना, मु., नितान्तं अनवहित (वि.) स्था (भ्वा. प. अ.)।

—फूकना, मु., कलहं उद्दीप् (प्रे.)।

—भरना, मु., पृष्ठतो द्वेषं जन् (प्रे.)।

—में उँगली दिये रहना, मु., दे. 'कान पर जूँ न रेंगना'।
कानन, सं. पुं. (सं. न.) वनम् २. गृहम्।
कानफरेंस, सं. स्त्री. (अं.) सम्मेलनम्।
काना, वि. पुं. (सं. काणः) एकाक्षः, चन्द्रचक्षुः।
कानाकानी, सं. स्त्री., (सं. कर्णः >) कर्णेजपनं, उपांशुवादः २. वार्ता, जनप्रवादः।
कानाफूसी, सं. स्त्री., (सं.+अनु.) दे. 'कानाकानी'।
कानि, सं. स्त्री. (देश.) लोकलज्जा, मर्यादा।
कानीन, सं. पुं. (सं.) कन्यापुत्रः, कुमारीतनयः।
क़ानून, सं. पुं. (अ.) अधिनियमः २. राज-, नियमः, विधिः ३. आचारः, व्यवहारः।
—गो, सं. पुं. ग्रामगणकाध्यक्षः।
—दाँ, सं. पुं., व्यवहारनिपुणः, विधिज्ञः।
क़ानूनी, वि. (अ. क़ानून >) वैध, राजनियम-विषयक २. विधिज्ञ ३. धर्म्य, शास्त्रविहित ४. कुतर्किन्।
कान्ह, सं. पुं. (सं. कृष्णः) श्रीकृष्णचन्द्रः २. पतिः।
कापालिक, सं. पुं. (सं.) शैवतांत्रिकसाधुः २. वर्णसंकरजातिभेदः।
कापुरुष, सं. पुं. (सं.) कु-निंद्य-कातर,-जनः।
क़ाफ़िया, सं. पुं. (अ.) अन्त्यानुप्रासः।
—तंग करना, मु., अतीव संतप्-उद्विज्-अर्द् (प्रे.)।
काफ़िर, सं. पुं. (अ.) अयवनः (इस्लाम.) २. नास्तिकः, अनीश्वरवादिन् ३. क्रूर ४. दुष्ट।
क़ाफ़िला, सं. पुं. (अ.-लः) सार्थः, यात्रिक-समूहः।
काफ़ी, वि. (अ.) पर्याप्त, अन्यूनाधिक, समर्थ, उचित, अलम् (अव्य. चतुर्थी के साथ)।
काफ़ी, सं. स्त्री. (अं.) दे. 'कहवा'।
काफ़ूर, सं. पुं. (फ़ा.) कर्पूरः-रं, घनसारः।
—होना, मु., तिरो भू।
क़ाबिज़, वि. (अ.) अधिकारिन्, प्रभु। २. मलावरोधक, गरिष्ठ।
क़ाबिल, वि. (अ.) योग्य, समर्थ।
क़ाबू, सं. पुं. (तु.) अधिकारः, प्रभुत्वं, वशः।
—करना, क्रि. स., वशं नी (भ्वा. उ. अ.)।
काम[१], सं. पुं. (सं.) इच्छा, अभिलाषः, मनोरथः, आकांक्षा २. शिवः ३. मदनः, कामदेवः ४. मैथुनेच्छा ५. इन्द्रियाणां विषयप्रवृत्तिः (स्त्री.) ६. चतुर्वर्गेऽन्यतमः।
—आतुर, वि. (सं.) कामार्त्त, अनंगतप्त, विधुर।
—केलि, सं. स्त्री. (सं. पुं. स्त्री.) कामक्रीडा, विहारः, विलासः।
—तरु, सं. पुं. (सं.) कल्पवृक्षः।
—देव सं. पुं. (सं.) कामः, मदनः, स्मरः, कंदर्पः, अनंगः, मन्मथः, मनसिजः, मनोजः, कुसुमबाणः, पंचशरः, मारः, मीनकेतनः, मकरध्वजः, पुष्पधन्वन्, आत्मभूः।
—धेनु, सं. स्त्री. (सं.) कामदुघा, कामदा।
—रिपु, सं. पुं. (सं.) कामारिः, शिवः।
—रूप, सं. पुं. (सं.) प्रान्तविशेषः, असमप्रान्तः। वि., स्वेच्छारूप २. सुरूप।
—शास्त्र, सं. पुं. (सं. न.) वात्स्यायनप्रणीतो ग्रंथविशेषः २. कामविज्ञानम्।
काम[२], सं. पुं. (सं. कर्म्मन् न.) कार्यं, कृत्यं, क्रिया २. व्यापारः, व्यवसायः ३. उद्यमः, उद्योगः ४. प्रयोजनम्, उद्देश्यम् ५. उपयोगः, व्यवहारः।
—आना, क्रि. अ., प्र-उप,-युज् (कर्म.), व्यवह्-व्यापृ (कर्म.)। मु., वीरगतिं प्राप् (स्वा. उ. अ.)।
—काज, सं. पुं., कार्यं, अर्थः, व्यवसायः।
—काजी, वि., उद्यमिन्, उद्योगिन्।
—चलाऊ, वि., उपयुक्त, उपयोगिन्।
—चोर, वि., अलस, कर्तव्यविमुख।
—तमाम करना, मु., मृ-निषूद्-नश्-व्यापद् (प्रे.), हन् (अ. प. अ.)।
कामना, सं. स्त्री. (सं.) इच्छा, आकांक्षा।
कामयाब, वि. (फ़ा.) सफल, कृतकार्य।
कामयाबी, सं. स्त्री. (फ़ा.) सफलता, कृत-कार्यता।
कामरी, सं. स्त्री., दे. 'कंबल'।
कामला, सं. पुं. (सं. कामलः) पाण्डुः, पाण्डु-रोगः।
कामिनी, सं. स्त्री. (सं.) सुंदरी, नारी २. सुरा ३. कामबहुला नारी।
कामिल, वि. (फ़ा.) सं.-पूर्ण २. दक्ष, योग्य।

कामी, वि· (सं. कामिन्) लंपट, कामासक्त, कामांध, कामन, अभीक, कामातुर, कामुक २. अनुरक्त, आसक्त, सस्नेह,-सेविन् (समासान्त में) ४. इच्छुक, ईप्सु, सस्पृह ।
सं. पुं., अभि (भी) कः, क (का) मनः, कम्रः, कामुकः २. चन्द्रः ३. कपोतः ४. चक्रवाकः ५. चटकः ।

कामुक, वि. (सं.) दे. 'कामी' वि., 'कामी' सं. पुं. (१) ।

काम्य, वि. (सं.) स्पृहणीय, वांछनीय २. सुंदर, मनोज्ञ ।

काय, सं. स्त्री. (सं. पुं.) शरीरं, देहः २. समुदायः ।

क़ायदा, सं. पुं. (अ.) नियमः, व्यवस्था, रीतिः (स्त्री.), शिष्टाचारः ।

कायम, वि. (अ.) निश्चल, स्थिर, नेश्चेष्ट २. स्थापित ३. निर्धारित ।

—मुक़ाम, सं. पुं. (अ.) प्रतिनिधिः, प्रतिपुरुषः २. उत्तराधिकारिन् । वि., स्थानापन्न ।

क़ायर, वि., दे. 'कातर' ।

कायल, वि. (अ.) छिन्नसंशय, जातप्रत्यय ।

कायस्थ, सं. पुं. (सं.) परमेश्वरः २. जीवः ३. जातिभेदः । वि., शरीरस्थ ।

काया, सं. स्त्री. (सं. कायः पुं.) शरीरं, देहः, विग्रहः, कलेवरम् ।

—कल्प, सं. पुं. (सं.) पुनर्यौवनोत्पादनम् २. पुनर्यौवनोत्पादनचिकित्सा ।

—पलट, सं. पुं., बृहत्परिवर्तनं, महापरिवर्तः २. शरीररूपरेखापरिवर्तनम् ।

कायिक, वि. (सं.) शारीर (–री स्त्री.), शारीरिक–दैहिक (–की स्त्री.) ।

कार[१], सं. पुं. (सं.) कार्यं, क्रिया २. कर्तृ, अनुष्ठातृ ३. अक्षरवाचकप्रत्ययः (उ. च = चकारः) ४. ध्वनिवाचकप्रत्ययः (उ. फूत्कारः) ।

कार[२], सं. पुं. (फ़ा.) कार्यं, व्यवसायः ।

—करना, क्रि. स., नियोगं अनुस्था (भ्वा. प. अ.) ।

—ख़ाना, सं. पुं., शिल्प,–शाला–गृहम्, पण्यनिर्माणस्थानम् ।

—बार, सं. पुं., व्यवसायः, व्यापारः ।

—रवाई, सं. स्त्री., क्रिया, कार्यम् २. गुप्त,–चेष्टा–क्रिया ।

—साज़, वि., कुशल, दक्ष ।

कारक, वि. (सं.) कर्तृ, अनुष्ठातृ, विधातृ २. क्रियया संबंधसूचकः शब्दरूपभेदः (उ. कर्तृकारक इ. व्या.) ।

कारचोब, सं. पुं. (फ़ा.) सूचीकर्मोपजीविन् २. सूचीकर्माधारः ।

कारचोबी, वि (फ़ा.) सूचीकर्म युक्त । (सं. पुं.) सूचीकर्मन् (न.), शिल्पम् ।

कारटून, सं. पुं. (अं.) हासकरमालेख्यम्, हास्यजनकं चित्रं, उपहासचित्रम् ।

कारण, सं. पुं. (सं. न.) हेतुः, निमित्तं, मूलं, बीजं, योनिः (स्त्री.), निदानम् २. साधनम् ३. कर्मन् (न.) ४. प्रमाणम् ५. विष्णुः ६. शिवः ७. पूजान्ते मद्यपानम् (तांत्रिक) ।

कारतूस, सं. पुं. (पुर्त. कारटूस) गुलिः (स्त्री.), गुलिका, आग्नेयचूर्णनाडी–डिः (स्त्री.) ।

कारनिस, सं. स्त्री. (अं.) भित्तिदन्तकः, कुड्यशृंगम् ।

कारा, सं. स्त्री. (सं.) निरोधः, निरोधनम्, बन्धनं, आसेधः, प्रग्रहः २. क्लेशः, पीडा ।

कारागार, सं. पुं. (सं पुं. न.) कारा, बंधनालयः, बंदि,–शाला–गृहम्, कारागृहं, चारः, चारकः, गुप्तिस्थानम् ।

कारावास, सं. पुं. (सं.) दे. 'कारागार' ।

कारिंदा, सं. पुं. (फ़ा.) कारकरः, परकार्यसाधकः, प्रति,–हस्तः–निधिः २. कर्मचारिन्, राजपुरुषः, अधिकारिन् ।

कारी[१], सं. पुं. (सं.–रिन्) कारकः, कर्तृ ।

कारी[२], वि. (फ़ा.) घातक, प्राणहर ।

कारीगर, सं. पुं. (फ़ा.) शिल्पिन्, कारुः, शिल्पकारः । वि., शिल्पकुशल ।

कारीगरी, सं. स्त्री. (फ़ा.) कारुता, शिल्पकौशलं, दक्षता २. मनोहररचना ।

कारुणिक, वि. (सं.) दे. 'करुणामय' ।

कारूँ, सं. पुं. (अ.) मूसानामकस्य सिद्धस्य धनाढ्यकृपणः पितृव्यपुत्रः । वि., कृपणः, कदर्यः ।

—का ख़ज़ाना, सं. पुं., असीमधनं, अमितसंपद् (स्त्री.) ।

कारूरा, सं. पुं. (अ.) मूत्रम् २. मूत्रपात्रम् ।

कारोबार, सं. पुं., दे. 'कारबार'।
कार्ड, सं. पुं. (अं.) पत्रम् २. स्थूलकर्गलम्।
कार्तिक, सं. पुं. (सं.) बाहुलः, ऊर्जः, कौमुदः।
कार्बन, सं. पुं. (अं.) प्रांगारः, कार्बनम्।
कार्बोनिक, वि. (अं.) प्रांगारिक, कार्बनिक।
—एसिड गैस, सं. स्त्री., कार्बनिकाम्लवातिः (स्त्री.)।
कार्मुक, सं. पुं. (सं. न.) चापः, दे. 'धनुष'।
कार्य, सं. पुं. (सं. न.) कर्मन् (न.), कृत्यं, क्रिया २. व्यवसायः ३. परिणामः ४. प्रयोजनम्।
—अध्यक्ष, सं. पुं. (सं.) अधिकारिन् २. कर्मावेक्षकः।
—कर्ता, सं. पुं. (सं.-र्तृ) कर्मकारिन् २. राजभृत्यः।
कार्रवाई, सं. स्त्री., दे. 'काररवाई'।
काल, सं. पुं. (सं.) समयः, वेला, दिष्टः, अनेहस् (पुं.) २. मृत्युः ३. यमः, यमदूतः ४. अवसरः, प्रसंगः ५. दुर्भिक्षं, दुष्कालः ६. कृष्णसर्पः ७. शनैश्चरः ८. शिवः ९. लोहः १०. ऋतुः।
—कूट, सं. पुं. (सं. पुं. न.) घोरविषं, प्राणहरगरलम्।
—कोठरी, सं. स्त्री., कालकोष्ठः।
—क्षेप, सं. पुं. (सं.) समयातिपातः, व्याक्षेपः २. निर्वाहः।
—चक्र, सं. पुं. (सं. न.) समयपरिवर्तः २. भाग्यचक्रम् ३. अस्त्रभेदः।
—ज्ञ, सं. पुं., (सं.) कालविद्, २. दैवज्ञः ३. कुक्कुटः।
—यापन, सं. पुं. (सं. न.) दे. 'कालक्षेप'।
—रात्रि, सं. स्त्री. (सं.) भीमा कृष्णा च निशा २. प्रलयरात्रिः ३. मृत्युनिशा ४. दीपावलीनिशा ५. मनुष्यजीवने सप्तसप्ततिवर्षसप्तमाससप्तदिनानन्तरभवा रात्रिः।
—सर्प, सं. पुं. (सं.) महाविषः, अलगर्दः, कृष्णसर्पविशेषः।
काला, वि. (सं. काल) कृष्ण, श्याम, असित, नील २. अन्धकारमय, तिमिरावृत ३. दूषित ४. घोर ५. भयंकर।
—आजार, सं. पुं., कालज्वरः।
—कलूटा, वि. अतिकृष्ण।
—चोर, सं. पुं., सततस्करः २. अतिदुष्टपुरुषः।
—जीरा, सं. पुं., कृष्णजीरकः, काला, कृष्णा।
—नमक, सं. पुं., कृष्णलवणम्, सौवर्चलम्।
—नाग, सं. पुं., कृष्ण,-नागः-सर्पः २. प्राणहरः शत्रुः।
—पानी, सं. पुं., द्वीपान्तरे निर्वासनम् २. अंडेमनादयो द्वीपविशेषाः।
कालेकोसों, क्रि. वि., अतिदूरं-रे।
—मुँह होना, मु., निंद्-अधिक्षिप् (कर्म०)।
कालातीत, वि. (सं.) अनवसर, असमयोचित
कालापन, सं. पुं. (हिं. काला) कृष्णता, श्यामता, मेचकता।
कालिंदी, सं. स्त्री. (सं.) यमुना, कलिन्दतनया।
कालिक, वि. (सं.) सामयिक, कालविषयक २. समयोचित, प्राप्तकाल ३. अनुकाल, नियतकाल।
कालिका, सं. स्त्री. (सं.) दुर्गा, चण्डी २, मसी-षी ३. कनीनिका ४. श्यामघनघटा।
कालिख, सं. स्त्री. (सं. कालिका) कज्जलं, मषिः-सिः (स्त्री.) २. कलंकः, लांछनं, दोषः।
कालिदास, सं. पुं. (सं.) संस्कृतकविशिरोमणिः, रघुकारः, विक्रमसभायाः सप्तमरत्नम्।
कालिमा, सं. स्त्री. (सं. कालिमन् पुं.) कृष्णिमन् (पुं.), कालता, श्यामता २. मसी ३. लांछनं, दोषः ४. अंधकारः।
कालिय, सं. पुं. (सं.) यमुनावर्तिकृष्णसर्पविशेषः।
—मर्दन, सं. पुं. (सं.) श्रीकृष्णः।
काली, सं. स्त्री. (सं.) चण्डी, दुर्गा २. पार्वती, गिरिजा ३. मसी। सं. पुं. दे. 'कालिय'। वि. स्त्री., कृष्णा, श्यामा।
—खाँसी, सं. स्त्री., कालकासः।
—घटा, सं. स्त्री., (सं.) कादंबिनी, श्यामघनश्रेणिः (स्त्री.)।
—दह, सं. पुं. (सं.+हिं.) यमुनायां जलावर्तविशेषः।
—मिर्च, सं. स्त्री. (सं. कालमरि (री)चम्) कृष्णं, ऊषणं, कालकं, वेल्लजम्।
—कालीन, वि. (सं.) समय-वेला-काल,-संबंधिन् २. सामयिक, प्रास्ताविक। (टि. यह शब्द समासान्त में ही प्रयुक्त होता है)।

कालौंछ, सं. स्त्री. (हिं. काला) कृष्णता, श्यामता २. मसी ३. कज्जलम् ।
काल्पनिक, वि. (सं.) संकल्पज, मनःकल्पित, उद्भावित, कृत्रिम, कृतक ।
काव्य, सं. पुं. (सं. न.) १. कविता, कविकृतिः (स्त्री.), सरसप्रवन्धः २. रसात्मकं वाक्यम् ३. कविताग्रन्थः ।
काश[1], अव्य. (अ.) अपि नाम, प्रार्थये, कामये ।
काश[2], सं. पुं.(सं. पुं. न.)काशः, अमरपुष्पकः, वनहासकः । २. कासः, क्षवथुः ।
—श्वास, सं. पुं., दे. 'दमा' ।
काशिका, वि. (सं.) प्रकाशिका । सं. स्त्री (सं.) काशी २. अष्टाध्यायीवृत्तिः (स्त्री.) ।
काशी, सं. स्त्री. (सं.) शिवपुरी, वाराणसी, तपः-स्थली ।
—फल, सं. पुं. (सं. न.) कूष्मांडः-डकः, पीत,-पुष्पा-फला ।
काश्त, सं. स्त्री. (फ़ा.) कृषिः (स्त्री.), कर्षणं, कृषिकर्मन् (न.) ।
—कार, सं. पुं. (फ़ा.) कर्षकः, कृषाणः ।
काषाय, वि. (सं.) गैरिक-रक्तधातु,-वर्ण । सं. पुं., गैरिकरंजितवस्त्रम् ।
काष्ठ, सं. पुं. (सं. न.) दे. 'काठ' ।
—कीट, सं. पुं. (सं.) घुणः ।
काष्ठा, सं. स्त्री. (सं.) दिशा, दिश् (स्त्री.) २. सीमा ३. शिखरः-रं ४. चन्द्रकला ५. अष्टादशनिमेषात्मकः कालः ।
कास, सं. पुं.(सं.) क्षवथुः २. काशः, वनहासकः ।
कासनी, सं. स्त्री. (फ़ा.) गुल्मभेदः २. तस्य वीजम् ३. नील-श्याम,-वर्णः ।
कासार, सं. पुं. (सं.) सरोवरः, महाजलाशयः
कासीस, सं. पुं. (सं. न.)धातुशेखरं, शोधनम् ।
कास्टिक, वि. (अं.) दाहक ।
—सोडा, सं. पुं. (अं.) दाहकविक्षारः ।
कास्मिक रे, सं. स्त्री. (अं.) सृष्टिरश्मिः ।
काहिल, वि. (अ.) अलस, मंद ।
किंकर, सं. पुं. (सं.) भृत्यः, सेवकः, प्रेष्यः, चेटः २. क्रीतदासः ।
किंकर्तव्यविमूढ, वि. (सं.) संभ्रान्तमनस्, व्याकुलचित्त ।

किंकिणी, सं. स्त्री. (सं.) क्षुद्र,-घंटी-घंटिका २. कांची-चिः (स्त्री.), रशना ।
किंचित्, वि. (सं.) स्तोक, अल्प ।
किंजल्क, सं. पुं. (सं.) पद्म-कमल,-केसरः २. पद्मपरागः, जलजरजस् (न.) ३. नागकेसरः ।
किंतु, अव्य. (सं.) परन्तु, तु, पुनः २. अपि तु, प्रत्युत, पुनः, परन्तु ।
किंनर, सं. पुं. (सं.) किंपुरुषः, तुरंगवदनः, अश्वमुखः ।
किंपुरुष, सं. पुं. (सं.) किन्नरः २. दुष्कुलीनः ३. वर्णसंकरः ।
किंवदंती, सं. स्त्री. (सं.) जन,-प्रवादः-श्रुतिः (स्त्री.), कर्णोपकर्णिका ।
किंवा, अव्य. (सं.) वा, अथवा, यद्वा, किमुत ।
किंशुक, सं. पुं. (सं.) पलाशः, दे. 'ढाक' ।
किं, क्रि. वि. (सं. किम्) कथं, केन प्रकारेण ।
कि, अव्य, (फ़ा.) यत्, यथा, इति ।
किचकिच, सं. स्त्री. (अनु.) प्रलापः, प्रजल्पनम् २. कलहः ।
किचकिचाना, क्रि. अ. (अनु.) दंतैर्दंतान् निष्पीड् (चु.)-घृष् (भ्वा. प. से.) ।
किट्ट, सं. पुं. (सं. न.) धातुमलम् २. तैलादीनां मलम् ३. कल्कं, मलं, शेषम् ।
कितना, वि. (सं. कियत्) किंपरिमाण, किंमात्र २. अधिक, वहु ।
कितने, वि. पुं. (सं. कति) किंसंख्याकाः ।
कितव, सं. पुं. (सं.) द्यूतकारः, अक्षदेविन् २. वंचकः ३. दुष्टः ।
किताब, सं. स्त्री. (अ.) पुस्तकं ग्रन्थः २. पत्रिका, पंजिका ।
—का (किताबी) कीड़ा, सं. पुं., ग्रंथ-पुस्तक,-कीटः । २. सदापाठिन् ।
किताबत, सं. स्त्री. (अ.) लेखः, लेखनम् ।
ख़त व—, सं. स्त्री., पत्रव्यवहारः ।
किधर, क्रि. वि, (सं. कुत्र) क्व, कस्मिन् स्थाने २. कां दिशां प्रति, कस्यां दिशि ।
किन, सर्व. ('किस' का वहु.) के (पुं.), काः (स्त्री.), कानि (न.) ।
किनका, सं. पुं. (सं. कणिका) कणी, कणा, क्षत,-तंडुलः-धान्यम् ।

किनारा, सं. पुं. (फ़ा.) तीरं, तटम् २. उपांतः, प्रांतः ३. वस्त्रप्रान्तः, अंचलः ४. पार्श्वः, पक्षः ५. सीमा ६. अन्तः ।

—करना, मु. दूरे स्था (भ्वा. प. अ.), परित्यज् (भ्वा. प. अ.) ।

किनारी, सं. स्त्री. (फ़ा. किनारा >) स्वर्ण-रजत-, जालाभरणम् ।

किनारे, क्रि. वि. (फ़ा. किनारा) तीरे, तटे २. सीमायाम् ३. पृथक्, दूरे ।

—किनारे, अनु,-कूलं-तटं-तीरम् २. सीमाम् अनु ।

—लगाना, मु., समाप्-संपद् (प्रे.) ।

किफ़ायत, सं. स्त्री. (अ.) मितव्ययः, अमुक्तहस्तत्वम् ।

किबला, सं. पुं. (अ.) प्रतीची २. मक्कानगरी ३. पूज्यजनः ४. पितृ ।

—नुमा, सं. पुं. (अ+फ़ा.) दिग्दर्शकयंत्रम्, दिग्घटी, दिग्घटिका ।

किरकिरा, वि. (सं. कर्करम् >) शार्करिल, सिकतिल ।

किरकिरी, सं. स्त्री. (सं. कर्करम् >) नेत्रपतितो धूल्यादिकणः २. त्रसरेणुः, अणुरेणुः ।

किरच, सं. स्त्री. (सं. कृतिः >) अजिह्मखड्गः, अग्न्यस्त्रसंसक्ता छुरिका २. काष्ठकाचादीनां तीक्ष्णाग्रं शकलम् ।

किरण, सं. स्त्री. (सं. पुं.) रश्मिः, मरीचिः, दीधितिः, मयूखः, करः, अंशुः, अभीशुः ।

—माली, सं. पुं. (सं.-लिन्) सूर्यः ।

किरांची, सं. स्त्री. (अं. कैरेज >) वहनं, शकटः-टम् ।

किरात, सं. पुं. (सं.) अशिष्ट-असभ्य,-जनः २. वन्यजातिभेदः ।

—पति, सं. पुं. (सं.) शिवः ।

किराना, सं. पुं. (सं. क्रयणम् अथवा कीर्ण >) वाणिज्यं, वणिक्कर्मन् (न.) २. गंधद्रव्याणि ।

किराया, सं. पुं. (अ.) वहनमूल्यं, तार्यं, [illegible]आत (ता) रः २. भाटं, भाटकम् ३. भृतिः (स्त्री.), भृत्या ।

—नामा, सं. पुं., भाटकपत्रम् ।

किराये का टट्टू, सं. पुं., वैतनिकः, सवेतनो दासेरः ।

किरायेदार, सं. पुं. (फ़ा.-यादार) भाटकवासिन् ।

किरीट, सं. पुं. (सं.) दे. 'मुकुट' ।

किलक, सं. स्त्री. (हिं. किलकना) हर्ष,-ध्वनिः-नादः-स्वनः, किलकिला २. कलम,-नडः-नलः ।

किलकना, क्रि. अ. (सं. किलकिला >) किलकिला-रावं कृ, हर्षध्वनिं कृ ।

किलकारना, क्रि. अ., दे. 'किलकना' ।

किलकिलाना, क्रि. अ. (सं. किलकिला >) १. दे. 'किलकना' २. कोलाहलं कृ ३. वाक्कलहं कृ ।

किलनी, सं. स्त्री. (हिं. कीड़ा) कुक्कुर,-यूकः-यूका ।

किला, सं. पुं. (अ.) दुर्गं, कोटः ।

—दार, सं. पुं. दुर्गाध्यक्षः, कोटपालः ।

—बंदी, सं. स्त्री., दुर्गनिर्माणम् २. व्यूहरचना ।

किलकारी, सं. स्त्री. (हिं. किलकना) किलकिला, हर्षनादः २. कलकलः ३. चीत्कारः ।

किल्लत, सं. स्त्री. (अ.) न्यूनता ।

किल्ला, सं. पुं. (सं. कीलः >) बृहत्-स्थूल,-कीलः-शंकुः २. बृहत् ,-शूलः-स्थूणा-शलाका ।

किल्ली, सं. स्त्री. (हिं. किल्ला) अर्गलं, अर्गलाबंधः २. कीलः, कीलम् ३. शूलः, स्थूणा ।

किल्विष, सं. पुं. (सं. न.) पापम् २. अपराधः ३. रोगः ।

किवाड़, सं. पुं. (सं. कपाटः) कपाटं-टी, अररम् २. द्वारं, द्वार् (स्त्री.) ।

—खटखटाना, क्रि. स., कपाटम् अभिहन् (अ. प. अ.) ।

किशमिश, सं. स्त्री. (फ़ा) शुष्क,-द्राक्षा-गोस्तनी ।

किशलय, सं. पुं. (सं. पुं. न.) किसलयः-यं, पल्लवः-वं, अंकुरः, प्ररोहः २. मंजरी ।

किशोर, सं. पुं. (सं.) एकादशावधिपंचदशवर्षपर्यन्तवयस्को बालः २. बालकः ३. पुत्रः ।

किशोरी, सं. स्त्री. (सं.) तरुणी, बाला, बालिका, कन्या, युवती-तिः (स्त्री.) ।

किश्ती, सं. स्त्री. (फ़ा.) नौका २. दीर्घचतुरस्रपात्रम् ३. भस्त्रा, क्षुद्रकोषः ।

किस, सर्व. (सं. कस्य >) 'किम्' के रूपों से ।
—तरह, क्रि.वि., कथं, केन प्रकारेण, कया रीत्या।
किसलय, सं. पुं., दे. 'किशलय'।
किसान, सं. पुं. (सं. कृषाणः) कर्षक, कृषिक, कृषीवलः, क्षेत्रिकः, क्षेत्राजीवः, क्षेत्रिन्।
किसानी, सं. स्त्री, (हिं. किसान) कृषिः (स्त्री.), कृषिकर्मन् (न.)।
किसी, सर्व (हिं. किस) 'किम्' के रूपों के साथ चित्, चन वा अपि लगाकर। [उ० किसी ने = कश्चित्, कोऽपि, कश्चन (पुं.); काचित् (स्त्री.); किंचित् (न.) इ. ।]
—तरह, क्रि. वि. येन केन प्रकारेण, कथंचित्।
किसे, सर्व. (हिं. किस) कं, कां, किम् (द्वितीया); कस्मै, कस्यै, कस्मै (चतुर्थी)।
किस्त, सं. स्त्री. (अ.) देयभागः ऋणांशः, खण्डिका।
—करना, क्रि. स., अंशांशतः ऋणं परिशुध् (प्रे.)।
—वार, क्रि. वि., अंशशः, अंशांशतः।
क़िस्म, सं. स्त्री. (अ.) प्रकारः, भेदः, जातिः (स्त्री.) २. प्रकृतिः (स्त्री.), स्वभावः।
क़िस्मत, सं. स्त्री. (अ.) भाग्यं, भागधेयं, दिष्टं, दैवम् २. प्रान्त,-भागः-खण्डः।
ख़ुश—, वि., धन्य, पुण्यवत्।
बद—, वि., अधन्य, दैवहतक।
—आज़माना, मु., भाग्यं परीक्ष् (भ्वा. आ.से.)।
क़िस्सा, सं. पुं. (अ.) कथा २. वृत्तान्तः ३. कलहः।
की, प्रत्य. ('का' का स्त्री.) दे. 'का'।
कीकर, सं. पुं. (सं. किंकिरावः) दीर्घकण्टकः।
कीचक, सं. पुं. (सं.) सरंध्रो वंशः, सच्छिद्रो वेणुः। २. विराटराजस्य श्यालः।
कीचड़, सं. पुं. (सं. चिकिलः) पंकः-कं, जंबालः-लं, अवकीलः, कर्दमः, शादः, निषद्वरः।
कीट[1], सं. पुं. (सं.) कीटकः, कृमिः, क्रिमिः, नीलंगुः।
कीट[2], सं. स्त्री. (सं. किट्टम्) घृततैलादीनां मलम्।
कीड़ा, सं. पुं. (सं. कीटः) दे. 'कीट[1]'। २. सर्पणशीलः, सरीसृपः ३. सर्पः, अहिः (पुं.) ४. रक्तपा, जलौका।
—लगना, क्रि. अ., कीटैः भक्ष् (कर्म.)।
कीड़ी, सं. स्त्री. (हिं. कीड़ा) क्षुद्रकीटः २. पिपीलिका ३. जलूका।
कीना, सं. पुं. (फ़ा.) द्वेषः, वैरं, द्रोहः।
कीप, सं. स्त्री. (अ. कीफ़) निवापः।
क़ीमत, सं. स्त्री. (अ.) मूल्यं, अर्घः।
कीमती, वि. (अ.) महार्घ, बहुमूल्य।
क़ीमा, सं. पुं. (अ.) कृत्तमांसम्।
कीमिया, सं. स्त्री. (फ़ा.) रसायनम्, रस,-विद्या-शास्त्र-तंत्रम्।
कीर, सं. पुं. (सं.) शुकः, दे. 'तोता'।
कीर्तन, सं. पुं. (सं. न.) गुणकथनम् २. ईश-गुणगानम्।
कीर्ति, सं. स्त्री. (सं.) यशस् (न.), विख्यातिः-विश्रुतिः (स्त्री.), अभिख्या, समाख्या।
—मान्, वि. (सं.-मत्) यशस्विन्, विश्रुत, विख्यात।
कील, सं. स्त्री. (सं. पुं.) कीलकः, शंकुः, लोह,-कीलः-शंकुः २. लवंगनामकं नासिका-भूषणम् ३. मुखस्फोटकः।
कीलक, सं. पुं. (सं.) कीलः, कीला २. नाग-दंतः, भारयष्टिः (स्त्री.) ३. महाकीलः, शूलः ४. स्थाणुः, स्थूणा ५. अन्यमंत्रप्रभावनाशको मंत्रः।
कीलना, क्रि. स. (सं. कीलनम्) कील् (चु.), कीलैः बंध् (क्र्. प. अ.) २. अभिचारप्रभावं नश् (प्रे.) ३. (सर्पादिकं) वशीकृ।
कीला, सं. पुं. (सं.) दे. 'किल्ला'।
कीलाल, सं. पुं. (सं. न.) अमृतम् २. जलम् ३. रक्तम् ४. मधु (न.)।
कीलित, वि. (सं.) (कीलैः) बद्ध, दृढीकृत, पिनद्ध।
कीली, सं. स्त्री. (सं. कीलः >) कर्षणी, व्या-वर्तनकीलः, वलयकीलकः २. कुञ्चिका, उद्-घाटकम् ३. विवर्तनकीलः ४. कीलः ५. अक्ष-रेखा, अक्षः।
कीश, सं. पुं. (सं.) कपिः २. खगः ३. सूर्यः।
कुँअर, सं. पुं. (सं. कुमारः) पुत्रः, सूनुः (पुं.) २. बालकः ३. राजकुमारः ४. युवराजः।
कुँआरा, वि. पुं. (सं. कुमार) अकृतविवाहः। [-री (स्त्री.) = अपरिणीता, अनूढा, कुमारी।]

कुँइ, सं. स्त्री., दे. 'कुमुदिनी'।

कुंकुम, सं. पुं. (सं. न.) काश्मीरजं, दे. 'केसर' २. दे. 'रोली'।

कुंचित, वि. (सं.) दे. 'आकुंचित'।

कुंज, सं. पुं. (सं. पुं. न.) निकुंजः-जं, लता,-गृहं-मंडपः।

—कुटीर, सं. स्त्री. (सं. पुं.) लतागृहं, पर्णशाला, कुंजगृहम्।

—विहारी, सं. पुं. (सं.-रिन्) श्रीकृष्णः।

कुंजड़ा, सं. पुं. (सं. कुंज >) हरितकविक्रेतृजातिविशेषः २. शाकविक्रयिन।

कुंजर, सं. पुं. (सं.) गजः, द्विपः २. केशः। (टि. समासान्त में 'कुंजर' श्रेष्ठतावाचक है—नरकुंजर = श्रेष्ठपुरुषः)।

कुंजी, सं. स्त्री. (सं. कुंचिका) ताली, उद्घाटकः-कं, अंकुटः, साधारणी। २. टीका, व्याख्या।

कुंठ, वि. (सं.) कुंठित, धाराहीन, तीक्ष्णतारहित २. मूर्ख।

कुंठित, वि. (सं.) कुंठीकृत, हततैक्ष्ण्य २. निष्प्रभीकृत ३. अनुपयोगिन्।

कुंड, सं. पुं. (सं. कुण्डः-डं-डी) पल्वलः-लं, अल्पसरस् (न.), वेशंतः, क्षुद्रजलाशयः २. अग्नि-यज्ञ-हवन,-कुण्डम् ३. स्थाली ४. विशालमुखमतिगंभीरपात्रम् (हिं. मटका) ५. सधवाया जारजपुत्रः ६. लौहशिरस्त्रम् ७. मानभेदः।

कुंडल, सं. पुं. (सं. पुं. न.) कर्ण-श्रवण,-वेष्टनं, कर्णभूषणभेदः २. वलयः ३. परिवेशः-षः, तेजोमंडलम् ४. आवेष्टनम्, व्यावर्तनम्।

—करना वा मारना, क्रि. स., वर्तुली-पुटी,-कृ, व्यावृत्-परिवेष्ट् (प्रे.)।

कुँडलिया, सं. स्त्री. (सं. कुण्डलिका) मात्रिकछन्दोभेदः।

कुंडली, सं. स्त्री. (सं.) मिष्टान्नभेदः (हिं. जलेबी) २. कुरलः, चूर्णकुन्तलः ३. जन्मपत्रं,-पत्रिका ४. सर्पस्य वर्तुलाकारस्थितिः (स्त्री.)।

कुंडा[1], सं. पुं. (सं. कुण्टः) जीवति भर्तरि जारजः।

कुंडा[2], सं. पुं. (सं. कुण्डलम् >) लोह,-ग्रहणीघण्टी २. अर्गलः-लं-ला-ली।

कुंडा[3], सं. पुं. (सं. कुण्डः-डम्) विशालमुखमतिगम्भीरपात्रम् (हिं. मटका)।

कुण्डी[1], सं. स्त्री. (सं.) कुण्डी, खल्लः।

—डंडा, सं. पुं., कुण्डीदण्डं-डौ।

कुंडी[2], सं. स्त्री. (हिं. कुण्डा) द्वारश्रृंखला २. अर्गलः-लं-ला-ली ३. श्रृङ्खला,-संधिः-ग्रंथिः।

कुन्त, सं. पुं. (सं.) प्रासः, तोमरः।

कुन्तल, सं. पुं. (सं.) केशः, शिरोरुहः।

कुन्ती, सं. स्त्री. (सं.) पृथा, पाण्डुपत्नी, युधिष्ठिरजननी।

कुन्द[1], सं. पुं. (सं. पुं. न.) सदापुष्पः, वनहासः २. कमलम्।

कुन्द[2], वि. (फ़ा.) कुण्ठ, तीक्ष्णतारहित २. मन्द, जड।

—ज़हन, वि. (फ़ा.) मन्दमति, मूर्ख।

कुन्दन, सं. पुं. (सं. कुन्दः >) विशुद्धं सुवर्णम् वि. भास्वर २. पवित्र ३. नीरोग।

कुन्दा, सं. पुं. (फ़ा.) बृहत्-स्थूल,-काष्ठम् २. अग्न्यस्त्रस्य काष्ठमयोऽपरभागः ३. काष्ठनिगडः ४. मुष्टिः (स्त्री.), वारंगः।

कुन्दी, सं. स्त्री. (फ़ा. कुन्दा >) मुद्गरैर्वस्त्रताडनम् २. ताडनम्।

कुम्भ, सं. पुं. (सं.) घटः, घटी, कलशः-शी-शम् २. गजकुम्भः, हस्तिशिरसः पिण्डद्वयम् ३. कुम्भकप्राणायामः ४. द्वादशवार्षिकः पर्वविशेषः ५. राशिविशेषः (ज्यो.)।

—कर्ण, सं. पुं. (सं.) रावणानुजः।

—योनि, सं. पुं. (सं.) अगस्त्यो मुनिः।

कुंभक, सं. पुं. (सं.) कुम्भः, प्राणायामे वायुस्तम्भनम्।

कुंभी, सं. स्त्री. (सं.) क्षुद्र-लघु,-कुम्भः-घटः।

—पाक, सं. पुं. (सं.) नरकविशेषः।

कुंभी, सं. पुं. (सं. कुम्भिन्) गजः २. नक्रः ३. विषकीटभेदः।

कुँवर, सं. पुं., दे. 'कुँअर'।

कु, अव्य. (सं.) पापकुत्साऽल्पत्वादिद्योतकमव्ययम् (उ. कुकर्म = पापकर्म इ.)।

कुआँ, सं. पुं. (सं. कूपः) अंधुः, प्रहिः, अवटः, खातः, अवतः, केवटः।

—खोदना, मु., परान् पीड् (चु.)।

कुआर, सं. पुं. (सं. कुमारः >) आश्विनः, इषः, अश्वयुजः ।

कुकड़ी, सं. स्त्री. (सं. कुक्कुटी) ताम्रचूडी २. शस्यम् ३. सूत्रपंजी, तंतुगुच्छः ।

कुकर्म, सं. पुं. (सं. न.) कु,-कार्यं-कृत्यं-कृतिः (स्त्री.), दुराचारः, पापं, दुष्टता ।

कुकर्मी, वि. (सं.-र्मिन्) दुर्वृत्त, पापिन् , पाप, दुरात्मन् ।

कुकुरमुत्ता, सं.पुं. (सं. कुकुरमूत्रम् >) कुछत्रकः।

कुक्कुट, सं. पुं. (सं.) ताम्रचूडः, चरणायुधः, कालज्ञः, उषाकरः, शिखण्डिकः ।

कुक्कुर, सं. पुं. (सं.) श्वन् , दे. 'कुत्ता' ।

कुक्षि, सं. स्त्री. (सं. पुं.) उदरं, जठरं, तुंदम् २. गर्भाशयः, गर्भस्थानम् ३. पदार्थान्तर्भागः ४. गुहा ।

कुगति, सं. स्त्री. (सं.) दुर्दशा, दुर्गतिः (स्त्री.)।

कुच, सं. पुं. (सं.) स्तनः, उरोजः २. चूचुकः-कं, स्तनाग्रम् ।

कुचकुचाना, क्रि. स. (अनु. कुचकुच) व्यध् (दि. प. अ.), छिद्रं कृ ।

कुचक्र, सं. पुं. (सं. न.) कूट-कपट,-उपायः, उपजापः, कपट,-संकल्पः-प्रयोगः ।

कुचक्री, वि. (सं.-क्रिन्) उपजापकः, कपट-प्रबन्धयोजकः ।

कुचलना, क्रि. स. (अनु.) क्षण् (त. प. से.) २. मृद् (क्र. प. से.), पिष् (रु. प. अ.) ३. भूरि तड् (चु.) ४. पादतलेन आहन् (अ. प. अ.) ।

कुचला, सं. पुं. (सं. कच्चीरः) किंपाकः, विष-तिंदुः, रम्यफलः, कुपीलुः, कालकूटः ।

कुचाल, सं. पुं. (सं. कु + हिं. चाल) दुराचारः, कुचर्य्या, कदाचरणम् ।

कुचाली, वि. (हिं. कुचाल) दुराचारिन् , दुर्वृत्त ।

कुचेष्टा, सं. स्त्री. (सं.) दुश्चेष्टा, हानिकरो यत्नः ।

कुचैला, वि. (सं. कुचेल) मलिनवेष, कुवसन

कुछ, वि. (सं. किंचित्) (मात्रा) अल्प, स्वल्प, स्तोक, ईषत् २. (संख्या) कतिचित् , कतिपय । ३. किमपि, यत्किंचन ४. 'किम्' के तीनों लिंगों के रूपों के साथ चित् , चन, अपि लगाते हैं, उ. केचित्, काश्चित् , कानिचित् इ. ।

—कर देना, मु., मंत्रैः वशीकृ ।

कुज, सं. पुं. (सं.) मंगलग्रहः २. वृक्षः ।

कुजाति, सं. स्त्री. (सं.) हीन-नीच-निकृष्ट,-जातिः-वर्णः । सं. पुं., दुष्कुलीनः, अन्त्यजः, नीचः ।

कुट[1], सं. पुं. (सं. कुष्ठम्) गदाह्वं, कौवेरम्)

कुट[2], सं. पुं. (सं.) दुर्गं, कोटः २. गृहम् ३ पर्वतः ४. कलशः ।

कुटकी, सं. स्त्री. (सं. कट्कीटः) दंशः, मशकः, प्राचिका, वनमक्षिका ।

कुटनपन, सं. पुं. (सं. कुट्टनी >) दूतीवृत्तिः (स्त्री.) २. उपजापः, भेदवर्द्धनम् ।

कुटना, सं. पुं. (हिं. कुटनी) भगभक्षकः, संचारकः, कुंडाशिन् २. पिशुनः ।

कुटनी, सं. स्त्री. (सं. कुट्टनी) कुट्टिनी, दूती, दूतिका, संचारिका, शंभली, रतताली ।

कुटिया, सं. स्त्री. (सं. कुटी) उटजः-जं, पर्ण-शाला, पर्णकुटी-टिः (स्त्री.) कुटीरः ।

कुटिल, वि. (सं.) वक्र, जिह्म, अराल, भुग्न, न्युब्ज २. वञ्चक, प्रतारक, कपटिन् , छलिन् ।

कुटिलता, सं. स्त्री. (सं.) कौटिल्यं, वक्रता, जिह्मता २. छलं, कपटं, प्रतारणा ।

कुटी, सं. स्त्री. (सं.) } क्षुद्रगृहम् ,
कुटीर, सं. पुं. (सं.) } दे. 'कुटिया' ।

कुटुम्ब, सं. पुं. (सं. पुं. न.) गृहजनः, पुत्र-कलत्रादयः, ज्ञातिः (स्त्री.), बान्धवाः, संततिः (स्त्री.) २. कुलं, वंशः, जातिः (स्त्री.) ।

कुटुंबी, सं. पुं. (सं.-बिन्) गृहस्थः, गृहपतिः, गेहिन् २. ज्ञातिः (स्त्री.), बन्धुः, बांधवः ।

कुटुम्बिनी, सं. स्त्री. (सं.) गृहिणी, गेहिनी, आर्या, सुतिनी, पुरन्ध्री ।

कुटेव, सं. स्त्री. (सं. कु + हिं. टेव) कुप्रवृत्तिः (स्त्री.), व्यसनं, दुर्गुणः ।

कुट्टनी, सं. स्त्री. (सं.) दे. 'कुटनी' ।

कुट्टी, सं. स्त्री. (हिं. काटना) यवसखण्डाः २. बालकेषु मैत्रीविच्छेदः ।

कुठला, सं. पुं. (सं. कोष्ठः >) क्षुद्रधान्यकोष्ठः, मृण्मयं लघुधान्यागारम् ।

कुठार, सं. पुं. (सं.) परशुः, द्रुघणः, वृक्षादनी, वृक्षभेदिन् , परश्वधः ।

कुठाराघात, सं. पुं. (सं.) परशुप्रहारः २. तीव्र-प्रहारः ।

कुठाली, सं. स्त्री. (सं. कु+स्थाली >) तैजसावर्तनी, मु(मू)षा-षी।

कुठौर, सं. पुं. (सं. कु+हिं. ठौर) कुस्थानम् २. अनवसरः, असमयः।

कुड़ुक, सं. स्त्री. (फ़ा. क़ुरक) कुक्कुटीरुतम् २. अनंडदा कुक्कुटी। वि., व्यर्थ, निरर्थक।

कुडौल, वि. (सं. कु+हिं. डौल) दुर्दर्शन, कदाकार, कुरूप।

कुढंगा, वि. पुं. (सं. कु+हिं. ढंग) अशिष्ट, असभ्य, दुःशील।

कुढ़न, सं. स्त्री. (हिं. कुढ़ना) मनस्तापः, चित्तव्यथा।

कुढ़ना, क्रि. अ. (सं. क्रुद्ध >) दुर्मनायते (ना. धा.), क्षुभ् (दि. प. से.), अन्तः परितप् (दि. आ. अ.)।

कुढब, वि. (सं. कु+हिं. ढब) कुरूप, दुर्दर्शन २. अशिष्ट ३. कठिन।

कुढ़ाना, क्रि. स. (हिं. कुढ़ना) संतप्-उद्विज् (प्रे.) २. प्रकुप्-क्रुध् (प्रे.)।

कुतरना, क्रि. स. (सं. कर्तनम्) चर्वणेन कृत् (तु. प. से.), दन्तैः खण्ड् (चु.)।

कुतर्क, सं. पुं. (सं.) हेत्वाभासः, मिथ्याहेतुः, वितंडा, प्रजल्पः, विवादः।

कुतर्की, वि. (सं.-र्किन्) वितण्डावादिन्, मिथ्याहेतुवादिन् २. वाचालः, वावदूकः।

कुतिया, सं. स्त्री. (हिं. कुत्ता) सरमा, कुक्कुरी, शुनी, सारमेयी, भषी।

कुतुब, सं. पुं. (अ.) ध्रुवः, ध्रुवतारा।

—नुमा, सं. पुं., दे. 'किबलानुमा'।

कुतूहल, सं पुं. (सं. न.) उत्कण्ठा, कौतूहलं, कुतुकं, कौतुकं, जिज्ञासा २. अपूर्व-दुर्लभ-अदृष्ट,-वस्तु (न.) ३. विनोदः ४. आश्चर्यम्।

कुत्ता, सं. पुं. (देश.) कुक्कुरः, श्वन्, शुनकः, कौलेयकः, भषकः, सारमेयः, मृगदंशकः, भषणः, वक्रलांगूलः, वृकारिः, शयालुः।

कुत्ते की हड़(ल)क, सं. स्त्री., आलर्क, जलसंत्रासः, अलर्काभिभवः।

कुत्ती, सं. स्त्री. (हिं. कुत्ता) दे. 'कुतिया'।

कुत्सित, वि. (सं.) अधम, अवम, गर्ह्य, निन्दित।

कुदरत, सं. स्त्री. (अ.) प्रकृतिः (स्त्री.), माया, ईश्वरशक्तिः (स्त्री.) २. अधिकारः, प्रभुत्वम् ३. संसारः, जगत् (न.) ४. रचना।

कुदरती, वि. (अ.) नैसर्गिक, प्राकृतिक, मायामय २. स्वाभाविक, सहज ३. दिव्य, ऐश्वर (-री स्त्री.)।

कुदाँव, सं. पुं. (सं. कु+हिं. दाँव) छलं, विश्वासघातः २. कुस्थितिः (स्त्री.) ३. कुस्थानम्।

कुदान[1], सं. पुं. (सं. न.) गर्ह्यदानम् २. कुपात्राय दानम्।

कुदान[2], सं. स्त्री. (हिं. कूदना) कूर्दनं, झंपः-पा २. कूर्दनभूमिः (स्त्री.), झंपान्तरालम्।

कुदाना, क्रि. स., 'कूदना' के धातुओं के प्रे. रूप।

कुदाल, सं. पुं. (सं. कुद्दालः) कुद्दारः, अवदारणः, स्तम्बघ्नः, खनित्रम् २. टंकः, पाषाणदारणः।

कुदिन, सं. पुं. (सं. न.) आपत्कालः, विपत्तिसमयः २. दुर्दिनम्, ऋतुविपरीतं दिनम्।

कुदृष्टि, सं. स्त्री. (सं.) पापदृष्टिः (स्त्री.) २. अमंगलदृष्टिः।

कुधर, सं. पुं. (सं.) पर्वतः २. शेषनागः।

कुनकुना, वि. (सं. कदुष्ण) ईषदुष्ण, कोष्ण, कवोष्ण, मन्दोष्ण।

कुनबा, सं. पुं., दे. 'कुटुम्ब'।

कुनाम, सं. पुं. (सं.-मन् न.) अप,-ख्यातिः-कीर्तिः (स्त्री.)।

कुपन्थ, सं. पुं. (सं. कुपथः) कापथः, कुमार्गः २. निषिद्धाचरणम् ३. कुत्सितसंप्रदायः।

कुपन्थी, वि. (हिं. कुपन्थ) कुपथिन्, कुमार्गिन्, कदाचरिन्।

कुपथ, सं. पुं. (सं.) दे. 'कुपन्थ'।

—गामी, वि. (सं.-मिन्) दे. 'कुपन्थी'।

कुपथ्य, सं. पुं. (सं. न.) रोगजनकौ आहार-विहारौ।

कुपात्र, वि. (सं. न.) अयोग्य, अनर्ह, निर्गुण, अनधिकारिन्।

कुपित, वि. (सं.) क्रुद्ध, रुष्ट।

कुपुत्र, सं. पुं. (सं.) दे. 'कपूत'।

कुप्पा, सं. पुं. (सं. कुतुपः) कूपकः, कुतूः (स्त्री.) चर्ममयं स्नेहपात्रम्।

—होना, मु. आप्यै-स्फाय् (भ्वा. आ. से.) पीनीभू ।

कुप्पी, सं. स्त्री. (हिं. कुप्पा) चर्मकूर्पा, लघु,-कुतुपः-कुतूः (स्त्री.) ।

कुफ़र, सं. पुं. (अ. कुफ्र) यवनेतरसंप्रदायः २. यवनमतविरोधिवाक्यम् ।

कुब, सं. पुं. (सं. कुब्जः >) ककुदः-दं, कुद् (स्त्री.) ।

कुबड़ा, वि. (सं. कुब्ज) कुब्जक, न्युब्ज, वक्र-पृष्ठ, गडुल-र, गडु । स. पुं., कुब्जः इ. ।

कुबड़ी, सं. स्त्री. (हिं. कुबड़ा) नतशीर्षा यष्टिः (स्त्री.) २. दे. 'कुब्जा' ।

कुबानि, सं. स्त्री., दे. 'कुटेव' ।

कुबुद्धि, वि. (सं.) मूर्ख, मन्दमति । सं. स्त्री., मौर्ख्यं, मूढता ।

कुबेर, सं. पुं. (सं. कुबेरः) धनदः, यक्षराजः, वैश्रवणः, राजराजः, इच्छावसुः, नरवाहनः, निधीश्वरः ।

कुबेला, सं. स्त्री. (सं. कुवेला) कु,-समयः-कालः २. अनवसरः, अयोग्यकालः ।

कुब्ज, वि. (सं.) दे. 'कुबड़ा' ।

कुब्जा, सं. स्त्री. (सं.) कंसदासी २. मंथरा-नाम्नी कैकेयीदासी । वि. वक्रपृष्ठा, कुब्जा ।

कुमक, सं. स्त्री. (तु.) सैन्य-, सहायता ।

कुमाच, सं. पुं. (अ. कुमाश) कौशेयवस्त्रभेदः ।

कुमार, सं. पुं. (सं.) वालः, वालकः २. पुत्रः ३. राजपुत्रः ४. युवराजः ५. कार्त्तिकेयः ६. अप्राप्तयौवनः ८. सनकादयः ऋषयः ७. भारतवर्षः-र्षम् । वि., दे. 'कुआरा' ।

कुमारी, सं. स्त्री. (सं.) वाला, बालिका, कन्या २. पुत्री ३. राजपुत्री ४. द्वादशवर्षा कन्या ५. सहा, घृतकुमारी ६. सीता ७. पार्वती । वि., दे. 'कुँआरी' ।

कुमार्ग, सं. पुं. (सं.) दे. 'कुपंथ' ।

कुमुद, सं. पुं (सं. न.) कैरवं, चन्द्रकान्तं, कल्हारं, शीतलकं, इन्दुकमलं, चन्द्रिकांबुजं, गन्धसोमं, कुवलयम् २. कर्पूरः-रं ३. रूप्यम् ।

—बंधु, सं. पुं. (सं.) चन्द्रः २. कर्पूरः-रम् ।

कुमुदिनी, सं. स्त्री. (सं.) दे. 'कुमुद' २. कुमुद-वत् सरस् (न.) ।

—पति, सं. पुं. (सं.) चन्द्रः ।

कुमेरु, सं. पुं. (सं.) दक्षिणध्रुवः ।

कुमोदिनी, सं. स्त्री., दे. 'कुमुदिनी' ।

कुम्मैत, सं. पुं. (तु.) पिंग,-वर्णः-रंगः २. पिंगाश्वः ।

कुम्हड़ा, सं. पुं. (सं. कूष्मांडः) दे. 'काशीफल' ।

कुम्हलाना, क्रि. अ. (सं. कुम्लानं) म्लै-ग्लै (भ्वा. प. अ.), विशृ (कर्म.), विवर्णी भू ।

कुम्हार, सं. पुं. (सं. कुंभकारः) कुलालः, चक्रिन् ।

कुम्हारिन, सं. स्त्री. (हिं. कुम्हार) कुलाली कुंभकारी, चक्रिणी ।

कुरंग[1], सं. पुं. (सं.) हरिणः, मृगः २. कृष्णसारः ।

कुरंग[2], वि. कुवर्ण, निन्द्यरंग ।

कुरंगी, सं. स्त्री. (सं.) मृगी, हरिणी ।

कुरंड, सं. पुं. (सं. कुरुविंदम्) काचलवणम् २. माणिक्यम् ।

कुरकुरा, वि. (अनु. कुरकुर) भंगुर, भिदुर ।

कुरबान, वि. (अ.) इष्ट, हुत, वलित्वेन दत्त ।

कुरबानी, सं. स्त्री. (अ.) यज्ञः, यागः २. वलिः, उत्सर्गः, आलंभः ३. समर्पणं, परित्यागः ।

कुरसी, सं. स्त्री. (अ.) आसंदी, पीठं, आसनम् २-४. स्तम्भ-प्राकार-भवन,-मूलम् ५. वंशपरंपरा ।

—नामा, सं. पुं. (अ.+फ़ा.) वंश,-वृक्षः-परंपरा ।

आराम—, सं. स्त्री. (फ़ा.+अ.) विश्रामासंदी ।

कुरा, सं. पुं. (अ.) दे. 'पाँसा' ।

कुरान, सं. पुं. (अ.) यवनधर्मपुस्तकम् ।

कुराह, सं. स्त्री. (सं. कु+फ़ा. राह) दे. 'कुपंथ' ।

कुरीति, सं. स्त्री. (सं.) कुप्रथा, कदाचारः, कुव्यवहारः ।

कुरु, सं. पुं. (सं.) नृपविशेषः २. प्रान्तविशेषः ३. कुरुवंशजः ।

—क्षेत्र, सं पुं. (सं. न.) महाभारतसंग्राम-भूमिः (स्त्री.) ।

कुरूप, वि. (सं.) विरूप, कदाकार, दुर्दर्शन । सं. पुं. (सं. न.) वैरूप्यं, कदाकारः ।

कुरूपता, सं. स्त्री. (सं.) दे. 'कुरूप' सं. पुं. ।

कुरेद (ल)ना, क्रि. स. (सं. कर्तनम् ?) उत्-वि,-लिख् (तु. प. से.), तक्ष् (भ्वा. प. से.), खुर् (तु. प. से.), घृष् (भ्वा. प. से.) त्वक्ष् (भ्वा. प. वे.) उत्खन् (भ्वा. प. से) ।

क़ुर्क़, वि. (तु.) ऋणहेतोः अपहृत ।

—करना, क्रि. स., ऋणहेतोः अपहृ (भ्वा. उ. अ.)।

—अमीन, सं. पुं. (तु.+फ़ा) ऋणादिहेतोः द्रव्यापहर्ता राजकर्मचारिन् ।

क़ुर्क़ी, सं. स्त्री. (तु. क़ुर्क़>) (राजाज्ञया) सम्पत्तिहरणम् ।

कुर्ता, सं. पुं. (तु.) चोलः, उरोवस्त्रम् ।

कुर्ती, सं. स्त्री. (तु. कुर्ता>) आंगिकः-कं, कूर्पासकः-कम् ।

कुर्री, सं. स्त्री. (देश.) कोमलास्थि (न.) ।

कुलंग, सं. पुं. (अ.) रक्तशीर्षो धूसरः खगभेदः। २. कुक्कुटः ३. दीर्घजंघो मनुष्यः ।

कुलंजन, सं. पुं. (सं.) कुलंजः, कुर्णजः, गंधमूलः २. तांबूली-नागलता,-मूलम् ।

कुल, सं. पुं. (सं. न.) वंशः, अन्वयः, वंशावली-लिः (स्त्री.) २. जातिः (स्त्री.) ३. समूहः ४. गृहम् ५. वाममार्गः ।

—कलंक, सं. पुं. (सं.) कुलांगारः, कुलपांसलः ।

—कानि, सं. स्त्री. (सं.+हिं.) कुल,-गौरवं-मर्यादा ।

—तारण, सं. पुं. (सं.) वंशोद्धारकः ।

—पति, सं. पुं. (सं.) गृहस्वामिन् २. दशसहस्रछात्राणां पोषकोऽध्यापकश्च ३. विश्वविद्यालयस्य उपप्रधानाधिकारिन् (अं० वाइस-चान्सलर) ।

—वंती, सं. स्त्री. (सं. कुलवती) कुलीना, सद्वंशजा, आर्या ।

कुल, वि. (अ.) सकल, समस्त, निखिल ।

कुलकुलाना, क्रि. अ. (अनु.) कुलकुलध्वनिं कृ । आँतें—, मु., अतीव क्षुध् (दि. प. अ.) ।

कुलक्षण, सं. पुं. (सं. न.) अपशकुनः, दुश्चिह्नं २. कदाचारः, गर्ह्याचरणम् । वि., दुराचारिन् ।

कुलचा, सं. पुं. (फ़ा. कलीचा) सकिण्वोऽपूपः २. दे. 'पूँजी' ।

कुलटा, सं. स्त्री. (सं.) व्यभिचारिणी, पुंश्चली, बंधकी, भ्रष्टा, स्वैरिणी, निशाचरी, अपारण्डा।

कुलत्थ, सं. पुं. (सं. कुलत्था) चक्षुष्या, लोचनहिता, दृक्प्रसादा ।

कुलथी, सं. स्त्री. (सं. कुलत्थः) कालवृन्ताः (मारुपयोजः) ।

कुलफ, सं. पुं. (अ. कुफ़्ल) दे. 'ताला' ।

कुलफ़ा, सं. पुं. (फ़ा. खुर्फ़ः) बृहल्लोणी, घोलिका, शाकभेदः । २. दे. 'कुलफ़ी' ।

कुलफ़ी, सं. स्त्री. (हिं. कुलफ) धूमपान-यंत्रस्य भुग्ननाली २. हिमसन्तानीनिर्माण-पात्रम् ३. हिमसन्तानी, घनमधुरदुग्धम् ।

कुलबुलाना, क्रि. अ. (अनु. कुलबुल) दुःखात् अंगानि आक्षिप् (भ्वा प. अ.) २. अंत्राणि गंभीरं स्वन् (भ्वा. प. से.) ३. वि-सं-प्र,-सृप् (भ्वा. प. अ.) ४. व्याकुल (वि.) भू ५. दे. 'खुजलाना' ।

कुलबुलाहट, सं. स्त्री. (पूर्व.) शनैः सर्पणं, कृमिसदृशी चेष्टा २. कंडूलता, वक्षुरता ।

कुलहा, सं. पुं. (फ़ा. कुलाह) शंकाकारं शिरस्कम् ।

कुलही, सं. स्त्री. (हिं. कुलहा) शिशुशिरस्कम् , दे. 'कनटोप' ।

कुलाँच, सं. स्त्री. (तु. कुलाच) दे. 'छलाँग' ।

कुलाबा, सं. पुं. (अ.) लोहपुटः २. बडिशं, मत्स्यवेधनम् ३. द्वारसंधिः (पुं.) ४. शृङ्खलांगं, अंदूः-दुः (स्त्री.) ५. अर्गलः-लम् ६. जलमार्गः, नाली ।

कुलाल, सं. पुं. (सं.) कुम्भकारः २. वनकुक्कुटः ३. उलूकः ।

कुलिक, सं. पुं. (सं.) कलाविद् (पुं.) २. शिल्पिन् ३. कुलीनः ४. कुलपतिः ।

कुलिश, सं. पुं. (सं.) वज्रः-जं, पविः २. विद्युत् (स्त्री.) ३. कुठारः ।

कुली, सं. पुं. (तु.) भार,-वाहः-हरः, भारिकः २. कर्मक (का) रः, श्रमजीविन् ।

कुलीन, वि. (सं.) महाकुल, अभिजात, आर्य, सभ्य, सत्कुलज ।

कुलीनता, सं. स्त्री. (सं.) आभिजात्यं, आर्यता ।

कुलेल, सं. स्त्री. (सं. कल्लोलः>) क्रीडा, खेला, विहारः, केलिः (पुं. स्त्री.), विलासः, लीला ।

कुल्या, सं. स्त्री. (सं.) क्षुद्रकृत्रिमनदी २. क्षुद्रनदी ३. पयःप्रणाली ४. कुलस्त्री ।

कुल्ला, सं. पुं. (सं. कवलः>) चलुः, चलुकः चुलुकः ।

कुल्हड़, सं. पुं. (सं. कुल्हरिका) [illegible] मृत्पात्रम् ।

कुल्हाड़ा, सं. पुं. (सं. कुठारः, दे.)।

कुल्हिया, सं. स्त्री. (हिं. कुल्हड़) क्षुद्रकरकः, अतिक्षुद्रमृत्पात्रम् ।

कुवलय, सं. पुं. (सं. न.) नील,-कुमुदं-कैरवं-शशिकान्तम् २. नील,-कमलं-उत्पलम् ३. भू-मण्डलम् ।

कुवाच्य, वि. (सं.) अश्लील, अशिष्ट, अवाच्य। सं. पुं. (सं. न.) गाली, कुवचनं, अपशब्दः।

कुवेर, सं. पुं. (सं.) कुवेरः, दे.।

कुश, सं. पुं. (सं.) कुथः, दर्भः, पवित्रम् २. जलम् ३. रामपुत्रः ४. कालः।

कुशल, वि. (सं.) दक्ष, चतुर, प्रवीण, निपुण, विशारद, विचक्षण २. श्रेष्ठ, भद्र। सं. पुं. (सं. न.) सुखं, क्षेमं, मंगलम् , भद्रं, शिवम् २. कुशग्राहिन् ३. शिवः।

—क्षेम, सं. पुं. (सं. न.) सुखं, क्षेमं, मंगलम्।

कुशलता, सं. स्त्री. (सं.) पाटवं, चातुर्यं, निपुणता।

कुशा, सं. स्त्री. (सं. कुशः-शम्) दर्भः, कुथः, पवित्रं, याज्ञिकः, ह्रस्वगर्भः, बर्हिस् (पुं. न.)।

कुशाग्र, वि. (सं.) तीक्ष्ण, सूक्ष्म, तीव्र, प्रखर।

—बुद्धि, वि. (सं.) तीक्ष्णमति। सं. स्त्री., सूक्ष्म-तीव्र,-मतिः (स्त्री.)।

कुशादा, सं. पुं. (फ़ा.) विस्तृत २. आवरण-रहित।

कुशासन[1], सं. पुं. (सं. कुश + आसनम्) कुथ-विष्टरः, दर्भासनम्।

कुशासन[2], सं. पुं. (सं. कु + शासनम्) दुःशा-सनम् , कुत्सितराज्यव्यवस्था।

कुशील, वि. (सं.) दुःशील, दुर्वृत्त, दुःस्वभाव।

कुश्ता, सं. पुं. (फ़ा.-तः) धातुभस्मन् (न.)।

कुश्ती, सं. स्त्री. (फ़ा.) नियुद्धं, मल्ल-बाहु-, युद्धम्।

कुष्ठ, सं. पुं. (सं. न.) श्वित्रं, श्वेतं-त्रं, मंडलकं, दुश्चर्मन् (न.) २. दे. 'कुट[1]'।

—नाशन, सं. पुं. (सं.) वाराहीकन्दः २. गौर-सर्षपः ३. क्षीरीशवृक्षः।

कुष्ठी, वि. (सं. कुष्ठिन्) श्वित्रिन्।

कुष्माण्ड, सं. पुं. (सं.) दे. 'कुम्हड़ा'।

कुसंग, सं. पुं. (सं.) कु-दुस्,-संगतिः (स्त्री.)

कुसमय, सं. पुं. (सं.) कुकालः, अशुभसमयः २. अनवसरः, असमयः ३. विपत्कालः।

कुसाइत, सं. स्त्री. (सं. कु + अ. सायत) अशुभमुहूर्तं, अनवसरः, कुसमयः।

कुसुम्भ, सं. पुं. (सं. न.) वस्त्ररंजनं, महा-रजनम् २. दे. 'केसर'।

कुसुम्भा, सं. पुं. (सं. कुसुंभम् >) कुसुंभरागः २. अहिफेनभंगानिर्मितं मादकद्रव्यम्।

कुसुम, सं. पुं. (सं. न.) पुष्पं, प्रसूनं, सुमं, सूनं, मणीवकं, सुमनसः (स्त्री., केवल बहु.) २. लघुवाक्यमयं गद्यम् ३. स्त्रीरजस् (न.)।

—पुर, सं. पुं. (सं. न.) पाटलिपुत्रम्।

—बाण, सं. पुं. (सं.) कामदेवः।

कुसुमांजलि, सं. स्त्री. (सं. पुं.) पुष्पांजलिः।

कुसुमित, वि. (सं.) पुष्पित, उत्फुल्ल, फुल्लित।

कुसूर, सं. पुं. (अ.) अपराधः, स्खलितम्।

—वार, वि. अपराधिन् , दोषिन्।

कुहक, सं. पुं. (सं. न.) माया, अभिचारः, इन्द्रजालम् २. ऐन्द्रजालिकः ३. वंचकः।

कुहकना, क्रि. अ. (अनु. कुहू) कुहूरवं कृ, कूज् (भ्वा. प. से.)।

कुहनी, सं. स्त्री. (सं. कफोणिः पुं.) कफणिः (पुं. स्त्री.), कफणी, कु (कू) र्परः।

कुहर, सं. पुं. (सं. न.) छिद्रं, विवरं, बिलं, रन्ध्रम्।

कुहरा, सं. पुं. (सं. कुहेडी) तुषारः, खवाष्पः, धूमिका, कुहेडिका, कुज्झटिका।

कुहराम, सं. पुं. (अ. कहर + आम) विलापः, आक्रन्दनं, परिदेवना २. संकुलं, तुमुलम्।

कुही, सं. स्त्री. (सं. कुधिः) श्येनः, खगान्तकः, शशादनः, कपोतारिः।

कुहुक, पुं., दे. कुहू(२)।

कुहुकना, क्रि. अ., दे. 'कुहकना'।

कुहू, सं. स्त्री. (सं.) अमावस्या २. कोकिल-मयूर,-आलापः।

कूँचा, सं. पुं. (सं. कूर्चम्) शोधनी, संमार्जनी, कूर्चकम्।

कूँची, सं. स्त्री. (हिं. कूँचा) लघु-क्षुद्र,-शोधनी-कूर्चम् २. लोममयी मार्जनी ३. तूलिका, वर्ण,-तूली-तूलिका।

कूँज, सं. पुं. (सं. क्रुंचः-चा) क्रौंचः-चा, कलिकः, कालिकः ।

कूँड, सं. पुं. (सं. कुंडम्) सेचनं-नी २. सीता, हलरेखा ३. दे. 'खोद' ।

कूँड़ा, सं. पुं. (सं. कुंडम्), (जलार्थं) बृहन्मृत्पात्रम् २. द्रोणी-णिः (स्त्री.) ३. कुसुमपात्रम् ।

कूँड़ी, सं. स्त्री. (हिं. कूँड़ा) लघुपाषाणद्रोणी-णिः (स्त्री.) २. पाषाणचषकः-कम् ।

कूक, सं. स्त्री. (अनु.) कोकिलकूजितम् २. केका, मयूरध्वनिः ३. दीर्घमधुरध्वनिः ।

कूकना, क्रि. अ. (हिं. कूक) कूज् (भ्वा. प. से.), कुहूरवं कृ, केकां कृ ।

कूकर, सं. पुं. (सं. कुक्कुरः दे.) ।

कूच, सं. पुं. (तु.) प्रस्थानं, प्रयाणं, अपक्रमः २. कटकत्यागः ३. यात्रा ।

—करना, क्रि. अ., प्रस्था (भ्वा. आ. अ.), प्रया (अ. प. अ.) ।

कूचा, सं. पुं. (फ़ा. चः) वीथी, दे. 'गली' ।

कूजन, सं. पुं. (सं. न.) कूजितं, कलरवः, खगध्वनिः, विरुतं, गुंजनम् ।

कूजना, क्रि. अ. (सं. कूजनम्) कूज् (भ्वा. प. से.), कु (अ. प. अ.), वि,-रु (अ. प. से.) २. गुंज् (भ्वा. प. से.), हुं कृ ।

कूजा, सं. पुं. (फ़ा.) सनालीकः करकः ।

—मिसरी, सं. स्त्री., अर्द्धगोलाकारा घनीकृता सिता ।

कूजित, वि. (सं.) ध्वनित, स्वनित, गुञ्जित, शंकृत, कलरवपूर्ण ।

कूट[1], सं. पुं. (सं. न.) छलं, कपटः-टं, माया, वञ्चना, प्रतारणा २. असत्यं ३. शृंगं, विषाणम् ४. उच्चशिखरम् ५. राशिः ६. गूढार्थवार्ता, सनिंदः उपालम्भः ७. प्रहेलिका, गूढप्रश्नः ८. लोहमुद्गरः ९. हरिणजालम् १०. प्रच्छन्नवैरम् ११. नगरद्वारम् १२. भग्नशृंगो वृषभः ।

वि., असत्यवादिन् २. प्रवञ्चक ३. कृत्रिम ४. श्रेष्ठ ५. निश्चल ।

—नीति, सं. स्त्री. (सं.) दौत्यकर्मन् (न.)

—युद्ध, सं. पुं. (सं. न.) कपटसंग्रामः ।

—योजना, सं. स्त्री. (सं.) कुचक्रम् ।

—साक्षी, सं. पुं. (सं.-क्षिन्) मिथ्यासाक्षिन् ।

कूट[2], सं. स्त्री. (हिं. काटना वा कूटना) कर्तनं, कृन्तनम् २. ताडनं, कुट्टनम् ।

कूटना, क्रि. स. (सं. कुट्टनम्) कुट्ट-चूर्ण्-खंड् (चु.), पिष् (रु. प. अ.) २. प्रबलं तड् (चु.) ।

सं. पुं. तथा भाव, कुट्टनं, चूर्णनं, खण्डनम्, पेषणम् २. ताडनं, प्रहरणम् ।

—योग्य, वि., कुट्टनीय, चूर्णयितव्य ।

—वाला, सं. पुं. कुट्टकः, पेषकः, ताडयितृ ।

कूटा हुआ, वि., कुट्टित, पिष्ट, ताडित ।

कूटस्थ, वि. (सं.) शिखरस्थ २. निश्चल ३. नित्य ४. गूढ ।

कूड़ा, सं. पुं. (सं. कूटः = राशि >) अवस्करः, उच्छिष्टं, मलं, निस्सारवस्तुसमूहः ।

—करकट, सं. पुं., दे. 'कूड़ा' ।

कूद, सं. स्त्री. (हिं. 'कूदना') प्लवः, उत्-, प्लुतिः (स्त्री.), प्लवनं, झंपः-पा, वल्गनं, उत्प्लवः ।

—फाँद, सं. स्त्री. कूर्दनप्लवनं, झंपवल्गितम् ।

कूदना, क्रि. अ. (सं. कूर्दनम्) कुर्द् (भ्वा. आ. से.), उत्प्लु (भ्वा. आ. अ.), वल्ग् (भ्वा. प. से.) २. प्र-,मुद् (भ्वा. आ. से.) ।

सं. पुं., दे. 'कूद' ।

—फाँदना, क्रि. अ., इतस्ततः वल्ग् । २. व्यायामं कृ ।

कूप, सं. पुं. (सं.) दे. 'कुआँ' २. छिद्रं, रंध्रम् ।

—मंडूक, सं. पुं. (सं.) व्यवहारानभिज्ञः, अपक्वबुद्धिः, अल्पदर्शिन् । २. अंधुभेकः ।

कूबड़, सं. पुं. (सं. कूबरः >) ककुदः-दम् ।

कूर, वि. (स. क्रूर) निर्दय, निर्घृण, नृशंस २. भयंकर ३. दुष्ट ४. अलस ५. मूर्ख ६. कुलक्षण ।

कूर्म, सं. पुं. (सं.) कच्छपः, दे. 'कछुआ' २. विष्णोः कच्छपावतारः ३. पृथिवी ४-७. ऋषि-प्राण-नाडी-आसन,-विशेषः ।

कूल, सं. पुं. (सं. न.) तटः-टी-टं, तीरम् २. समीपे, निकटे ३. कुल्या ४. सरस् (न.) ।

कूल्हा, सं. पुं. (सं. क्रोडम् >) नितंबास्थि (न.) ।

कूष्मांड, सं. पुं. (सं.) दे. 'कुम्हड़ा') ।

कृच्छ्र, सं. पुं. (सं. न.) दुःखं, कष्टम् २. पापम् ३. मूत्रकृच्छ्ररोगः ४. व्रतभेदः। वि., दुष्कर, दुस्साध्य।

कृत, वि. (सं.) विहित, अनुष्ठित, रचित, संपादित, निर्मित। सं. पुं. सत्ययुगम् २. चतुर् इति संख्या।

—कार्य, वि. (सं.) सफल, सिद्धार्थ।

—कृत्य, आप्तकाम, सफलमनोरथ।

—युग, सं. पुं. (सं. न.) सत्ययुगम्।

—विद्य, वि. (सं.) विद्वस्, पंडित, बहुश्रुत।

कृतघ्न, वि. (सं.) कृतज्ञतारहित, अकृतवेदिन्।

कृतघ्नता, सं. स्त्री. (सं.) अकृतवेदिता, उपकारविस्मरणम्, कृतज्ञताराहित्यम्।

कृतज्ञ, वि. (सं.) उपकारज्ञ, कृतविद्, कृतवेदिन्।

कृतज्ञता, सं. स्त्री. (सं.) उपकारज्ञता, उपकारस्मरणं, कृतवेदित्वम्।

कृताञ्जलि, वि. (सं.) बद्धांजलि, बद्धकर।

कृतांत, सं. पुं. (सं.) मृत्युः २. यमः ३. पापम् ४. देवता ५. पूर्वजन्मकर्मफलम् ६. सिद्धान्तः ७. शनैश्चरवारः।

कृतार्थ, वि. (सं.) पूर्णकाम, दे. 'कृतकार्य' २. संतुष्ट ३. निपुण ४. मुक्त।

कृति, सं. स्त्री. (सं.) चेष्टा, क्रिया २. कर्मन् (न.), कार्यम् ३. इन्द्रजालम्, माया ४. रचना, ग्रंथः ७. प्रहारः ८. क्षतिः (स्त्री.)।

कृती, वि. (सं. कृतिन्) कुशल, दक्ष, पटु २. पुण्यात्मन्, शुचिव्रत।

कृत्ति, सं. स्त्री. (सं.) मृगचर्मन् (न.) २. त्वच् (स्त्री.) ३. भूर्जः ४. दे. 'कृत्तिका'।

—वासा, सं. पुं. (सं.-वासस्) शिवः।

कृत्तिका, सं. स्त्री. (सं.) बहुला, अग्निदेवा, नक्षत्रविशेषः।

कृत्य, सं. पुं. (सं. न.) अनुष्ठेयं, कर्तव्यं, विधेयं, धर्मः, आवश्यकं कार्यम् २. कर्मन् (न.)।

कृत्रिम, वि. (सं.) कृतक, अनैसर्गिक।

कृदन्त, सं. पुं. (सं.) कृत्प्रत्ययान्तशब्दः (उ. पाचक, भोक्तृ इ.) २. कृत्प्रत्ययविषयकं व्याकरणप्रकरणम्।

कृपण, वि. (सं.) कदर्य, दे. 'कंजूस' २. क्षुद्र।

कृपणता, सं. स्त्री. (सं.) कदर्यता, दे. 'कंजूसी'।

कृपया, क्रि. वि. (सं.) सदयं, सकृपं, सानुकंपं, सानुग्रहम्।

कृपा, सं. स्त्री. (सं.) करुणा, दया, अनुग्रहः, प्रसादः, उपकारः, अनुकंपा २. क्षमा, मर्षणम्।

—निधान, सं. पुं. (सं. न.) दयानिधिः। वि., अत्यन्तकृपालु।

—पात्र, सं. पुं. (सं. न.) प्रसादभाजनं, अनुग्राह्यः, दयार्हः।

—सिंधु, सं. पुं. (सं.) दयासागरः, अतिदयालुः।

कृपाण, सं. पुं. (सं.) खड्गः, असिः २. दे. 'कटार' ३. दंडकवृत्तभेदः (छन्द.)।

कृपालु, वि. (सं.) दयालु, कारुणिक, कृपामय।

कृपालुता, सं. स्त्री. (सं.) दयालुता, कारुणिकता।

कृमि, सं. पुं. (सं.) कीटः, नीलांगः, क्रिमिः (पुं.) २. लाक्षा।

—कोश, सं. पुं. (सं.) पट्टकीट,-कोषः-गृहं।

—नाशक, वि. (सं.) कृमिघ्न, कृमिहर।

कृमिज, सं. पुं. (सं. न.) अगुरु (न.), राजार्हं २. कौशेयं ३. दे. 'हिरमिज़ी'।

कृमिजा, सं. स्त्री. (सं.) कीटजा, लाक्षा।

कृमिल, वि. (सं.) कृमिकुल,-चित-पूर्ण, कृमिमय।

कृमिला, सं. स्त्री. (सं.) बहुप्रसूः (स्त्री.), बहुप्रजा।

कृश, वि. (सं.) क्षीण, क्षाम, तन्वंग-कृशांग (-गी स्त्री.), प्र-,तनु, दुर्बल २. अल्प, स्तोक, क्षुद्र, सूक्ष्म, अणु, लघु।

कृशता, सं. स्त्री. (सं.) क्षीणता, क्षामता, दुर्बलता २. अल्पता, सूक्ष्मता।

कृशांगी, सं. स्त्री. (सं.) तन्वंगी, क्षीणांगी, तन्वी।

कृशानु, सं. पुं. (सं.) अनलः, अग्नि (पुं.) २. चित्रकः।

कृशोदरी, वि. स्त्री. (सं.) तनु-क्षीण,-मध्या-मध्यमा।

कृषक, सं. पुं. (सं.) कृषीवलः, कृषिकः, कृपाणः।

कृषि, सं. स्त्री. (सं.) कर्षणं, हलभृतिः (स्त्री.)।

कृष्ण, सं. पुं. (सं.) वासुदेवः, केशवः, चक्रपाणिः (पुं.), चक्रिन् (पुं.), जनार्दनः, पीतां-

वरः, माधवः, मधुसूदनः, हृषीकेशः, गोपालः, गोवर्धनधारिन् (पुं.), गोविंदः, दामोदरः, मुरारिः (पुं.), राधारमणः। २. कोकिलः ३. काकः ४. कृष्णपक्षः। वि., काल, असित, २. नील, मेचक, श्याम ३. तिमिर, निष्प्रभ।

—जटा, सं. स्त्री. (सं.) जटामांसी, सुगन्धितमूलभेदः।

—जीरक, सं. पुं. (सं.) कृष्णा, काला, बहुगन्धा।

—द्वैपायन, सं. पुं. (सं.) वेदव्यासः, महाभारतकारः।

—पक्ष, सं. पुं. (सं.) असितपक्षः, प्रतिपदाद्यमावस्यान्तानि पंचदश दिनानि।

—लवण, सं. पुं. (सं. न.) रुचकं, अक्षं, सौवर्चलं।

—लोह, सं. पुं. (सं. न.) अयस्कांतः, चुंबकः।

—शार, —सारंग, —सार, सं. पुं. (सं.) मृगभेदः।

कृष्णता, सं. स्त्री. (सं.) कृष्णिमन् (पुं.), कालिमन् (पुं.), नीलत्वं, श्यामत्वं।

कृष्णा, सं. स्त्री. (सं.) द्रौपदी, पांचाली २. कालीदेवी ३. दक्षिणदेशे नदीविशेषः ४. कृष्णजीरकः ५. कृष्णद्राक्षा ६. नयनतारा।

कृष्णाष्टमी, सं. स्त्री. (सं.) श्रीकृष्णजन्मदिवसः, जन्माष्टमी, भाद्रमासस्य कृष्णपक्षस्याष्टमी तिथिः।

कृष्य, वि. (सं.) कर्षणीय, कृषियोग्य।

केंचुआ, सं. पुं. (सं. किंचुलुकः) महीलता, गंडूपदः, किंचिलिकः।

केंचुल, सं. स्त्री. (सं. कंचुकः) निर्मोकः, अहि-भुजंग-सर्प,-त्वच् (स्त्री.)।

केंचुली, वि. (हिं. केंचुल) कंचुक,-सदृश-तुल्य। सं. स्त्री. दे. 'केंचुल'।

केंद्र, सं. पुं. (सं. न.) मध्यः-ध्यं, मध्यभागः २. उदरं, गर्भः ३. मुख्य-प्रमुख,-स्थानम्।

केंद्री, वि. (सं. केन्द्र>) मध्यग, मध्यस्थ, मध्य,-गत-वर्तिन्, मध्य. केन्द्रीय।

केन्सर, सं. पुं. (अं.) कर्कट-कर्कटिका,-रोगः, कर्कस्फोटः।

के, प्रत्य. (हिं. का) दे. 'का'।

केकड़ा, सं. पुं. (सं. कर्कटः) कर्कटकः, कुलीरः।

केकय, सं. पुं. (सं.) १. वर्तमानकाश्मीरांतर्गतप्रदेशविशेषः २. दशरथश्वशुरः।

केकयी, सं. स्त्री. (सं. कैकेयी)।

केका, सं. स्त्री. (सं.) मयूरवाणी।

केकी, सं. पुं. (सं.-किन्) मयूरः, शिखिन्।

केत, सं. पुं. (सं.) भवनं, गृहं २. स्थानं ३. ध्वजः, केतनं ४. बुद्धिः (स्त्री.) ५. संकल्पः ६. मंत्रणा ७. अन्नम्।

केतक[1], सं. पुं. (सं.) केतकीवृक्षः २. तत्पुष्पं।

केतक[2], वि. (सं. कति + एक) दे. 'कितने', 'कितना', 'बहुत'।

केतकी, सं. स्त्री. (सं.) सूचीपुष्पः, केतकः, क्रकचच्छदः, विफला, क्रकचा, गंधपुष्पा।

केतन, सं. पुं (सं. न.) भवनं, गृहम् २. स्थानं ३. चिन्ह ४. ध्वजः ५. निमंत्रणं, आह्वानम्।

केतली, सं. स्त्री. (अं. केटल) उखा, स्थाली, लौहा, लौहभूः (स्त्री.)।

केतु, सं. पुं. (सं.) ग्रहविशेषः २. उल्का, उत्पातः ३. ज्ञानं ४. दीप्तिः (स्त्री.) ५. ध्वजः ६. चिह्नम् ७. राक्षसविशेषस्य कबंधः।

—तारा, सं. पुं. (सं. स्त्री.) धूमकेतुः (पुं.), उल्का।

—मान्, वि. (सं.-मत्) तेजस्विन् २. ध्वजिन् ३. बुधः।

—माल, सं. पुं. (सं. न.) जंबुद्वीपस्य नवखंडांतर्गतखंडविशेषः।

—रत्न, सं. पुं. (सं. न.) वैदूर्यमणिः (पुं.)।

केथीटर, सं. पुं. (अं.) मूत्रशलाका।

केलसियम, सं. पुं. (अं.) चूर्णातु (न.), खटिकम्।

केदार, सं. पुं. (सं.) व्रीहिक्षेत्रं २. हिमालये तीर्थविशेषः ३. आलवालं ४. मेघरागपुत्रः ५. सपुष्पः क्षेत्रभागः।

केन, सं. पुं. (सं. 'किं' का तृतीया एकवचन) उपनिषद्विशेषः।

केमरा, सं. पुं. (अं.) छायाचित्रपेटिका।

केमिस्ट्री, सं. स्त्री. (अं.) रसायनम्।

केयूर, सं. पुं. (सं. पुं. न.) अंगदः-दं, वलयः-यं।

केराना, सं. पुं. दे. 'किराना'।

केरानी, सं. पुं. (अं. क्रिश्चियन>) भारोपायः २. लेखकः, कायस्थः, लिपिकारः।

केराया, सं. पुं. दे. 'किराया'।
किराये की गाड़ी, सं. स्त्री., पण्य-साधारण,-वाहनं-रथः।

केला, सं. पुं. (स. कदलः), (वृक्ष) कदली, रंभा, मोचा, काष्ठीला, सकृत्फला, गुच्छफला, निःसारा, ऊरुस्तभा, मो(रो, लो)चकः, वारणवल्लभा। (फल) कदलीफलं, मोचं इ.।

केलि, सं. स्त्री. (सं.) क्रीडा, खेला २. रतिः (स्त्री.), मैथुनं ३. नर्मन् (न.), परि (रा) हासः ४. पृथिवी।
—कला, सं. स्त्री. शारदावीणा २. रतिविज्ञानं।

केलोरी, सं. स्त्री. (अं.) उषम्।

केवट, सं. पुं. (सं. कैवर्तः) नाविकः, पोतवाहः, औडुपिकः २. धीवरः, कैवर्तः, जालिकः, मत्स्याजीवः।

केवटी, सं. स्त्री. (हि. केवट) मिश्रद्विदलं, वैदलसंकरः।

केवड़ा, सं. पुं. (सं. केविका) केवी, कविका, भृङ्गारिः (पुं.), महागंधा, नृपवल्लभा २. केवीपुष्पं इ. ३. महागंधासवः।

केवल, वि. (सं.) एक, अद्वितीय २. विशुद्ध ३. श्रेष्ठ। क्रि. वि.,-एव, केवलं,-मात्र (समासांत में) २. सामस्त्येन, संपूर्णतया।

केवली, सं. पुं. (सं.-लिन्) मोक्षाधिकारी साधुः २. तीर्थंकरः (जैन.)।

केवाँच, सं. स्त्री. (सं. कच्छुः>), (लता) कपिकच्छूः (स्त्री.) स्व-आत्म,-गुप्ता, कंडूरा, मर्कटी २. (फली) कपिकच्छू,-बीजकोशः-शिंबी।

केवाड़, सं. पुं., दे. 'किवाड़'।

केश, सं. पुं. (सं.) वालः, कचः, कुन्तलः, चिकुरः, शिरोरुहः, शिरसिजः, मूर्द्धजः, वृजिनः २. किरणः ३. वरुणः ४. विष्णुः ५. सूर्यः ६. विश्वं (७-८) अश्व-सिंह,-स्कंधकेशः।
—कर्म, सं. पुं., केशकर्मन् (न.), केश,-विन्यासः-प्रसाधनम्।
—कलाप,-पाश, सं. पुं (सं.) प्रसाधितकेशाः, अलकः, कुरलः।
—प्रसाधनी, सं. स्त्री. } कंकतिका, दे. 'कंघी'।
—मार्जक, सं. पुं. }
—विन्यास, सं. पुं (सं.) दे. 'केशकर्म'।

केशरी, सं. पुं. (सं.-रिन्) सिंहः, मृगेन्द्रः २. घोटकः (३-४) पुन्नाग-नागकेशर,-वृक्षः।

केशाकेशी, सं. स्त्री. [सं.-शि(न.)] अन्योऽन्य-केशग्रहणपूर्वकप्रवृत्तं युद्धं।

केशिनी, सं. स्त्री. (सं.) सुकेशी-शा, सुकची-चा।

केशी, सं. पुं. (सं. केशिन्) सिंहः २. घोटकः २. सुकेशः (पुरुषः) ३. राक्षसविशेषः।

केस[1], सं. पुं., दे. 'केश'।

केस[2], सं. पुं. (अं.) व्यवहारपदं, कार्यं २. दुर्घटना ३. कोषः, पुटः।

केसर, सं. पुं. (सं. पुं. न.) काश्मीर्यं, काश्मीरज, कुंकुमं, अग्निशिखं, वरं, वाह्लि(ह्ली)कं, पीतनं, गौरं, रक्तं, लोहितचन्दन, वर्ण्यं, संकोचं, धीरं, घस्रं, घुसृणं, घोरन् २. नागकेशरवृक्षः ३. अश्व-सिंह,-स्कन्धवालाः ४. स्वर्गः।

केसरिया, वि. (सं. केसरं>) घनपीत, कुंकुमवर्ण।
—बाना, सं. पुं., कुंकुमवर्ण-घनपीत,-वेशः-वेषः।

केसरी, सं. पुं. (सं.-रिन्) दे. 'केशरी'।

केसू, सं. पुं. (सं. किंशुकः) पलाशः, रक्तपुष्पकः।

केहा, सं. पुं. (सं. केका>) मयूरः, दे. 'मोर'।

केहरी, सं. पुं. (सं. केशरिन्) सिंहः २. अश्वः।

कैंची, सं. स्त्री. (तु.) दे. 'कतरनी'।
—करना, मु., अग्राणि निकृत् (तु. प. से.)-लू (क्र्. उ. से.)-अवच्छिद् (रु. प. अ.)
—सी जबान चलना, मु., शीघ्रं-सत्वरं-वेगेन वद् (भ्वा. प. से.)-भाष् (भ्वा. आ. से.)

कैंचुली, सं. स्त्री., दे. 'केंचुली'।

कै, वि. (सं. कति) दे. 'कितने', 'कितनी'। अव्य., वा, अथवा, यद्वा २. अन्यतर।
—दफ़ा,-बार,-बेर, कतिकृत्वः (अव्य.), कतिवारं।

क़ै, सं. स्त्री. (अ.) वांतं, वमनोद्गारः २. वमनं, वमः, वमिः (स्त्री.), प्रच्छर्दिका, वमथुः (पुं.)।
—आना, क्रि. अ., वमनेच्छया पीड् (कर्म.), विवमिषति (सन्नन्त.)।
—करना, क्रि. स. उद्,-वम् (भ्वा. प. से.) छर्द् (चु.), उत्क्षिप् (तु. प. अ.), उद्गॄ (तु. प. से.)।

कैतव, सं. पुं. (सं. न.) छलं, कपटं, वंचनं २. द्यूतं ३. वैदूर्यमणिः (पुं.) ४. धुस्तूरः। वि., छलिन् , कापटिक २. शठ, धूर्त ३. अक्ष-देविन् , कितव, (-वी. स्त्री.)।

कैथ-था, सं. पुं. (सं. कपित्थः) दधित्थः, मन्मथः, दधि-पुष्प-कुच-गन्ध-दन्त,-फलः।

क़ैद, सं. स्त्री. (अ.) वन्धनं, निग्रहः, निरोधः २. कारा,-निरोधः-बन्धनं-प्रवेशः-वासः, वंदी-करणं, प्रग्रहः, आसेधः ३. नियमः, समयः, प्रतिज्ञा, संकेतः।

—करना, क्रि. स., कारागृहे निक्षिप् (तु. प. अ.)-बन्ध्(क्र्. प. अ.)-निरुध्(रु. उ. अ.), वन्दीग्राहं ग्रह् (क्र. प. से.), वंदीकृ।

—होना, क्रि. अ., कारायां निक्षिप्-बन्ध् निरुध्-वन्दीकृ (सब कर्म.)।

—खाना, सं. पुं. (फ़ा.) कारा, कारागारः-रं, कारावासः, वन्दि,-शाला-गृहं, बन्धनालयः, चारः, चारकः, गुप्तिस्थानं।

—तनहाई, स. स्त्री. (अ+फ़ा.) एकांत-विजन-निभृत,-आसेधः।

—महज़, सं. स्त्री. (अ.) सरल-सुगम,-प्रग्रहः-आसेधः।

—सख़्त, सं. स्त्री. (अ.+फ़ा.) विषम-दुःसह,-आसेधः, इ.।

क़ैदी, सं. पुं. (अ.) वंदी-दिः (स्त्री.), वन्दिन् (पुं.), कारागुप्तः, ग्रहकः, प्रग्रहः, रुद्धः।

कैफ़ियत, सं. स्त्री. (अ.) अवस्था, स्थितिः (स्त्री.), दशा २. विवरणं, वर्णनं ३. आश्चर्यो-त्पादकघटना।

करव, सं. पुं. (सं. न.) कुमुदं २. सितोत्पलं, श्वेतकमलं। (सं. पुं.) कितवः २. शत्रुः।

कैरी, सं. स्त्री. (देश.) दे. 'अँबिया'।

—आंख, सं. स्त्री., कपिल-पिंगल,-नयनं-नेत्रं।

कैलास, सं. पुं. (सं.) पर्वतविशेषः, शिव-कुवेर,-निवासः।

—नाथ, पति, सं. पुं. (सं.) शिवः।

—वास, सं. पुं. (सं.) मृत्युः।

कैवर्त, सं. पुं. (सं.) दे. 'केवट'।

कैवल्य, सं. पुं. (सं. न.) एकत्वं, असंसृष्टता २. अपवर्गः, मुक्तिः (स्त्री.) ३. उपनिषद्विशेषः।

क़ैसर, सं. पुं. (लै० सीज़र) सम्राज् , राजाधि-राजः, अधिराजः, अधीश्वरः।

कैसा, वि. (सं. कीदृश) कीदृक्ष, किंरूप, किंविध, किमाकार।

कैसी, वि. स्त्री. (सं. कीदृशी) कीदृक्षी, किंरूपा, किमाकारा, किंविधा।

कैसे, क्रि. वि. (हिं. कैसा) कथं, केन प्रकारेण, कया रीत्या।

कोंकण, सं. पुं. (सं.) दक्षिणदिशि प्रान्तविशेषः।

कोंपल, सं. स्त्री. (सं. कोमल >) पल्लवः-वं, अंकुरः, प्ररोहः, किस (श) लयः-यं, उद्भिद् (पुं.), उद्भिज्जः।

—निकलना या फूटना, क्रि. अ., प्ररुह् (भ्वा. प. अ.), स्फुट् (तु. प. से.), उद्भिद् (कर्म.) फुल्ल्-विकस् (भ्वा. प. से.)।

को, प्रत्य. (यह कर्म और संप्रदान कारक का प्रत्यय है, इसका अनुवाद प्रायः द्वितीया और चतुर्थी के रूपों से होता है। (राम को कह= उ., रामं ब्रूहि, ब्राह्मण को दे = विप्राय देहि)।

कोआ, सं. पुं. (सं. कोशः-षः), (पट्टकीट-) कोशः-षः २. दे. 'कोया'। ३. पनसखंडः-डं ४. दे. 'महुआ' (फल)।

कोई, सर्व (सं. कोऽपि) कश्चन, कश्चित् (पुं.), का,-अपि-चन-चित् (स्त्री.) किं,-अपि-चन-चित् (न.)।

—कोई, वि. स्तोकाः, कतिपयाः, परिमिताः।

—चीज़, सं. स्त्री., किमपि (वस्तु)।

—दम में, क्रि. वि., सपद्येव, तत्काले, झटिति, द्राक् (सब अव्य.)।

—दम का मेहमान, सं. पुं., मुमूर्षु, आसन्न,-मरण-मृत्यु, मरणाभिमुख, मरणोन्मुख।

—न कोई, एष वा परो वा, यः कश्चिदपि, कश्चित्तु।

—नहीं, न कोपि-कापि किंचिदपि इ.।

कोक[1], सं. पुं. (सं.) चक्रवाकः, द्वन्द्वचरः, रथांगः, चक्रः २. मंडूकः ३. विष्णुः (पुं.) ४. वृकः ५. खजरीवृक्षः। [कोकी (स्त्री.), चक्रवाकी, रथांगी इ.]।

कोक[2], सं. पुं. (अं.) न्यङ्गारः।

—शास्त्र, सं. पुं. (सं. न.) कोकपंडितरचित रतिविज्ञानग्रन्थः।

साफ्ट-, सं. पुं., मृदुन्यङ्गारः।
हार्ड-, सं. पुं, दृढन्यङ्गारः।
कोकनद, सं. पुं. (सं. न.) रक्तोत्पलं २. रक्त-कुमुदम्।
कोकनी, वि. (देश.) क्षुद्र, लघु।
कोका, सं. पुं. (अं.) वृक्षभेदः।
कोका, सं. पुं. स्त्री. (तु.) धात्री-उपमातृ,-पुत्रः-पुत्री, धात्रेयः-यी।
—बेली,-बेरी, सं. स्त्री. (सं. कोकनदं + हिं. बेली) नीलकुमुदं।
कोकाह, सं. पुं. (सं.) कर्कः, श्वेतघोटकः।
कोकिल, सं. स्त्री. (सं. पुं.) पिकः, पर, भृतः-पुष्टः, कालः, गन्धर्वः, मधुगायनः, कलकंठः, कुहूरवः, काकलीरवः, वसन्तदूतः, वनप्रियः, ताम्राक्षः। दे. 'कोकिला'।
—बैनी, वि. स्त्री. (सं. + हिं.) सुकंठी, मधुर-भाषिणी।
कोकिला, सं. स्त्री. (सं.) मदनशलाका, पर,-भृता-पुष्टा, वनप्रिया, कलकंठी, ताम्राक्षी, वसंत-दूती।
कोको, सं. स्त्री. (अनु.) काकः, वायसः २. काल्पनिकभयहेतुः (पुं.)।
कोख, सं. स्त्री. (सं. कुक्षिः) गर्भाशयः, गर्भ-कोशः-षः।
—जली,-बन्द, वि., वंध्या, सन्तानहीना।
—की आँच, सं. स्त्री., अपत्यप्रेमन् (पुं.), वात्सल्यं, सन्ततिस्नेहः।
—मारी जाना, मु., च्युतगर्भा भू, गर्भः पत् (भ्वा. प. से.)-च्यु (भ्वा. आ. अ.)।
—खुलना, मु. सन्तानः उत्पद् (दि. आ. अ.)
क़ोचना, क्रि. स., दे. 'चुभाना', 'धँसाना'।
कोचबक्स, सं. पुं. (अं.कोचबॉक्स) सूतासनं।
कोचवान, सं. पुं. (अं. कोच >) सारथिः (पुं.), सूतः, वाहकः।
कोजागर, सं. पुं. (सं.) आश्विनी-द्यूत,-पूर्णिमा, कौमुदी, शारदी, शरत्पर्वन् (न.)।
कोट[1]**,** सं. पुं. (सं.) दुर्गं २. प्राचीरं ३. राज-प्रासादः।
—पाल, सं. पुं., कोटपालः, दुर्गाध्यक्षः।
कोट[2]**,** सं. पुं. (अं.) प्रावारः-रकः, कंचुकः।
कोटर, सं. पुं. (सं. पुं. न.) निष्कुहः, तरु-विवरं, प्रान्तरं २. कोटरावणं, रक्षार्थं कृत्रिमवनं।
कोटि, सं. स्त्री. (सं.) शतलक्षसंख्या, दे. 'करोड़' २. धनुरग्रं ३. अस्त्रादेः कोणः ४. वर्गः, श्रेणी।
कोटिक, वि. (सं. कोटिः स्त्री.) कोटी-टिः (स्त्री.) लक्षशतकं २. असंख्य, अगणित। सं. स्त्री., उक्ता संख्या तदंकाश्च।
कोटिशः, क्रि. वि. (सं.) बहुधा,-बहुधा २. अनेक-कोटिवारं। वि., बहुसंख्याक, अनेक।
कोठरी-ड़ी, सं. स्त्री. (हिं. कोठा) लघु-क्षुद्र,-कोष्ठः-शाला, अन्तःकोष्ठः, गर्भागारं।
कोठा, सं. पुं. (सं. कोष्ठः) गृहं, सदनं, आ-नि,-वासः, वेश्मन्-सद्मन् (न.) २. प्र-,कोष्ठः, शाला ३. पण्यागारं, पण्याधानं ४. धान्यागारं, कुशूलः ५. चन्द्रशाला, अट्टालिका ६. पटलं, छदिस् (स्त्री.) ७. उदरं ८. आमाशयः ९. अंत्राणि (न. बहु.) १०. निम्नागारं ११. पत्रभागः १२. गर्भाशयः।
—बिगड़ना, मु. अजीर्णरोगेण पीड् (कर्म.)
कोठार, सं. पुं. (हिं. कोठा) दे. 'भंडार'।
कोठरी, सं. पुं. (हिं. कोठा) दे. 'भंडारी'।
कोठी, सं. स्त्री. (हिं. कोठा) भवनं, गृहं, हर्म्यं २. एकभूमिकं हर्म्यं ३. पण्य,-आगारं-आधानं ४. धान्यागारं ५. भांडारं, कोषः ६. वणिग्जनसमवायः ७. बृहदापणः, महती विक्रयशाला ८. गर्भाशयः ९. गुलिकाक्षेपण्या-माग्नेयचूर्णाधानं १०. मृण्मयं बृहद्धान्यपात्रं ११. लोहमयं ताम्रमयं वा बृहज्जलपात्रं।
—वाल, सं. पुं., श्रेष्ठिन् (पुं.), वाणिजश्रेष्ठः।
कोड़ना, क्रि. स., दे. 'खोदना'।
कोड़ा, सं. पुं. (सं. कवरं >) प्रतोदः, कषा-शा, प्रतिष्कषः-शः, ताडनरज्जुः (स्त्री.)।
—मारना, क्रि. स., कशया प्रतोदेन वा प्रहृ (भ्वा. प. अ.)-तड्-चुद्-दंड् (सब चु.)-आहन् (अ. प. अ.)।
कोड़ी, सं. स्त्री. (अं. स्कोर) विंशतिः (स्त्री.), विंशतिवस्तुसमुदायः।
कोढ़, स. पुं., दे. 'कुष्ठ'।
—में खाज निकलना, मु., रन्ध्रोपनिपातिनोऽनर्थाः, छिद्रेष्वनर्था बहुलीभवन्ति, गण्डे स्फोटकसंजननम्।

कोढ़ी, वि., दे. 'कुष्ठी'।
कोण, सं. पुं. (सं.) दे. 'कोना'।
कोतल, सं. पुं. (फ़ा.) दर्शनीयघोटकः २. राजाश्वः।
कोतवाल, सं. पुं. (सं. कोटपालः) पुररक्षकः।
कोतवाली, सं. स्त्री. (हिं. कोतवाल) कोट-पाल-पुररक्षक,-कार्यालयः।
कोताही, सं. स्त्री. (फ़ा.) त्रुटिः (स्त्री.), न्यूनता २. प्रमादः।
कोथला, सं. पुं. (हिं. गूथल) बृहत्,-पुटः-कोषः-प्रसेवः २. आमाशयः।
—भरना, मु. उदरं पूर् (चु.)।
कोदंड, सं. पुं. (सं. न.) धनुस् (न.)।
(सं. पुं.) भ्रूः (स्त्री.) २. देशविशेषः।
कोदो-दों, सं. पुं. (सं. कोद्रवः) कोरदूषः, कुद्रवः, कुद्दालः।
कोन, सं. पुं., दे. 'कोना'।
कोना, सं. पुं. (सं. कोणः) अस्रः २. कोटिः-अश्रिः-पालिः (स्त्री.) ३. निभृतस्थानं ४. चतुर्थ-भागः।
—दार, वि., अस्रोपेत, कोणविशिष्ट, अस्रिन्।
—कचोना, सं. पुं., प्रत्यस्रं, सर्वे कोणाः।
कोप, सं. पुं. (सं.) क्रोधः, रोषः।
कोपन, वि. (सं.) समन्यु, सरोष, क्रोधिन्।
कोपिनी, वि. स्त्री. (सं.) दे. 'क्रोधिनी'।
कोपी, वि. पुं. (सं.-पिन्) दे. 'क्रोधी'।
कोपीन, सं. पुं., दे. 'कौपीन'।
कोमल, वि. (सं.) मृदु, मृदुक, स्निग्ध, श्लक्ष्ण, मसृण, सुखस्पर्श २. मृदुल, पेलव, सुकुमार, सौम्य ३. अपरिपक्व, अप्रौढ़ ४. मनोहर, अभिराम। (सं. पुं.) स्वरभेदः (संगीत०)।
कोमलता, सं. स्त्री. (सं.) मृदुता, स्निग्धता, सुकु-मारता, पेलवता, अपरिपक्वत्वं, मनोहारिता इ.।
कोयल, सं. स्त्री. दे. 'कोकिल' २. लताभेदः।
कोयला, सं. पुं. (सं. कोकिलः) कोकिलः, दग्धकाष्ठं, अङ्गारः।
—लकड़ी का, सं. पुं. काष्ठ,-कोकिलः-अङ्गारः।
—पत्थर का, सं. पुं., प्रस्तर-अश्म,-कोकिलः।
कोया, सं. पुं. (सं. कोणः>) अपांगः-ङ्गः, चक्षुःकोणः, नयनोपान्तः।

कोर, सं. स्त्री. (सं. कोणः) उपांतः, प्रांतः, परिसरः, उपकंठः २. कोणः, अस्रः ३. द्वेषः ४. दोषः, अवगुणः ५. अस्त्रादीनां धारा। ६. पंक्तिः (स्त्री.), श्रेणी-णिः (स्त्री.)।
—कसर, सं. स्त्री. (हिं. + फ़ा. कसर) वैकल्यं, दोषः, छिद्रं, न्यूनता २. न्यूनाधिकता।
कोरक, सं. पुं. (सं.) कलिका, दे. 'कली' २. मृणालं ३. चारनामकगंधद्रव्यम्।
कोरा, वि. (सं. केवल) अभि-, नव, नवीन, नूतन, अव्यवहृत, अप्रयुक्त २. अधौत, अक्षालित ३. अरंजित ४. अचित्रित ४. अलि-खित ५. वंचित, रहित, विहीन ६. निष्कलंक ७. मूर्ख ८. निर्धन ९. केवल।
—जवाब, सं. पुं., एकांत-अत्यन्त,-निराकरणं-प्रत्याख्यानं-निषेधः।
—बचना, मु०. अत्यन्तं-नितांतं-मुच्,-विमुच् (कर्म.)।
—रहना, मु. भग्नाश-अकृतार्थ-मनोहत (वि.) स्था (भ्वा. प. अ.)।
—कोरा सुनाना, मु., स्पष्टं वद् (भ्व. प. से.), २. भर्त्स् (चु. आ. से.), आ-अधि,-क्षिप (तु. प. अ.)।
कोरि, वि., दे. 'कोटि'।
कोरी, सं. पुं. (सं. कोलः>) आर्य,-पटकारः-कुविंदः।
कोल[1], सं. पुं. (सं.) शू(सू) करः, किरिः (पुं.) २. उपगूहः, आलिंगनं ३. क्रोडं, अंकः ४. वन्यजातिविशेषः ५. कृष्णमरिचं ६. दे. 'तोला' ७. बदरीफलभेदः ८. दक्षिणदिशि देशविशेषः।
कोल[2], सं. पुं. (अं.) अंगारः, कोकिलः।
—गैस, सं. स्त्री. (सं.) अङ्गारवातिः (स्त्री.)।
—टार, सं. पुं (सं.) कोलतारं, तारकोलम्।
चार—, सं. पुं., काष्ठाङ्गारः।
स्टीम—, सं. पुं., बाष्पाङ्गारः।
कोलाहल, सं. पुं. (सं.) कलकलः, कालकोलः, तुमुलं, उत्क्रोशः, निनादः, विरावः।
—मचाना, क्रि. स., कोलाहलं-कलकलं,-कृ, आ-वि,-क्रुश् (भ्वा. प. अ.)।
कोली, सं. पुं. (सं. कोलः>) तंतुवायः, पटकारः।

कोल्हू, सं. पुं. (हिं. कूल्हा ?) १. चक्रं, तैलपेषणी, तिलपेषणयंत्रं २. इक्षु-रसाल,-पेषणी।
—का बैल, मु. परम,-उद्यमिन्-उद्योगिन्।
—में पिरवा देना, मु., अत्यंतं पीड् (चु.)
कोविद, सं. पुं. (सं.) विद्वस् (पुं.), पंडितः।
कोश, सं. पुं. (सं. कोशः-पः), अभिधानं, शब्दसंग्रहः २. खड्गादेः वेष्टनं-पुटः-कोषः कोशः ३. आवरणं, पुटं, पिधानं, आच्छादनं ४. अंडं, पेशी-शिः (स्त्री.) ५. मंजूषः, संपुटः-टकः ६. कलिका, मुकुलं ७. मद्यपान,-पात्रं-चषकः ८. पुटः-टं, स्यूतः ९. संचितधनं १० समूहः ११. अंडकोषः १२. योनिः (स्त्री.) १३. पट्टकीटगृहम् १४. आत्मनः पंचावेष्टनानि (वेदांत) १५. आकरोत्थं अभिनवं सुवर्णं रजतं वा १६. निधिः (पुं.), निधानं।
—कार, सं. पुं. (सं.) अभिधान-शब्दसंग्रहः,-कारः-संपादकः २. पट्टकीटः।
—पाल, सं. पुं. (सं.) कोशा(षा)ध्यक्षः, कोशाधीशः।
कोशल, सं. पुं. (सं.) देशविशेषः २. अयोध्या।
कोशागार, सं. पुं. (सं. पुं. न.) कोशगृहं, भांडागारः-रं।
कोशिश, सं. स्त्री. (फ़ा.) यत्नः, उद्योगः, परिश्रमः।
कोष, सं. पुं. (सं.) दे. 'कोश'।
—अध्यक्ष, सं. पुं (सं.) दे. कोष,-पालः-अधीशः।
कोष्ठ, सं. पुं. (सं.) उदरमध्यं २. गर्भाशयादयः आवरणविशिष्टा अवयवाः ३. गृहमध्यं ४. प्राकारः ५. धान्यागारः-रम् ६. परिवेष्टित-स्थानम्।
—बद्धता, सं. स्त्री. दे. 'कब्ज'।
कोष्ठक, सं. पुं. (सं.) परिवेष्टकपदार्थः (दीवार, रेखादि) २. सारणी, अनेकगृहयुतं चक्रं, अंक-अक्षर,-जालं ३. अर्द्धचंद्रद्वयं [उ. (), [ ], { },] ४. सारणीवर्गः।
कोस, सं. पुं. (सं. क्रोशः) सहस्रधनुस् (न.), चतुःसहस्र (अष्टसहस्र) हस्तपरिमाणं, द्विसहस्रदंडः, गव्यूतं, मील,-द्वयं-युग्मं।
कोसों दूर, क्रि. वि., अति,-दूरं-दूरे-दूरतः, सुदूरं।
कोसों दूर रहना, मु., सुदूरं-पृथ स्था (भ्वा. प. अ.)।

कोसना, क्रि. स., (सं. क्रोशनं >) आक्रुश् (भ्वा. प. अ.), गर्ह् (भ्वा. आ. से.), अभिशंस् (भ्वा. प. से.), शप् (भ्वा. उ. अ.)।
पानी पी पी कर कोसना, मु., अत्यंतं आक्रुश् इ.।
कोह, सं. पुं. (फ़ा.) पर्वतः, गिरिः।
—नूर, सं. पुं. (फ़ा.+अ.) हीरकविशेषः।
कोहनी, सं. स्त्री., दे 'कुहनी'।
कोहरा, सं. पुं., दे. 'कुहरा'।
कोहान, सं. पुं. (फ़ा.) उष्ट्र-क्रमेलक,-ककुदः-ककुदम्।
कोहिस्तान, सं. पुं. (फ़ा.) पर्वतीयप्रदेशः, शैली स्थली।
कोहिस्तानी, वि. (फ़ा.) पर्वतीय, शैल (-ली स्त्री.), पर्वतमय (-यी स्त्री.), नगप्राय, सपर्वत। सं. पुं., पर्वत-गिरि-अद्रि,-वासिन्, शैलाटः।
कौंच, सं. स्त्री. [सं. कच्छुः (स्त्री.)>] रोमवल्ली, शूकशिंबी, वृष्या, २. तस्याः बीजकोषः।
कौंची, सं. स्त्री. (सं. कंचिका) वेणुशाखा, कुंचिका।
कौंध, सं. स्त्री. (हिं. कौंधना >) विद्युद्विलासः, तडिद्द्युतिः, (स्त्री.) चंचलास्फुरणं।
कौंधना, क्रि. अ. (सं. कननं =चमकना + अंध >)विद्युत् (भ्वा. आ. से.), विद्युत् विलस् (भ्वा. प. से.),-सहसा प्रकाश् (भ्वा.-आ. से.)-स्फुर् (तु. प. से.)।
कौंधा, सं. पुं., दे. 'कौंध'।
कौंसिल, सं. स्त्री. (अं.) सभा, संसद्, सदस् (सब स्त्री.)।
कौआ, सं. पुं. दे. 'कौवा'।
कौच, सं. पुं. (अं.) खट्टिका, सन्दी, निषद्या, पेचकः।
कौटिल्य, सं. पुं. (सं.) चाणक्यः, चंद्रगुप्तमौर्यस्य महामंत्रिन्। (सं. न.) वक्रता, कुटिलता २. दुष्टता, छलं, कपटम्।
कौटुंबिक, वि. (सं.) कुटुंब-गृहजन-परिवार,-संबंधिन्-विषयक, कौल, पारिवारिक, गृह्य।
कौड़ा, सं. पुं. (सं. कपर्दकः) वराटः, बाल-क्रीडकः।
कौड़ी, सं. स्त्री. (सं. कपर्दिका) वराटिका, काकिनी-णी। २. द्रव्यं, धनं ३. अक्षि-नयन,-

गोलः-गोलं ४. मांसग्रंथिः (पुं.) ५. कृपाणाग्रं ६. अधीननृपतिभ्यो ग्राह्यः करः ७. उरोऽस्थि (न.)।
(दो)—का,—काम का नहीं, मु. अल्पमूल्य, तृणप्राय, निरर्थक, असार।
—भर, मु., अत्यल्प, किंचिद्, स्वल्प।
——को मुहताज या तंग होना, मु., अकिंचनत्वं, अत्यंतदारिद्र्यं, नितान्तनिर्धनता।
——चुकाना, मु., ऋणं निःशेषं परिशुध् (प्रे.)- अपाकृ।
——जोड़ना, मु., धनं संचि (स्वा. प. अ.)- संग्रह् (क्र्. प. से.)।
कानी या फूटी कौड़ी, मु. अत्यल्प,-वित्तं-द्रव्यम्।
कौड़ियों के मोल, मु., अत्यल्पमूल्येन।
कौतुक, सं. पुं. (सं. न.) कु(कौ)तूहलं, कुतुकं, जिज्ञासा २. आश्चर्यं ३. विनोदः, नर्मन् (न.) ४. हर्षः ५. खेला, क्रीडा।
कौतुकी, वि. (सं.-किन्) [illegible], [illegible], क्रीडाप्रिय, विनोदप्रिय, [illegible]।
कौतूहल, सं. पुं., दे. 'कुतूहल'।
कौन, सर्व. (सं. को नु) 'किं' के तीनों लिंगों के रूप (कः, का, किं इ.)।
—कौन, कः कः इ.। दो में से—, कतरः, कतरा, कतरत् (पुं. स्त्री. न.) बहुतों में से—, कतमः, कतमा, कतमत् (पुं. स्त्री. न.)।
कौपीन, सं. पुं. (सं. न.) [illegible], [illegible], घटिका; कच्छा, कच्छटिका, २. गुह्यांगं, गुह्यांगानि ३. पापं ४. अकार्यम्।
क़ौम, सं. स्त्री. (अ.) वर्णः, जातिः (स्त्री.) २. कुलं, वंशः ३. देशः, राष्ट्रं, विषयः।
कौमार, सं. पुं. (सं. न.) कुमारावस्था (५ अथवा १६ वर्ष पर्यंत), बाल्यम्।
क़ौमियत, सं. स्त्री. (अ.) राष्ट्रियता, जातीयता।
क़ौमी, वि. (अ.) राष्ट्रिय, देशीय, जातीय।
—हुकूमत, सं. स्त्री., राष्ट्रियशासनं, स्वराज्यं।
कौमुदी, सं. स्त्री. (सं.) ज्योत्स्ना, दे. 'चाँदनी'।
कौर, सं. पुं. (सं. कवलः) ग्रासः, [illegible], पिंडः।
कौरव, सं. पुं. (सं.) कुरुवंशजः।
—पति, सं. पुं., दुर्योधनः।

कौल[1], वि. (सं.) दे. 'कुलीन'।
कौल[2], सं. पुं., दे. 'कौर'।
क़ौल[3], सं. पुं. (अ.) प्रतिज्ञा, समयः २. उक्तिः (स्त्री.)।
कौवा, सं. पुं. (सं. काकः) वायसः, ध्वांक्षः, मौकुलिः (पुं.), एकाक्षः, बलिकारिः (पुं.), करटः, कुणः, द्रोणः २. अलिजिह्वा, शुंडिका, लंबिका ३. धूर्तः ४. वंचकः।
—परी, सं. स्त्री., अतिकुरूपिणी नारी।
—उड़ाना, मु. बालशुंडिकां उत्था (प्रे.)।
कौशल, सं. पुं. (सं. न.) चातुर्यं, दाक्ष्यं, नैपुण्यं २. कुशलं, मंगलम्।
कौशिक, सं. पुं. (सं.) इन्द्रः २. गाधिन् ३. विश्वामित्रः ४. कोषाध्यक्षः ५. कोषकारः ६. उलूकः ७. नकुलः ८. कौशेयवस्त्रं ९. मज्जा १०. [illegible]।
कौशे(षे)य, वि. (सं.) [illegible]। सं. पुं. (सं. न.) [illegible] (न.)।
कौस्तुभ, सं. पुं. (सं.) [illegible] (पुं.)।

क्या, सर्व. (सं. किम्)।
वि. [illegible], २. [illegible] ३. [illegible] ४. [illegible]।
अव्य. किम्।
—कहना है या—बात है, मु., साधु, साधु, साधु, सुष्ठु, उत्तमं (सब अव्य.)।
—खूब, मु., साधु, सुष्ठु इ.।
क्यारी, सं. स्त्री. (सं. केदारः) राजिका।
क्यों, क्रि. वि. (सं. किम्) किं, केन हेतुना-कारणेन, किंनिमित्तं, किमर्थं, कुतः, कस्मात् २. [illegible] रीत्या, कथम्।
—कर, कथं, केन प्रकारेण २. किमर्थं, किम्।
—कि,—यतः, यत्, यस्मात्।
—नहीं, निस्संदेहं, निःसंशयं, अवश्यं, ध्रुवम्।
क्रंदन, सं. पुं. (सं. न.) रोदनं, रुदितं, अश्रुपातः २. परिदेवनानि, आक्रोशः।
क्रतु, सं. पुं. (सं.) यज्ञः, [illegible] २. [illegible] ३. अभिलाषः ४. विवेकः ५. [illegible] ६. [illegible] ७. विष्णुः ८. आषाढः ९. [illegible]

क्रम, सं. पुं. (सं.) अनुक्रमः, आनुपूर्वी-र्व्यं, पारंपर्यं, परंपरा, विन्यासः, व्यवस्था, संविधानं, विरचनं २. प्रकारः, विधिः (पुं.) रीतिः (स्त्री.) ३. पादविन्यासः ४. काव्यालंकारभेदः।

——करके या से, क्रि. वि., अनुक्रमं, यथाक्रमं, अनुपूर्वशः, आनुपूर्व्येण २. शनैः शनैः, अल्पाल्पशः, उत्तरोत्तरम्।

क्रमशः, क्रि. वि. (सं.) दे. 'क्रम क्रम करके'।

क्रमिक, वि. (सं.) क्रम-परम्परा,-आगत-आयात, अनुपूर्व, क्रमबद्ध, आनुक्रमिक (-की स्त्री.) २. परम्परीय-ण, पैतृक (-की स्त्री.), पित्र्य।

क्रय, सं. पुं. (सं.) दे. 'ख़रीद'।

—विक्रय, सं. पुं., दे. 'ख़रीद-फ़रोख़्त'।

क्रव्य, सं. पुं. (सं. न.) दे. 'मांस'।

क्रव्याद, सं. पुं. (सं.) राक्षसः, पिशाचः २. सिंहः ३. श्येनः ४. मांसाशिन् (पुं.)।

क्रान्ति, सं. स्त्री. (सं.) महत्परिवर्तनं, परिवर्तः, २. चरणन्यसनं ३. सूर्यभ्रमणमार्गः ४. राज,-द्रोहः-विरोधः, राज्यविप्लवः, प्रजाक्षोभः।

क्रिकेट, सं. पुं. (अं.) पट्टगेन्दुकम्।

क्रिया, सं. स्त्री. (सं.) कर्मन् (न.), कार्यं, व्यापारः २. चेष्टा ३. आरम्भः ४. व्यापार-निर्देशकः शब्दः (व्या.) ५. नित्यकर्मन् (न.) ६. श्राद्धादिकर्मन् ७. चिकित्सा।

—कर्म, सं. पुं. (सं. न.) अन्त्येष्टि-मृतक,-क्रिया-कर्मन्।

—विशेषण, सं. पुं. (सं. न.) क्रियाया भाव-कालरीत्यादिद्योतकः शब्दः (व्या.)।

—इन्द्रिय, सं. स्त्री. (सं. न.) दे. 'कर्मेन्द्रिय'

क्रिस्टल, सं. पुं. (अं.) स्फटम्।

क्रिस्ता(स्टा)न, सं. पुं. (अं. क्रिश्चियन्), खिस्तानुयायिन्।

क्रीडा, सं. स्त्री. (सं.) खेला, लीला, कूर्दनं, खेलनं, विहारः २. कौतुकं, विनोदः, विलासः।

क्रीत, वि. (सं.) कृतक्रय, मूल्येन लब्ध।

क्रीतक, सं. पुं. (सं.) क्रीतपुत्रः।

क्रुद्ध, वि. (सं.) कुपित, रुष्ट, कोपिन्, सामर्ष, सकोप, सरोप, समन्यु, क्रोध-कोप,-युक्त।

क्रूर, वि. (सं.) निर्दय, कठोर, नृशंस, पाषाण-कठिन,-हृदय, निर्घृण, क्रूरकर्मन्, निष्करुण २. परपीडक ३. कठिन ४. तीक्ष्ण ५. उग्र ६. नीच ७. घोर।

—कर्मा, वि. (सं.-र्मन्) घोर, निर्दय, दारुण।

क्रूरता, सं. स्त्री. (सं.) निर्दयता, कठोरता, नृशंसता इ.। २. रौद्रता, तीक्ष्णता ३. दुष्टता।

क्रोड, सं. पुं. (सं. न.) बाह्वोर्मध्यं, भुजांतरं, उपस्थः, उत्संगः, भोगः, अंकः २. उरस्-वक्षस् (न.), उत्सम्।

—पत्र, सं. पुं. (सं. न.) परिशिष्टं, अंकपत्रं, पूरकपत्रम्।

क्रोध, सं. पुं. (सं.) कोपः, रोषः, अमर्षः, मन्युः (पुं.), प्रतिघः, भीमः, क्रुधा, रुषा, रुष्-क्रुध् (स्त्री.) दे. 'गुस्सा'।

क्रोधित, वि. (सं.) दे. 'क्रुद्ध'।

क्रोधी, वि. (सं.-धिन्) कोपिन्, रोषिन्, अमर्षिन्, दे. 'क्रुद्ध'।

क्रोश, सं. पुं (सं.) दे. 'कोस'।

क्रौंच, सं. पुं. (सं.) क्रुंचः-चा, क्रौंचा, क्रुंच् (पुं.), कलिकः, कालि(ली)कः।

क्लब, सं. पुं. (अं.) गोष्ठीगृहम्।

क्लर्क, सं. पुं. (अं.) लिपि-पंजी,-कारः, लेखकः, कायस्थः, वोर(ल)कः।

क्लांत, वि. (सं.) म्लान, खिन्न, परि-,श्रांत, जातखेद, आयस्त।

—मना, वि. (सं.-नस्) दुर्मनस्क, विमनस्क, खिन्न।

क्लांति, सं. स्त्री. (सं.) श्रमः, क्लमः, आयासः, श्रान्तिः (स्त्री.), खेदः, अवसादः।

क्लिष्ट, वि. (सं.) दुःखित, क्लेशित, आर्त, पीडित २. दुष्कर, कठिन, दुस्साध्य।

क्लीब, स. पुं. (सं.) षं (शं) ढः, संढः, शंढः, नपुंसकः, पुरुषत्वहीन २. दे. 'कायर'।

क्लीवता, सं. स्त्री. (सं.) शं(षं)ढता, नपुंसकता २. कातरता।

क्लेद, सं. पुं. (सं.) आर्द्रता, स्तेमः, तेमः। २. प्रस्वेदः।

क्लेश, सं. पुं. (सं.) दुःखं, कष्टं, पीडा, व्यथा, वेदना, चिंता, आस्रवः, आदीनवः।

क्लेशित, वि. (सं.) दे. 'क्लिष्ट' (१)।

क्लैव्य, सं. पुं. (सं. न.) दे. 'क्लीवता'।

क्लोम, सं. पुं. (सं. न.) क्लोमं, क्लोमन् (न.), तिलकं, फुप्फुसं, दे. 'फेफड़ा'।

क्लोरीन, सं. स्त्री. (अं.) नीरजी, हरिनम्।

क्लोरोफार्म, सं. पुं. (अं.) मूर्च्छकम्, संज्ञालोपकम् (औषधभेदः)।

क्वाथ, सं. पुं. (सं.) दे. 'काढा'।

क्वारंटाइन, सं. पुं. (अं.) निषिद्धसंसर्गगृहं, २.. संसर्गप्रतिवन्धः, गमनागमननिषेधः।

क्वारा, वि. (सं. कुमार) दे. कुंवारा।

क्षंतव्य, वि. (सं.) क्षमार्ह, मर्षणीय, सोढव्य।

क्षण, सं. पुं. (सं.) अत्यल्पसमयः,मुहूर्तः, निमेषः, पलं,त्रिंशत्कलापरिमितकालः २.समयः ३. अवसरः ४. उत्सवः।

—प्रभा, सं. स्त्री., विद्युत् (स्त्री.), चंचला।

—भंगुर, वि., विनश्वर, क्षणिक, अस्थिर।

—भर, क्रि. वि., क्षणमात्रं, मुहूर्त-पल,-मात्रम्।

क्षणिक, वि. (सं.) क्षणस्थायिन्, अनित्य, अस्थिर, वि-,नश्वर, निस्सार, अस्थायिन्।

क्षत, वि. (सं.) व्रणित, विद्ध, भिन्नदेह, ताडित, क्षतियुक्त, आहत।
सं. पुं. (सं. न.) व्रणः, क्षतिः (स्त्री.), अरुस् (न.), आघातः, ईर्मं २. स्फोटः, पिटकः।

—योनि, वि. स्त्री. (सं.) संभुक्ता, कृतसहवासा।

—विक्षत, वि. (सं.) अतीव व्रणित-विद्ध-आहत।

क्षति, सं स्त्री. (सं.) क्षयः, नाशः २. अपचयः, हानिः (स्त्री.) ३. व्रणः, ईर्मम्।

क्षत्र, सं. पुं. (सं. न.) वलं, शक्तिः (स्त्री.) २. राष्ट्रं ३. धनं ४. शरीरं ५. जलं ६. तगरवृक्षः। (सं. पुं.) क्षत्रियः।

—पति, सं. पुं., नृपः।

क्षत्राणी, सं. स्त्री. (सं. क्षत्रियाणी) (क्षत्रिय जाति की स्त्री) क्षत्रिया, क्षत्रिय(यि)का, क्षत्रियाणी २.(क्षत्रिय की पत्नी) क्षत्रियाणी, क्षत्रियी।

क्षत्रिय, सं. पुं. (सं.) वर्णविशेषः २. राजन्यः, बाहुजः, मूर्धाभिषिक्तः, क्षत्रः ३. योधः, भटः, वीरः।

क्षत्री, सं. पुं. दे. 'क्षत्रिय'।

क्षपणक, सं. पुं. (सं.) दिगम्बरयतिः २. बौद्धभिक्षुः ३. कविविशेषः। वि., निर्लज्ज।

क्षपा, सं. स्त्री. (सं.) रात्रिः (स्त्री.), निशा, यामिनी।

—कर,-नाथ, सं. पुं. (सं.) चन्द्रः, सोमः।

क्षम, वि. (सं.) शक्त, समर्थ, उपयुक्त, योग्य।

क्षमता, सं. स्त्री. (सं.) योग्यता, सामर्थ्यं, शक्तिः (स्त्री.)।

क्षमा, सं. स्त्री. (सं.) क्षांतिः (स्त्री.), तितिक्षा, सहिष्णुता, मर्षणं, सहनशीलता २. पृथिवी ३. खदिरवृक्षः ४. दक्षकन्या ५. दुर्गा ६. वेत्रवती नदी ७. राधिकासखी ८. वर्णवृत्तभेदः।

—करना, क्रि. स., क्षम् (भ्वा. आ. वे; दि. प. वे.), सह् (भ्वा. आ. से.), मृष् (दि.उ.से.)।

—शील, वि. (सं.) क्षमिन्, क्षमावत, क्षमितृ, सहिष्णु, सहन, क्षन्तृ, तितिक्षु, क्षमायुक्त।

क्षमावान, वि. (सं.-वत्) दे. 'क्षमाशील'।

क्षम्य, वि. (सं.) क्षन्तव्य, क्षमार्ह, क्षमोचित, मर्षणीय, सोढव्य।

क्षय, सं. पुं. (सं.) अपचयः, ह्रासः २. कल्पांतः, प्रलयः ३. नाशः, प्रध्वंसः ४. गृहं ५. यक्ष्मः, यक्ष्मन् (पुं.), राजयक्ष्मन् (पुं.) ६. रोगः ७. अंतः, अवसानं, क्षयरोगः, शोषः, रोगराजः, गदाग्रणीः (पुं.), अतिरोगः, रोगाधीशः, नृपामयः।

—कास, सं. पुं.(सं.) क्षयथुः, यक्ष्मकासः(पुं.)।

—मास, सं पु. (सं.) मलिम्लुचः, मल-अधिक,-मासः।

—रोग, सं. पुं., दे. 'क्षय' (५)।

—रोगी, सं. पुं. (सं.-गिन्) क्षयिन्, यक्ष्मिन्, रोगराज-शोष,-ग्रस्तः।

क्षयी, वि. (सं.-यिन्) अपचयिन्, ह्रासिन् २. शोषिन्, यक्ष्मिन्, रोगराजपीडित।

—रोग, सं. पुं., दे, 'क्षय' (५)।

क्षर, वि. (सं.) नश्वर, अनित्य।

क्षरण, सं. पुं. (सं. न.) शनैः शनैः-विंदुशः-विप्रुट्क्रमेण गलनं-स्यंदनं-स्रवणम्।

क्षांत, वि. (सं.) क्षमाशील, क्षमावत्, क्षमिन् २. सहिष्णु, सहनशील।

क्षांति, सं. स्त्री. (सं.) दे. 'क्षमा' (१)।

क्षार, सं. पुं. (सं.) सर्जिका, विडलवणं २. लवणं ३. दे. 'शोरा' ४.दे. 'सुहागा' ५. भस्मन्(न.)।

क्षिति, सं. स्त्री. (सं.) भूमिः (स्त्री.), पृथिवी २. क्षयः, ह्रासः, नाशः।

—पाल, सं. पुं. (सं.) नृपः।

क्षितिज, सं. पुं. (सं. न.) दिक्,-चक्रं-तटं, दिगंतः, दिङ्मंडलं, अंबरांतः, आकाशकक्षा। २. मंगलग्रहः, कुजः ३. वृक्षः ४. दे. 'केंचुआ'।

क्षिप्त, वि. (सं.) त्यक्त, विसृष्ट, प्रास्त २. विकीर्ण ३. अवज्ञात ४. पतित ५. वातरोगग्रस्त।

क्षिप्र, क्रि. वि. (सं. न.) द्रुतं, सपदि, द्राक्, दे. 'शीघ्र'।

वि., त्वरित, सत्वर, जवन, वेगवत्, शीघ्र।

—हस्त, वि. (सं.) शीघ्रकारिन्, आशुकर्तृ।

क्षीण, वि. (सं.) सूक्ष्म, प्र-,तनु, श्लक्ष्ण २. कृशांग, कृश, क्षाम, क्षीण-शुष्क,-मांस ३. नष्ट, ध्वस्त, क्षयंगत।

क्षीणता, सं. स्त्री. (सं.) दुर्बलता, निःशक्तता २. सूक्ष्मता, तनुता ३. कृशता, क्षामता ४. ह्रासः, अपचयः, नाशः।

क्षीर, सं. पुं. (सं. न.) दुग्धं, पयस् (न.) २ जलं ३. पायसं-सः।

—निधि, सं. पुं. (सं.) सागरः।

—नीर, सं. पुं., आलिंगनं २. मिश्रणम्।

—सागर, सं. पुं. (सं) क्षीराब्धिः (पुं.), दुग्ध,-सागरः-समुद्रः, क्षीरोदः।

—सार, सं. पुं., दे. 'मक्खन'।

क्षीरज, सं. पुं. (सं.) चंद्रः २. शंखः ३. कमलं ४. दधि (न.)।

क्षीरजा, सं स्त्री. (सं.) दे. 'लक्ष्मी'।

क्षीरधि, सं. पुं. (सं.) सागरः, समुद्रः।

क्षीरोद, सं. पुं. (सं.) दे. 'क्षीरसागर'।

क्षुण्ण, वि. (सं.) प्रहत, चूर्णीकृत, खंडशो भिन्न।

क्षुद्र, वि. (सं.) अधम, निकृष्ट, नीच २. अल्प, स्तोक ३. कृपण ४. कुटिल ५. दरिद्र।

क्षुद्रता, सं. स्त्री. (सं.) तुच्छता, निकृष्टता २. कुटिलता ३. दरिद्रता।

क्षुधा, सं. स्त्री. (सं.) दे. 'भूख'।

क्षुधातुर,
क्षुधार्त,
क्षुधित, } वि. (सं.) दे. 'भूखा'।

क्षुप, सं. पुं. (सं.) क्षुपकः, क्षुद्रवृक्षः, गुल्मः-मं।

क्षुब्ध, वि. (सं.) व्याकुल, विह्वल, आतुर, उद्विग्न २. चंचल ३. भीत, त्रस्त ४. क्रुद्ध।

क्षुर, सं. पुं. (सं.) नापितस्य लोमछेदकशस्त्रं, क्षौरी, क्षुरी, खुरः २. शफः-फः, गवादीनां पादाग्रम्।

क्षेत्र, सं. पुं. (सं. न.) केद (दा) रः, भूमिः (स्त्री.), वप्रः-प्रं। २. समभूमिः ३. उत्पत्ति-स्थानं, उद्भवः, उद्गमः ४. प्रदेशः ५. तीर्थस्थानं ६. राशिः (पुं., मेषादि) ७. पत्नी ८. शरीरं ९. अंतःकरणं १० रेखावेष्टितं स्थानम्।

—गणित, सं. पुं. (सं.) गणितशाखाभेदः।

—फल, सं. पुं. (सं. न.) वर्गपरिमाणम्।

क्षेत्रज, सं. पुं. (सं.) नियोगजपुत्रः (धर्मशास्त्र)।

क्षेत्रज्ञ, सं. पुं. (सं.) जीवः २. ईश्वरः ३. कृपाणः। वि., ज्ञातृ, दक्ष, निपुण।

क्षेप, सं. पुं. (सं.) क्षेपणं, प्रेरणं, प्रासनं, विसर्जनं २. निन्दा ३. यापनं ४. दूरता।

क्षेपक, वि. (सं.) क्षेप्तृ, प्रासक, प्रेरक २. मिश्रित ३. निन्दनीय। सं. पुं., नाविकः २. प्रक्षिप्त-निवेशित,-लेखः।

क्षेपण, सं. पुं. (सं. न.) दे. 'क्षेप' (१-३)।

क्षेपणी, सं. स्त्री. (सं.) अस्त्रविशेषः २. नौका-दंडः, क्षेपणिः (स्त्री.)।

क्षेम, सं. पुं. (सं. पुं. न.) लब्धरक्षणं, प्राप्तरक्षा २. मंगलं, कुशलं ३. अभ्युदयः ४. आनंदः ५. मुक्तिः (स्त्री.)।

क्षोणि, सं. स्त्री. (सं.) क्षोणी, पृथिवी।

—पति, —पाल, सं. पुं. (सं.) नृपः, भूपः।

क्षोद, सं. पुं. (सं) चूर्णं, पिष्टं २. पेषणं ३. जलं।

क्षोभ, सं. पुं. (सं.) अशांतिः-अनिर्वृतिः (स्त्री.), चित्तचांचल्यं, व्यग्रता, उद्वेगः, व्याकुलता २. भयं ३. शोकः ४. क्रोधः।

क्षोभित, वि. (सं.) दे. 'क्षुब्ध'।

क्षोणी, सं. स्त्री. (सं.) क्षोणिः (स्त्री.), पृथिवी।

क्षौद्र, सं. पुं. (सं. न.) मधु (न.) २. जलं ३. क्षुद्रता। (सं. पुं.) चंपकवृक्षः २. वर्ण-संकरविशेषः।

क्षौम, सं. पुं. (सं. पुं. न.) अट्टः, अट्टालिका (२-४) पट्ट-अतसी-शणज,-वस्त्रं।

क्षौर, सं. पुं. (सं. न.)
—कर्म, सं. पुं. (सं-र्मन् न.) } दे. 'हजामत'।

क्षौरिक, सं. पुं. (सं.) दे. 'नाई'।

क्ष्मा, सं. पुं. (सं.) पृथिवी, अवनी।

क्ष्वेड, सं. पुं. (सं.) ध्वनिः, शब्दः २. विषं ३. कर्णरोगभेदः।

ख

ख, देवनागरीवर्णमालाया द्वितीयव्यंजनवर्णः, खकारः।

खं, सं. पुं. (सं. न.) शून्यस्थानं २. छिद्रं ३. आकाशं ४. इंद्रियं ५. बिंदुः (पुं.), शून्यं ६ स्वर्गः ७. सुखं ८. ब्रह्मन् (न.)।

खंख, वि. (सं.) रिक्त, शून्य २. निर्जन, वन्य।

खंखरा, वि., दे. 'खँखर'।

खँखार, सं. पुं, दे. 'खखार'।

खंगर, सं. पुं. (देश.) एकीभूतोऽतिपक्वेष्टकाचयः। वि., अतिशुष्क।

खँगालना, क्रि. स., (सं. क्षालनं) ईषत् धाव् (भ्वा., चु. उ. से.)-प्रक्षल् (चु.)।

खंज, सं. पुं. (सं.) खोरः, खोलः, खोटः, खोडः, विकलगतिः २. पादरोगभेदः।

खंजन, सं. पुं. (सं.) खंजरीटः, खंजखेलः, मुनिपुत्रकः, रत्ननिधिः (पुं.), गूढनीडः।

खंजर, सं. पुं (फ़ा.) दे. 'कटार'।

खंजरी, सं. स्त्री. (सं. खंजरीट=एक ताल >) लघु,-डमरुः-डिंडिमः।

खंजरीट, सं. पुं (सं.) दे. 'खंजन'।

खंड, सं. पुं. (सं. पुं न.) लवः, शकलः-लं, अंशः, विभागः, वि-,दलं, भिन्नं २. देशः ३. नवसंख्या ४. रत्नदोषभेदः ५. अध्यायः ६. पाक्यः, कृष्णलवणं ७. दिशा। वि., अल्प, लघु, अपूर्ण।

—करना, क्रि. स., खंडशः-लवशः छिद् (रु. प. अ.)-लू (क्र्. उ. से.)-कृत् (तु. प. से.)।

—काव्य, सं. पुं. (सं. न.) लघुप्रबन्धकाव्यम्।

—प्रलय, सं. पुं. (सं.) ब्रह्मांडस्य एकदेशीय-आंशिक,-नाशः-विध्वंसः-क्षयः।

खंडन, सं. पुं. (सं. न.) भंजनं, भेदनं, छेदनं, कर्तनं, त्रोटनम् २. प्रत्याख्यानं, निराकरणं, निरसनम्।

खंडनीय, वि. (सं.) भेत्तव्य, छेत्तव्य २. प्रत्याख्येय, निरसनीय।

खंडहर, सं. पुं. (सं. खंडः+हिं. घर) ध्वंसावशेषः, जर्जर-जीर्ण-शीर्ण,-गृहं-नगरम्।

खंडरिच, सं. पुं., दे. 'खंजन'।

खंडहर, सं. पुं., दे. 'खंडर'।

खंडित, वि. (सं.) भग्न, त्रुटित, लून, छिन्न २. असमग्र, अपूर्ण।

ख़ंदक़, सं. स्त्री. (अ.) परिखा, खेयं, राजधान्यादिवेष्टनखातं, २. बृहत्,-श्वभ्रं-गर्तः-अवटः।

खंबा, खंभ, खंभा, सं. पुं. (सं. स्कंभः) उप-, स्तंभः, अवष्टंभः, स्थाणुः (पुं.), स्थूणा।

ख, सं. पुं (सं. न.) गर्तः-र्ता, अवटः २. रिक्तस्थानं ३. निर्गमः ४. बिलं, विवरं ५. इन्द्रियं ६. कूपः ७. इषुव्रणः ८. शकटचक्रनाभिच्छिद्रं ९. आकाशं १०. स्वर्गः ११. बिंदुः (पुं.), शून्यं १२. ब्रह्मन् (न.) १३ शब्दः १४ कंठस्थ प्राणनाडी १५ सुखं १६ क्षेत्रं १७ पुरं। (सं. पुं) सूर्यः।

खक्खा[1], सं. पुं. (अनु.) अट्टहासः, उच्चैर्हासः, प्र-अति,-हासः।

खक्खा[2], सं. पुं. (हिं. खत्री का 'ख') पांचनदः क्षत्रियः २. अनुभवी पुरुषः ३. महागजः।

खखार, सं. पुं. (अनु.) कफः, श्लेष्मन् (पुं.), संघातः, सौम्यधातुः (पुं.), घनः।

खखारना, क्रि. अ. (अनु.) कफं निःसृ (प्रे.)-उद्गृ (तु. प. से.), निष्ठिव् (भ्वा. दि. प. से.)।

खखोंडर, सं. पुं. (सं. खं+कोटरः>) तरुकोटरस्थः-स्थं खगनीडः-डं २. उलूक,-निलयः-कुलायः।

खग, सं. पुं. (सं.) पक्षिन् (पुं.), अंडजः, नीडजः २. गंधर्वः ३. देवः ४. बाणः ५. ग्रहः ६. मेघः ७. सूर्यः ८. चंद्रः ९ वायुः (पुं.)।

—पति, सं. पुं. (सं.) खगेशः, वैनतेयः, गरुडः, खगकेतुः (पुं.), खगराजः।

खगोल, सं. पुं. (सं.) आकाश-गगन,-मंडलं, गगनाभोगः।

—विद्या, सं. स्त्री. (सं.) ज्योतिःशास्त्रं, ज्योतिषं।

खचखच, सं. स्त्री. (अनु.) पंके चलनध्वनिः (पुं.)।

खचना, क्रि. अ. (सं. खचनं) खच्-निविश्-प्रतिवप् (कर्म.) २ अंकित-चित्रित (वि.)+भू।

खचर, सं. पुं. (सं.) सूर्यः २. मेघः ३. ग्रहः ४. नक्षत्रं ५. वायुः ६. पक्षिन् (पुं.) ७. बाणः ८. राक्षसः। वि. नभश्चर, गगनचारिन्।

खचरा, वि. (हिं. खच्चर) वर्णसंकर, मिश्रज २. दुष्ट, खल।

खचाखच, क्रि. वि. (अनु.) निविडं, गाढं, अविरलं, निरंतरं। वि., जनाकीर्ण, जनसंकुल।

—भरना, क्रि. अ., सं-आ-कॄ (कर्म.), परिपॄ (कर्म.), संकुल-समाकुल (वि.)+भू।

खचित, वि. (सं.) निवेशित, प्रत्युप्त २. लिखित, चित्रित।

खच्चर, सं. पुं. (देश.) वेगसरः, वेस (श) रः, अश्वतरः (स्त्री. अश्वतरी)।

खज़ानची, सं. पुं. (फ़ा.) कोष-धन,-अध्यक्षः-अधीशः, अर्थाधिकारिन्।

ख़ज़ाना, सं. पुं. (अ.) कोशः-षः, निधानं, निधिः (पुं.), द्रव्य,-राशिः (पुं.)-संग्रहः २. वित्तं, द्रविणं ३. कोशागारं, भांडागारं, कोश (ष)गृहम्।

खजुली, सं. स्त्री. (सं. खर्ज्जूः स्त्री.) दे. 'खुजली'।

खजूर, सं. पुं. स्त्री. (सं. खर्जूरः) (वृक्ष) खर्जूरी, दुष्प्रधर्षा, दुरारोहा, यवनेष्टा, हरिप्रिया २, (फल) खर्जूरं, खर्जूरीफलम्। ३. मिष्टान्न भेदः, खर्जूरिका।

खजूरी, वि. (हिं. खजूर) खर्जूर,-विषयक-संबंधिन्, खार्जूर २. वेणीरूपेण ग्रथित, व्यावर्तित।

खटक, सं. स्त्री. (अनु.) भयं, त्रासः २. चिंता।

खट[1], वि. (सं. षट्) दे. 'छः'।

खट[2], सं. पुं. (अनु.) संघट्टजो ध्वनिः (पुं), खटितिशब्दः, खटखटाशब्दः।

—से, क्रि. वि., सपदि, झटिति, क्षणेन।

खटकना, क्रि. अ. (अनु.) खटखटायते (ना. धा.), खटखटा-शब्दं कृ २. मुहुः मुहुः पीड् (कर्म.)-उद्दीप् (दि. आ. से.) ३. अयुक्त-असमीचीन-अनुचित (वि.)+प्रति-इ (कर्म.) ४. भी (जु. प. अ.), त्रस् (दि. प. से.) ५. वैरायते-कलहायते (ना. धा.), विवद् (भ्वा. आ. से.) ६. अनिष्टं-अपकारं आशंक् (भ्वा. आ. से.)।

खटका, सं. पुं. (हिं. खटकना) खटखटा,-शब्दः-नादः-ध्वनिः २. भयं, त्रासः, आशंका ३. चिंता ४. कीलः-लं ५. अर्गलं, तीलकं ६. पादशब्दः।

—लगना, क्रि. अ., त्रस् (दि. प. से.), चिंतित-व्यग्र (वि.)+भू।

खटकाना, क्रि. स., दे. 'खटखटाना'।

खटकीड़ा, सं. पुं. (सं. खट्वाकीटः) दे. 'खटमल'।

खटखट, सं. स्त्री. (अनु.) खटखटा,-शब्दः-ध्वनिः (पुं.)-नादः २. कलहः, विवादः ३. दे. 'झंझट'।

खटखटाना, क्रि. स. (अनु.) तीव्रं अभिहन् (अ. प. अ.)-तड् (चु.) प्रहृ (भ्वा. प. अ.), खटखटाशब्दं कृ २. स्मृ (प्रे.)।

खटगीर, सं. पुं., दे. 'खटमल'।

छटछप्पर, सं. पुं., दे. 'मसहरी'।

खटना, क्रि. स., दे. 'कमाना'।

खटपट, सं. स्त्री. (अनु.) कलहः, विवादः २. खटखटाशब्दः, शस्त्र,-घोषः-शिंजितम्।

खटबुना, सं. पुं. (हिं. खाट+बुनना) खट्वा,-वायः-वापः, मंच-पर्यंक,-वायः-वापः।

खटमल, सं. पुं. (सं. खट्वामलं>) उद्दंशः, मत्कुणः, ओकणः, ओकोदनी।

खटमीठा, वि. (हिं. खट्टा+मीठा) अम्ल-मधुर, शुक्तमिष्ट।

खटराग, सं. पुं. (सं. षड्रागाः) मेघदीपकादयः षड्रागाः २. कलहः ३. विस्वरता, विसंवादः ३. व्यर्थवस्तुजातम्।

खटाई, सं. स्त्री. (हिं. खट्टा) अम्लता, शुक्तता २. अम्लः, द्रावकं ३. अम्ल-शुक्त,-पदार्थः।

—बढ़ना, सं. पुं., अम्लरोगः (अजीर्णभेदः)।

—में पड़ना, मु., चिरायते-मन्दायते (ना. धा.), व्याक्षिप् (कर्म.), अनिर्णीत (वि.) स्था (भ्वा. प. अ.)।

खटाका, सं. पुं. (अनु.) खट्कारः, खटिति शब्दः, महा,-शब्दः-रवः।

खटाखट, सं. पुं. (अनु.) दे. 'खटखट' १. शिंजितं, क्वणितं। क्रि. वि., सखटखटाशब्दं २. अनवरतं, सपदि।

खटापटी, सं. स्त्री., दे. 'खटपट'[1]।

खटाव[1], सं. पुं. (देश.) नौकाबन्धनकीलः-लम्।

खटाव[2], सं. पुं., दे. 'निर्वाह'।

खटास[1], सं. पुं. (सं. खट्टासः-शः) गंधमार्जारः, वनेवासनः।

खटास[२], सं. स्त्री. (हिं. खट्टा) अम्लता, शुक्तता।

खटिया, सं. स्त्री. (हिं. खाट) लघु,-खट्वा-पर्यंकः-मंचः, खट्विका, खट्वाका।

खटोलना, सं. पुं., दे. 'खटिया'।

खटोला, सं. पुं. (हिं. खाट) दे. 'खटिया'।

खट्टा, वि. (सं. कट्ठ>) अम्ल, शुक्त।
सं. पुं., बीज-फल,-पूरः, दंतशठः, जम्भकः, जम्भलः, छोलंगः।

—चूक, वि., अति-अत्यन्त,-अम्ल-शुक्त।

—मीठा, वि., दे, 'खटमीठा'।

—सा, वि., ईषदम्ल, आशुक्त।

जी—होना, मु., गतस्पृह-निर्विण्ण-वितृष्ण (वि.)+भू।

खट्टास, सं स्त्री. (हिं. खट्टा) दे. 'खटास' (२)।

खट्टू, सं. पुं. (पं. खटना) धनार्जकः, वित्तोपार्जकः २. कर्म,-करः-कारः।

खट्वा, सं. स्त्री. (सं.) दे. 'खाट'।

खड, सं. (सं. खातं) गर्तः-र्ता, अवटः, बिलं, विवरं २. दरी, उपत्यका।

खड़कना, क्रि. अ. (अनु.) खड़खड़ा शब्दं कृ। दे. 'खटकना'।

खड़का, सं. पुं., दे. 'खटका'।

खड़काना, क्रि. स.
खड़खड़ाना, क्रि. स. } दे. 'खटखटाना'।

खड़खड़ाहट, सं. स्त्री. (हिं. खड़खड़) खड़खड़ा,-शब्दः-रवः-ध्वानः २. तुमुलरवः ३ कटु-कर्कश-परुष,-ध्वनिः (पुं.)।

खड़खड़िया, सं. स्त्री. (हिं. खड़खड़) दे. 'पालकी'।

खड़ग, सं. पुं. (सं. खड्गः) असिः, दे. 'तलवार'।

खड़गी, वि. (सं. खड्गिन्) आसिकः, खड्ग-धरः २. खड्गमृगः, दे. 'गैंडा'।

खड़बड़ाहट, सं. स्त्री. दे. 'गड़बड़ाहट'।

खड़बड़ी, सं. स्त्री. दे. 'गड़बड़ी'।

खड़मंडल, सं. पुं., दे. 'गड़बड़ी'।

खड़सान, सं. पुं. दे. 'खरसान'।

खड़ा, वि. (सं. खटक = खम्भा >) (दंडवत्) स्थित, उत्थित २. उच्छ्रित, उन्नत, उत्तान, ऊर्ध्व, लम्बरूप, खमध्य,-वर्तिन्-वेधिन् ३. स्थिर, अचल, स्तब्ध, निश्चल, निश्चेष्ट ४. उपस्थित, प्रस्तुत ५. सज्ज, संनद्ध, उद्यत ६. निर्मित रचित ७. अपक्व, असिद्ध ८. अनुत्खात, अलून ९. समस्त, समग्र [खड़ी (स्त्री.) = स्थिता इ.]।

—करना, क्रि. स., 'खड़ा होना' के प्रे. रूप।

—रहना, क्रि. अ., अचल-रुद्धगति (वि.)+ स्था इ.)।

—होना, क्रि. अ. (पद्भ्यां) स्था (भ्वा. प. अ.), उत्-स्था, २. विरम् (भ्वा. प. अ.), निवृत् (भ्वा. आ. से.), स्तंभ् (कर्म.), स्थिरी-निश्चली,-भू ३. उपकृ, साहाय्यं कृ ४. उच्छ्रित-उन्नत-उत्तान (वि.)+भू ५. निर्मा-विरच् (कर्म.) ६. निधा-निवेश् (कर्म.)।

खड़े-खड़े, क्रि. वि., स्थित एव २. झटिति, सपदि, सद्यः (सब अव्य.)।

खड़ाऊँ, खड़ाँव, सं. स्त्री. (अनु. खड़+हिं.+ पाँव) कोशी-षी, (काष्ठ-) पादुका।

खड़ाका, सं. पुं. (अनु.) खड़खड़ा,-शब्दः-ध्वानः।

खड़िया, सं. स्त्री. (सं. खडिका) खडी, कठिनी दे. 'चाक'।

खड़ी, सं. स्त्री. (सं. खडी) दे. 'खड़िया'।

खड्ग, सं. पुं. (सं.) दे. 'खड़ग'।

खड्गी, सं. पुं. तथा वि., (सं. खड्गिन्) दे. 'खड़गी'।

खड्ड, खड्ढा, सं. पुं. (सं. खातं) दे. 'खड'[१]

खड्डी, सं. स्त्री. (सं. खात>) तन्त्रवापः-पं, वाय(प) दण्डः, वेमः, वेमन् (पुं. न.), वान-दण्डकः, वाणिः (स्त्री.)।

खत, सं. पुं. (अ.) संदेश,-पत्रं,-लेख्यं,-लेखः २. हस्तलेखः, स्वहस्ताक्षरं ३. अक्षरसंस्थानं, लिखितं, लिपिः-विः (स्त्री.) ४. रेखा, लेखा, रेषा ५. मुखरोमन् (न.), श्मश्रु (न.), कूर्च ६. क्षौरं मुण्डनम्।

—आना, क्रि. अ., प्रथमतः मुखरोमाणि उद्भू।

—खींचना, क्रि. स., रेखां आ-अभि-लिख् (तु. प. से.)।

—बनाना, क्रि. स., मुंड् (भ्वा. प. से., चु.) क्षुरेण कृत् (तु. प. से.)-छिद् (रु. प. अ.)-लू (क्र्. उ. से.)।

—किताबत, सं. स्त्री., (अ.) पत्र,-व्यवहारः-विनिमयः।

—शिकस्ता, सं. पुं. (अ.+फ़ा.) वक्रलेखः।

ख़तना, सं. पुं. (अ.) शिश्नत्वक्छेदः (इस्लाम)।

ख़तम, वि. (अ. ख़त्म) समाप्त, पूर्ण।

—करना, मु., मृ (प्रे.), हन् (अ. प. अ.)।

—होना, मु., मृ (तु. आ. अ.)।

ख़तर, सं. पुं. (अ.) दे. भयं, त्रासः।

—नाक, वि. भयानक, भयङ्कर।

खतरा, सं. पुं. (अ.) भयं, भीतिः (स्त्री.), दे. 'भय' २. संशयः, संदेहः।

खतरानी, सं. स्त्री., दे. 'क्षत्राणी'।

ख़ता, सं. स्त्री. (अ.) अपराधः, दोषः २. छलं वञ्चना ३. प्रमादः, स्खलितम्।

—वार, वि. (अ.+फ़ा.) अपराधिन्, दोषिन्।

खतियाना, क्रि. स. (हिं. खाता) आयव्ययपञ्जिकायां यथास्थानं लिख् (तु. प. से.)

खतियौनी, सं. स्त्री. (हिं. खतियाना) (बृहत्) आयव्ययपञ्जिका २. तत्र यथास्थानं लेखः ३. क्षेत्रपतिसूचीपत्रम्।

खत्ता, सं. पुं. (सं. खातं) अवटः, गर्तः २. धान्यागारं-रः ३. निधिः (पुं.) ४. राशिः (पुं.)।

ख़त्म, वि., दे. 'ख़तम'।

खत्री, सं. पुं. (सं. क्षत्रियः) पंचनदप्रांते आर्याणामुपजातिविशेषः २. दे. 'क्षत्रिय'।

खदबदाना, क्रि. अ. (अनु.) बुद्बुदायते (ना. धा.) मन्दं क्वथ् (कर्म.), दे. 'उबलना'।

ख़दशा, सं. पुं. (अ.) भयं, आशंका।

खदान, सं. स्त्री., दे. 'खान'।

खदिर, सं. पुं. (सं.) सारद्रुमः, कुष्ठारिः (पुं.), गायत्री, दंतधावनं, बाल,-तनयः-पत्रः, यज्ञांगः, सुशल्यः, वक्रकंटः। २. दे. 'कत्था' ३. चन्द्रः ४. इन्द्रः।

खदेड़, सं. स्त्री. (हिं. खेदना) अनुधावनं, खेटनं, आच्छोदनम्।

खदेड़(र)ना, क्रि. स. (हिं. खेदना) निःअप-सृ (प्रे.), बहिष्कृ, निष्कस्-निर्वस् (प्रे.) २. अनुगम्, अनुधाव् (भ्वा. प. से.), मृग् (चु. आ. से.)।

खद्योत, सं. पुं. (सं.) प्रभाकीटः, दे. 'जुगनूँ' २. सूर्यः।

खनक, सं. पुं. (सं.) उंदुरुः (पुं.), मूष(पि)कः २. संधितस्करः ३. अवदारकः, खातकः ४. आकरः, ख(खा)निः-नी (स्त्री.) ५. भूतत्त्ववेत्तृ (पुं.)। सं. स्त्री. (अनु.), क्वणितं, शिंजितम्।

खनकना, क्रि. अ. (अनु.) शिंज् (अ. आ. से., चु.), क्वण् (भ्वा. प. से.), झणझणायते-खणखणायते (ना. धा.)।

खनकाना, क्रि. स., 'खनकना' के प्रे. रूप।

खनखनाना, क्रि. अ. तथा क्रि. स., दे. 'खनकना' तथा 'खनकाना'।

खनिज, वि. (सं.) धातुः (पुं.), आकरजः पदार्थः।

खनित्र, सं. पुं. (सं. न.) अवदारणम्।

खपची, सं. स्त्री., दे. 'खपाच'।

खपत, खपती, सं. स्त्री. (हिं. खपना) समावेशः, व्याप्तिः (स्त्री.) २. विक्रयः, पणनं ३. व्ययः, विनियोगः।

खपना, क्रि. अ. (सं. क्षपणं>) प्र-उप,-युज् (कर्म.), व्यवहृ-व्याप्तृ (कर्म.) २. क्षि-परिहा (कर्म.), नश् (दि. प. से.) ३. क्लिश्-संतप्-पीड् (कर्म.)।

खपड़ा(रा), सं. पुं. (सं. खर्परः) १. कर्परः २. मृत्पट्टिका ३. भिक्षापात्रम्।

खपड़ी(री), सं. स्त्री.(सं. खर्परः) धान्यभर्जनार्थं मृत्पात्रम्।

खपरै(ड़े)ल, सं. स्त्री. (हिं. खपड़ा) मृत्पट्टिकाभिः खर्परैः वा आच्छादितं पटलं २. तादृशपटलयुक्तं गृहम्।

खपाच, सं. स्त्री. (तु. कमची) (काष्ठ-) खंडः-डं, वंशस्य शकलः-लं, २. अतिकृशः पुरुषः।

खपाना, क्रि. स. (हिं. खपना) प्र-उप,-युज् (रु. आ. अ., चु.), उपयुज्य-उपभुज्य निरवशेषीकृ, व्यवहृ-व्याप्तृ (प्रे.) २. व्यय्-विनियुज् (चु.) ३. वि ,नश् (प्रे.) ४. संतप्-पीड् (प्रे.)।

खपुर, सं. पुं. (सं. न.) गगनस्थो दैत्यनगरविशेषः २. गगनस्था हरिश्चन्द्रनगरी।

खपुष्प, सं. पुं. (सं. न.) गगनकुसुमं, असंभवं-असाध्यं वस्तु (न.), शश,-विषाणं-शृंगम् ।

खप्पर(ड़), सं. पुं. (सं. खर्परः) मृत्पात्रभेदः २. काल्याः रुधिरपानपात्रं ३. भिक्षाभाजनं ४. कपालः-लम् ।

ख़फ़क़ान, सं. पुं. (अ.) हृत्कम्पनं २. (हिस्टीरिया) गर्भाशयोन्मादः, वातोन्मादः, हर्षमोहः।

ख़फ़गी, सं. स्त्री. (अ.) प्रसाद-प्रीति,-अभावः २. कोपः, क्रोधः ।

ख़फ़ा, वि. (अ.) रुष्ट, कुपित, क्रुद्ध २. विषण्ण ।

ख़फ़ीफ़, वि. (अ.) अल्प, न्यून २. लघु ३. क्षुद्र ४. लज्जित ।

ख़बर, सं. स्त्री. (अ.) समाचारः, उदंतः, वृत्तांतः वृत्तं, वार्ता, प्रवृत्तिः (स्त्री.) २. ज्ञानं, बोधः ३. संदेशः ४. संज्ञा, चैतन्यं ५. जनप्रवादः ।

—करना, देना या पहुँचाना, क्रि. स., विज्ञा (प्रे.), नि-आ-विद् (प्रे.), संदिश् (तु. प. अ.), बुध्-अवगम् (प्रे.) ।

—लगाना, क्रि. स., दे. 'ढूँढ़ना'।

—देने वाला, सं. पुं., विज्ञापकः, आवेदकः, सूचकः ।

—ले जाने वाला, सं. पुं. दूतः, वार्ता-संदेश,-हरः ।

ख़बरगीरी, सं. स्त्री. (अ.+फ़ा.) अवेक्षा, रक्षणं, चिंता २. सहानुभूतिः (स्त्री.), सहायता ।

ख़बरदार, वि. (अ.+फ़ा.) दे. 'सावधान' ।

ख़बरदारी, सं. स्त्री. (अ.+फ़ा.) दे. 'सावधानता' ।

ख़बीस, सं. पुं. (अ.) भयंकरः खलः ।

ख़ब्त, सं. पुं. (अ.) उन्मादः, चित्त,-विप्लवः-भ्रमः २. उत्सूत्रता, सामान्यविरोधः ।

ख़ब्ती, वि. (अ.) उन्मादिन् २. उत्सूत्र, लोकबाह्य ।

खब्बा, वि. (पं., सं. सव्य >) वाम, सव्य, दक्षिणेतर २. वामहस्त, सव्यसाचिन् ।

ख़म, सं. पुं. (फ़ा.) वक्रता, जिह्मता, आभुग्नता २. कुटिलता ।

—दम, सं. पुं., शौर्य, विक्रमः ।

—दार, वि., आनमित, आभुग्न, कुञ्चित ।

ख़मीर, सं. पुं. (अ.) किण्वः, जगलः, मासरः, मेदकः, कारोत्तरः, नग्नहूः (पुं.) ।

—उठाना, क्रि. स. किण्वेन संमिश्र् (चु.) । सं. पुं. किण्वनं, किण्वीकरणं ।

ख़मीरा, वि. (अ.) किण्व-जगल,-मिश्रित २. घनमधुक्वाथः ३. तमाखुभेदः ।

ख़यानत, सं. स्त्री. (अ.) सकपटापहरणं, दुर्विनियोगः २. चौर्य, वंचना ।

—करना, क्रि. स. कपटेन आत्मसात् कृ अथवा विनियुज् (रु. आ. अ.) ।

ख़याल, सं. पुं. दे. 'ख्याल' ।

ख़याली, वि., दे. 'ख्याली' ।

खर, सं. पुं. (सं.) गर्दभः, रासभः २. अश्वतरः, वेसरः ३. वकः ४. काकः ५. रावणभ्रातृ (पुं.) ६. तृणं, घासः ।

वि., कठोर, कक्खट, कीकस २. तीक्ष्ण ३. स्थूल ४. अमंगल, अमांगलिक ५. निशित ६. प्रवण, तिर्यच् ।

ख़र, सं. पुं. (फ़ा.) गर्दभः, रासभः ।

—दिमाग़, वि., जड, अज्ञ, खरमति ।

खरखर, सं. स्त्री. (अनु.) घर्घरः, घर्घर,-रवः-शब्दः ।

—करना, क्रि. स., घर्घरायते (ना. धा.), घर्घरध्वनिं कृ ।

खरखरा, वि., दे. 'खुरखुरा' ।

ख़रगोश, सं. पुं. (फ़ा.) शशः, शशकः, शूलिकः मृदुरोमन् (पुं.), रोमकर्णः ।

खरच, सं. पुं., दे. 'ख़र्च' ।

खरचना, क्रि. स. (फ़ा. ख़र्च) व्यय् (चु.), उत्-वि,-सृज् (तु. प. अ.), विनियुज् (रु. आ. अ., चु.), क्षयं-व्ययं,-कृ ।

खरचा, सं. पुं. दे. 'ख़र्चा' ।

खरज, सं. पुं. दे. 'षड्ज' ।

खरब, वि. (सं. खर्वम्) सं. पुं., अर्बुदशतकम् (१०००००००००००) २. अर्बुदशकम् (१००००००००००) ।

ख़रबूज़ा, सं. पुं. (तु. ख़र्बूज़) दशांगुलं, पट्-भुजा-भुज-रेखा-फला, वृत्तकर्कटी ।

—खुलना, मु., रहस्यं विवृ (कर्म.), स्वरूपं प्रकटीभू ।

—बनाना, मु., आडंबरं रच् (चु.) ।

लिबास, सं. पुं. (अ.) दे. 'वेश' ।

लियाक़त, सं. स्त्री. (अ.) योग्यता, क्षमता २. गुणः, कला ३. सामर्थ्यं ४. शीलम् ।

लिवाना, क्रि. प्रे., व. 'लेना' तथा 'लाना' के प्रे. रूप ।

लिवा लाना, क्रि. स., सह आनी (भ्वा.प.अ.)।

लिसोढ़ा, सं. पुं., दे. 'लसोढ़ा' ।

लिहाज़, सं. पुं. (अ.) अवेक्षणं, अवधानं २. कृपा-दया,-दृष्टिः, (स्त्री.) अनुग्रहः ३. पक्षपातः-तिता ४. लज्जा, त्रपा ५. प्रतिष्ठा-मर्यादा,-विचारः ६. शीलसंकोचः।

—करना, क्रि. अवधा (जु. उ. अ.) २. आदृ (तु. आ. अ.) ३. अनुग्रह् (क्र्. प. से.) ४. मर्यादां पा (प्रे. पालयति)।

लिहाफ़, सं. पुं. (अ.) दे. 'रजाई'।

लीक, सं. स्त्री. (सं. लेखा) रेषा-खा, दंडाकारलिपी-पिः (स्त्री.) २. (शकटादीनां) चक्रमार्गः ३. दे. 'पगदंडी' ४. यशस् (न.), प्रतिष्ठा ५. रीतिः (स्त्री.), लोकाचारः, प्रथा ६. कलंकः, लांछनं ७. गणनाचिह्नम्।

—पर चलना,
—पीटना, } मु. दे. 'लकीर' के नीचे।

लीख, स. स्त्री. (सं. लीक्षा) लिक्षा, यूकांडं, लि(ली)क्का, लिख्यः।

लीचड़, वि. (देश.) अलस, मंद, मंथर २. संलग्नशील, दृढ़ग्राहिन् ३ कृपण, कदर्य।

—पन, सं. पुं., आलस्यं, कार्पण्यं, संलग्नशीलता।

लीची, सं. स्त्री. (चीनी, लीचू) अलीचिका, फलभेदः।

लीडर, सं. पुं. (अं.) दे. 'नेता'।

लीद, सं. स्त्री. (देश.) (गजाश्वादीनां) अवस्करः, उच्चारः, शमलं, पुरीषं, मलम्।

लीन, वि. (सं.) लयप्राप्त, समाविष्ट, व्याप्त २. तन्मय, नि-,मग्न, आसक्त, तद्गतचित्त, निरत, व्यापृत,-पर,-परायण। ३. द्रवीभूत ४. तिरोहित, लुप्त।

लीनता, सं. स्त्री. (सं.) तन्मयता, तत्परता, निमग्नता, आसक्तिः (स्त्री.)।

लीपन, सं. पुं. (सं. लेपनं) दे. 'लिपाई' (१)।

लीपना, क्रि. स. (सं. लेपनं) अनु-प्र-वि,-लिप् (तु. प. अ.) २. दिह् (अ. उ. अ.), उपनह् (दि. प. अ.), अंज् (रु. प. वे.)। सं. पुं., अनु-प्र-वि,-लेपः-लेपनं ; उपनाहनं उपदेहनम्।

—पोतना, क्रि. स., शुध् (प्रे.), संस्कृ।

लीपनेवाला, सं. पुं., लेपकः, पलगंडः, २. उपदेहकः।

लीपा हुआ, वि., प्र-वि-,लिप्त, दिग्ध, अक्त।

लीमू, सं. पुं. (फ़ा.) दे. 'नींबू'।

लीला, सं. स्त्री. (सं.) क्रीडा, केलिः (स्त्री.), खेला, खेलनं, कूर्दनं, क्रीडनं २. विहारः, विनोदः, रंजनं ३. शृङ्गारभावचेष्टा, विलासः, काम,-क्रीडा-केलिः (स्त्री.)४. हावभेदः (सा.) ५. विचित्रव्यापारः, रहस्यकृत्यं ६. चरित्राभिनयः (उ. रामलीला इ.)।

—गृह, सं. पुं. (सं. न.) विलास-क्रीडा,-भवनम्।

पुरुषोत्तम, सं. पुं. (सं.) श्रीकृष्णः।

—स्थल, सं. पुं. (सं. न.) क्रीडाभूमिः (स्त्री.)।

लीलावती, वि. स्त्री. (सं.) विलासिनी। सं. स्त्री. (सं.) भास्कराचार्यभार्या २. गणितग्रन्थविशेषः (३-४) रागिनी-छंदो,-भेदः।

लुंगी, सं. स्त्री. (हिं. लांग) *निष्कच्छ,-शाटी-धौतिका २. *रेखोष्णीषः-षं, चित्रशिरोवेष्टनम्।

लुंचन, सं. पुं. (सं. न.) उत्पाटनं, उद्धरणं, उत्कर्षणं, २. पृथक् करणं, अपनयनं ३. कर्तनं, छेदनम्।

लुंज-जा, वि. (सं. लुंचनं>) करचरणविहीन, अपांग, व्यंग, विकल, विकलांग, श्रोण। सं. पुं., स्थाणुः, ध्रुवः, शंकुः, अपत्रपादपः।

लुंठक, सं. पुं. (सं.) लुंटा(ठा)कः, दे. 'लुटेरा'।

लुंठन, सं. पुं. (सं. न.) अपहरणं, मोषणं, दे. 'लूटना' (सं. पुं.)।

लुंड[1], सं पुं. (सं.) चौरः, तस्करः।

लुंड[2], सं. पुं. (सं. रुंडः-डं) कबंधः।

—मुंड, वि. (सं. रुंड+मुंड>) दे. 'लुंज' वि. तथा सं. पुं. २. पोट्टलीवत् व्यावर्तित।

लुंडा, वि. (सं. रुंड>) दे. 'लंडूरा'।

लुआठी, सं. स्त्री. (सं. उल्का+काष्ठं>) अलातं, उल्का, प्रदीप्तकाष्ठम्।

लुआब, सं. पुं. (अ.) संलग्नशीलः, फलसारः २. लाला, स्यंदिनी।

—दार, वि. (अ.+फ़ा.) संलग्नशील, दे. 'लसदार'।

लुक, सं. पुं. (सं. लोकः>) कुकुमः (=वार्निश) २. ज्वाला।

लुकना, क्रि. अ. (सं. लुक्=लोप>) दे. 'छिपना'।

लुकछिपकर, मु., निभृतं, रहसि, रहः (सब अव्य.)

लुकमा, सं. पुं. (अ.) कवलः, ग्रासः, गुडकः।

लुकाट, सं. पुं. (सं. लकु(क)चः) (वृक्ष) लिकुचः, शूरः, कार्श्यः, दृढवल्कलः, उहुः। २. (फल) लक(कु)चं, शूरं इ.।

लुकाना, क्रि. स. (हिं. लुकना) व. 'छिपना' के प्रे. रूप।

लुगदी, सं. स्त्री. (देश.) आर्द्रगोलकः-कम्।

लुगाई, सं. स्त्री. (हिं. लोग) नारी २. पत्नी।

लुचपन, सं. पुं. (हिं. लुचा) लंपटता, कामुकता २. दुर्वृत्तं, दुराचारः, दौर्जन्यम्।

लुच्चा, सं. पुं. (हिं. लुचकना, सं. लुंचनं से) लुंचकः, अपहारकः, दुर्वृत्तः, दुराचारिन्, कुपथगामिन् २. लंपटः, कामुकः ३. क्षुद्रः, दुष्टः, निर्लज्जः [लुच्ची (स्त्री.)]।

लुची, सं. स्त्री. (सं. चूलिकं) पक्वान्नभेदः।

लुटना, क्रि. अ., व. 'लूटना' के कर्म. के रूप।

लुटवाना, क्रि. प्रे., व. 'लूटना' के प्रे. रूप।

लुटारू, वि. (हिं. लुटाना) अप-अति वृथा,-व्ययिन्, मुक्तहस्त, अर्थनाशिन्।

लुटाना, क्रि. स. (हिं. लूटना) व. 'लूटना' के प्रे. रूप। २. अमितं व्यय् (चु.), अपव्ययं-अतिव्ययं कृ, अपव्यय् (चु.) ३. मूल्यं विना दा ४. मुष्टिभिः परिक्षिप् (तु. प. अ.)-पर्यस् (दि. प. से.)। सं. पुं., अप-अति-अमित,-व्ययः २. मुधा विक्षेपः।

लुटानेवाला, सं. पुं., अपव्ययिन्, विक्षेपिन्।

लुटिया, सं. स्त्री. (हिं. लोटा) लघुकमंडलुः।

—डुबाना, मु., आत्मानं न्यक्कृ (प्रे.)।

लुटेरा, सं. पुं. (हिं. लूटना) मार्गतस्करः, हठमोषकः, पाटच्चरः, परिपंथिन्, लुंट(टा,ठा)कः २. वंचकः, प्रतारकः।

लुढ़कना, लुढ़ना, क्रि. अ. (सं. लुठनं) वि-लुठ् (तु. प. से.), वि-लुट् (भ्वा. दि. प. से.) २. स्रु (भ्वा. प. अ.), बहिःपत्-निर्गल् (भ्वा. प. से.), निःसृ (भ्वा. प. अ.)। सं. पुं., वि-, लुठनं-लोटनं २. बहिः पतनं, निर्गलनं, च्यवनम्।

लुढ़काना, लुढ़ाना, क्रि. स., व. 'लुढकना' के प्रे. रूप।

लुड़ियाना, क्रि. स. (हिं. लोढिया) वर्त्तिकाकारं सिव् (दि. प. से.)।

लुतरा, सं. पुं. (देश.) परोक्षनिंदकः, पिशुनः, कलहसाधकः। कर्णेजपः २. अपकारकः, कुचेष्टकः। [लुतरी (स्त्री.)]।

लुत्फ़, सं. पुं. (अ.) आनंदः, मोदः २. रसः, आ-, स्वादः ३. उत्तमता ४. कृपा ५. रोचकता।

लु(लो)नाई, सं. स्त्री. (हिं. लोना) दे. 'लावण्य'(२)।

लुपरी-द्दी, सं. स्त्री., (सं. लेपः>) दे. 'लिपड़ी' २. द्रवप्रायं भक्ष्यं, लप्सिका।

लुप्त, वि. (सं.) गुप्त, प्रच्छन्न, निभृत २. अंतर्हित, तिरोभूत, अदृष्ट ३. नष्ट, ध्वस्त। सं. पुं., लुप्तं, चौर्यधनम्।

लुब्ध, वि. (सं.) गृध्नु, गर्द्धन, दे. 'लोभी'। २. मुग्ध, मोहित, हृत। सं. पुं., दे. 'लुब्धक'।

लुब्धक, सं. पुं. (सं.) व्याधः, दे. 'शिकारी' २. लंपटः ३. गृध्नुः।

लुब्बलुबाब, सं. पुं (अ.) तत्त्वं, सारः, सारांशः २. दे. 'गूदा'।

लुभाना, क्रि. अ. (हिं. लोभ) विलुभ् (प्रे.), दुराचारे-कुमार्गे प्रवृत् (प्रे.) २. वि-, मुह् (प्रे.), प्रलुभ् (प्रे.) ३. सम्-, आकृष् (भ्वा. प. अ.)। क्रि. अ., दे. 'रीझना'।

लुहंडा, सं. पुं. (सं. लोहदंडी) *अयःस्थाली।

लुहां(हं)गी, सं. स्त्री. (सं. लोहांग>) •लोहांगी, लोहमुखी यष्टी-ष्टिः (स्त्री.)।

लुहार, सं. पुं. (सं. लो(लौ)हकारः) अयस्कारः, व्योकारः, कर्मारः, कर्मकारः (लुहारिन स्त्री.)।

लुहारी, सं. स्त्री. (हिं. लुहार) लो(लौ)हकारी, अयस्कारी २. लोहकारव्यवसायः, कर्मारता, अयःशिल्पम्।

लू, सं. स्त्री. (हिं. लूक) घर्मवातः, उष्णानिलः तप्तपवनः।

—चलना, क्रि. अ., उष्णानिलः वा (अ. प. अ.)।

—मारना या लगना, मु., घर्मवातेन व्यथ् (भ्वा. आ. से.)।

लूक, सं. स्त्री. (सं. लोक्>) ज्वाला २. दे. 'लुआठी' ३. दे. 'लू' ४. उल्का।

लूट, सं. स्त्री. (हिं. लूटना) वि-, लुंट(ठ)नं, बलात् अपहरणं, मोषणं, लुंटा-ठा, लुंठितं, लुंटी-ठी-टिः-ठिः (स्त्री.) २. अन्याय्य-व्यवहारः

२. लोतं, लोत्रं, लोप्त्रं-त्री, स्तेय-अपहृत-लुंठित,-धनं, लुंपम् ।

—मचाना, क्रि. स., दे. 'लूटना' ।

—पड़ना या मचना, क्रि. अ., व. 'लूटना' के कर्म. के रूप ।

—का माल, सं. पुं., दे. 'लूट' (३) ।

—खसोट-पाट, सं. स्त्री., लुंठनध्वंसनं, लुंठालुंठि (न.) ।

—खूंद, मार, सं. स्त्री., मोषणहिंसनं, लुंठनमारणं, लुंठामारम् ।

लूटना, क्रि. स. (सं. लुंठनं) वि-,लुंट्-लुंठ् (भ्वा. प. से.; चु.), लुट् (भ्वा. दि. प. से.), वलात् अपहृ (भ्वा. प. अ.), प्रसह्य मुष् (क्र्. प. से.) २. चुर् (चु.), मुष्, अपहृ ३. वि-,ध्वंस्-नश् (प्रे.) ४. छलेन अन्यायेन वा आदा (जु. आ. अ.)-हृ ५. अत्यधिक-अनुचित,-मूल्यं आदा ६. मुह् (प्रे.), वशीकृ, मनो हृ । सं. पुं., दे. 'लूट' ।

लूटने योग्य, वि., लुंठनीय, लुंठितव्य ।

लूटनेवाला, सं. पुं., दे. 'लुटेरा' ।

लूटा हुआ, वि., लुंटि(ठि)त, वलात् अपहृत-मुषित ।

लूता, सं. स्त्री. (सं.) मर्कटकः, ऊर्णनाभिः, दे. 'मकड़ी' २. पिपीलिका ३. मर्कटकमूत्र-स्पर्शजः त्वग्रोगः ।

लून, वि. (सं.) छिन्न, कृत्त ।

लून, सं. पुं. (सं. लवणं) दे. 'नमक' ।

लूनिया, वि. (हिं. लून) लवण, क्षार । सं. पुं., लवणकारः ।

लूम, सं. पुं. (सं. न.) लांगूलं, पुच्छम् ।

लूमड़ी, सं. स्त्री., दे. 'लोमड़ी' ।

लूला, वि. (सं. लून>) छिन्न-लून,-पाणि-हस्त-कर २. अपांग, व्यंग ३. अशक्त, असमर्थ ।

लेंड़ी, सं. स्त्री. (सं. लेंडं>) वद्धमलं, *विष्ठावर्तिः (स्त्री.) २. दे. 'मेंगनी' ।

लेंस, सं. पुं. (अं.) वीक्षम् ।

—मेग्निफाइङ्ग लेंस, बृहद्दर्शकवीक्षम् ।

लेंहड़ा, सं. पुं. (देश.) पशु,-वृंदं-यूथं कुलं-समजः ।

ले, लेकर, अव्य. (हिं. लेना) आरभ्य, प्रभृति, आ-, (पंचमी से भी; उ., गांव से ले(कर) = आग्रामात्, ग्रामात्; कल से ले(कर) = श्वः प्रभृति-आरभ्य) २. गृहीत्वा, आदाय ।

लेई[1], सं. स्त्री. (सं. लेपः>) संश्लेषकलेपः, २. *सुधेष्टकचूर्णलेपः ।

लेई[2], सं. स्त्री. (लेहः) अवलेहः, दे. २. लप्सिका, द्रवप्रायसंयावः ।

लेकिन, अव्य. (अ.) किंतु, परंतु २. तथापि ।

—अगर, अव्य. (अ.+फ़ा.) किंतु यदि ।

लेक्चर, सं. पुं. (अ.) व्याख्यानं, भाषणं २. प्रपाठः, अध्यापनम् ।

—बाज़ी, सं. स्त्री. (अं.+फ़ा.) व्याख्यान-प्राचुर्यम् ।

—झाड़ना, मु., सोत्साहं व्याख्या (अ. प. अ.) अथवा अधि-इ (प्रे., अध्यापयति) ।

लेक्चरार, सं. पुं. (अं. लेक्चरर) व्याख्यातृ, उपदेशकः, वक्तृ २. अध्यापकः, उपाध्यायः ।

लेक्टोमीटर, सं. पुं. (अं.) दुग्धमापकम् ।

लेख, सं. पुं. (सं.) लिपी(वी)-पिः(विः) (स्त्री.) २. लिखित-लिपिवद्ध,-विषयः-वार्ता ३. प्रस्तावः, निवंधः ४. दे. 'लिखाई' (१-३) । ५. गणनं, संकलनम् ।

लेखक, सं. पुं. (सं.) ग्रंथकारः, पुस्तक-लेखकः-रचयितृ-प्रणेतृ २. लिपि(पी-वी)कारः, मसिपण्यः, पंजीकारः, लिपिज्ञः, वार्णिकः ।

लेखन, सं. पुं. (सं. न.) दे. 'लिखाई'(१) । २. लेखन,-कला-विद्या ३. गणनं, संख्यानं ४. भूर्जत्वच् (स्त्री.) ।

लेखनी, सं. स्त्री. (सं.) अक्षर-वर्ण,-तूलीलिका, कलमः, चित्रकः, कराश्रयः, लेखनी, वर्णिका, शर्करी ।

लेखा, सं. पुं. (सं. लेखः>) संकलनं, संख्यानं, गणनं-ना २. व्यय-मूल्य,-निरूपणं-अनुमानं ३. आयव्यय-देयादेय,-विवरणं ४. अनुमानं, विचारः ।

—डालना, मु., आयव्ययपंजिकायां नामन् (न.) लिख् (तु. प. से.) ।

—पूरा या साफ़ करना, मु., अवशेषं शुध् (प्रे.) ।

लेखिका, सं. स्त्री. (सं.) ग्रंथकर्त्री, पुस्तक-प्रणेत्री २. लिपिकारी, लिपिज्ञा ।

लेखे, क्रि. वि. (हिं. लेखा) विचारेण २. संबंधे ।

लेख्य, वि. (सं.) लि(ले)खितव्य, ले(लि)खनार्ह, ले(लि)खनीय । सं. पुं. (सं. न.) लिखित-लिपिबद्ध,-विषयः, लेखः २. दे. 'दस्तावेज़' ।

लेजिस्लेटिव काउंसिल, सं. स्त्री. (अं.) व्यवस्थापकसभा ।

लेट[1], वि. (अं.) चिरायित, विलंबित, काल-समय,-अतीत ।

लेट[2], सं. स्त्री. (देश.) दे. 'गच'।

लेटना, क्रि. अ. (हिं. लोटना) संविश् (तु. प. अ.), शी (अ. आ. से.) २. विश्रम् (दि. प. से.) ३. दे. 'मरना' । सं. पुं., संवेशः शनं, शयनम् ।

लेटा हुआ, वि., संविष्ट, शयान, शयित ।

लेटनेवाला, सं. पुं., संवेशेच्छुकः, शयालुः ।

लेटर बाक्स, सं. पुं. (अं.) पत्रपेटिका ।

लेटाना, क्रि. स., व. 'लेटना' के प्रे. रूप ।

लेडी, सं. स्त्री. (अं.) महिला, कुलांगना, आर्या २. नारी, रमणी ३. लार्डोपाधिधार-कस्य पत्नी ।

लेन, सं. पुं. (हिं. लेना) आदानं, ग्रहणं, धारणं २. दे. 'लहना'(१-२) ।

—दार, सं. पुं. (हिं + फ़ा.) उत्तमर्णः, ऋणदः, महाजनः ।

—देन, सं. पुं. (हिं.) आदानप्रदानं व्यवहारः २. कौसीद्यं, वृद्धिजीवनं-विका ।

लेना, क्रि. स. (सं. लभनं) आदा (जु. आ. अ.), प्रति-इष् (तु. प. से.), प्रति-परि,-ग्रह् (क्र. प. से.) २. अधिगम् (भ्वा. प. अ.), आसद् (प्रे.), प्राप् (स्वा. प. अ.), लभ् (भ्वा. आ. अ.) ३. धृ (भ्वा. प. अ.; चु.), अव-आ-लंब् (भ्वा. आ. से.), ग्रह् ४. जि (भ्वा. प. अ.), अभिभू (भ्वा. प. से.), वशीकृ ५. क्री (क्र्. उ. अ.) ६. ऋणं ग्रह् ७. अंके-क्रोडे निधा (जु. उ. अ.) ८. स्वी-अंगी-कृ, प्रतिपद् (दि. आ. अ.) ९. प्रत्युद्,-गम्-व्रज् (भ्वा. प. से.)-या (अ. प. अ.), सत्कृ, संमन्-संभू (प्रे.) १०. कार्यभारं स्वीकृ ११. रुचि (स्वा. प. अ.), संग्रह् (क्र्. प. से.) १२. उपहस् (भ्वा. प. से.), व्यंग्योक्तिभिः लज्ज् (प्रे.) । सं. पुं., आदानं, ग्रहणं, प्रतिग्रहः; अधिगमनं, प्रापणं, आसादनं, आलंबनं, धारणं, ऋणादानं; अंगीकरणं; वशीकरणं; संचयः-यनं; क्रयणं, क्रयः इ. ।

लेने योग्य, वि. (सं.) आदेय, ग्राह्य, ग्रहीतव्य, प्राप्य, आसादनीय, क्रेय, क्रयणीय इ. ।

लेनेवाला, सं. पुं., आदातृ, ग्रहीतृ, अधिगंतृ, आसादयितृ, अंगीकर्तृ, क्रेतृ, ग्राहकः ।

लिया हुआ, वि. (सं.) आत्त, आदत्त, ग्रहीत, प्राप्त, अधिगत, धृत, अंगीकृत, वशीकृत; क्रीत इ. ।

ले आना, मु., दे. 'लाना' ।

ले चलना या ले जाना, मु., आदाय गम् २. आत्मना सह नी (भ्वा. प. अ.) ।

ले डूबना, मु., परमपि आत्मना सह क्षै-अवसद्-नश् (प्रे.) ।

ले दे कर, मु., सर्वं संकलय्य २. कृच्छ्रेण, कथमपि ।

लेना एक न देना दो, मु., न कोऽप्यर्थः, न किमपि प्रयोजनम् ।

लेना देना, मु., दानादानं, आदानप्रदानं २. कौसीद्यं, वृद्धिजीवनम् ।

लेने के देने पड़ना, मु., भद्रस्याभद्रं फलं, इष्टाशायामनिष्टप्रसंगः ।

ले भागना, मु., सह नीत्वा पलाय् (भ्वा. आ. से.), अपहृ (भ्वा. प. अ.) ।

ले मरना, मु., दे. 'ले डूबना' ।

लेन्स, सं. पुं. (अं.) काचः ।

लेप, सं. पुं. (सं.) अभि,-अंजनं, उपदेहः, समालभः, उपनाहः, प्रलेपपट्टिका २. लेपनं, सुधा ३. लेपस्तरः ४. उद्वर्तनं, दे. 'उबटन' ५. संपर्कः, सम्बन्धः ।

—चढ़ाना, क्रि. स., दे. 'लीपना' ।

लेपक, सं. पुं. (सं.) लेपिन्, लेपकारः, पलगंडः, लेप्यकृत् ।

लेपन, सं. पुं. (सं. न.) दे. 'लिपाई' (१) ।

लेपना, क्रि. स., दे. 'लीपना' ।

लेपालक, सं. पुं. (हिं. लेना + पालना) दत्तकः, दे. ।

लेबुल, सं. पुं. (अं.) लेपपत्रम् ।
लेबोरेटरी, सं. स्त्री. (अं.) १. प्रयोगशाला, २. रसायनशाला ।
लेमोनेड, सं. पुं. (अं.) जंबीर,-पेयं-पानकम् ।
लेरुवा, सं. पुं. (सं. लेहः >) दे. 'बछड़ा' ।
लेवा, वि. (हिं. लेना) आ,-दातृ-दायक ।
—देवा, सं. पुं., आदानप्रदानम् ।
नाम—, सं. पुं., पुत्रः २. दायादः ।
लेश, सं. पुं. (सं.) दे. 'लव' २. चिन्हं, लक्षणं ३. संबंधः ४. अलंकारभेदः (सा०) २. अल्प, स्तोक ।
—मात्र, वि. (सं.) अणु-अल्प,-मात्र (-त्रा,-त्री स्त्री.) ।
लेस, सं. पुं., दे. 'लासा' (१) ।
—दार, वि. (हिं.+फ़ा.) दे. 'लसदार' ।
लेहन, सं. पुं. (सं. न.) जिह्वया स्वादनं-स्वदनं-रसनम् ।
लेहाज़ा, क्रि. वि. (अ.) अतः, अतएव ।
लेहिन, सं. पुं. (सं.) टंकणं-नं, रसशोधनः, विडम् ।
लेह्य, वि. (सं.) लेहनीय, लेटव्य । सं. पुं. (सं. न.)दे. 'अवलेह' २.लेहनीयाहारः ३. अमृतम् ।
लैन, सं. स्त्री., दे. 'लाइन' ।
लैसंस, सं. पुं (अं. लाइसेंस) अधिकारपत्रं, अनुज्ञालेखः ।
लैस, सं. पुं. (अं. लेस) सज्ज, सन्नद्ध, सिद्ध २. जालाभरणं, दे. 'फ़ीता' ।
लोंद, सं. पुं., दे. 'मलमास' ।
लोंदा, सं. पुं. (सं. लोष्टः-ष्टं) आर्द्र-,पिंडः (-डं)-घनः, छिन्नगोलः (-लं)-लोष्टः (-ष्टं) ।
लो, अव्य. (हिं. लेना) दृश्यतां, प्रेक्ष्यतां, अवलोक्यतां । (केवल इन्हीं रूपों में) ।
लोई[1], सं. स्त्री. (सं. लोमीय) लौमी, नीशारः, आविकं, ऊर्णायुः, कंबलभेदः ।
लोई[2], सं. स्त्री., दे. 'पेड़ा' (गूँधे हुए आटे का) ।
लोक, सं. पुं. (सं.) भुवनं, भूर्भुवःस्वरादयः चतुर्दशस्थानविशेषाः २. जगत् (न.), जगती, विश्वं, चराचरं, ब्रह्मांडं, भुवनं, विष्टपं ३. नि-आ,-वासः ४. दिशा, प्रदेशः ५. लोकः-काः, जनः-नाः ६. समाजः ७. प्राणिन् ।
—कंटक, सं. पुं. (सं.) जनपीडकः ।
—तंत्र, सं. पुं. (सं. न.) जन-प्रजा,-तंत्रम् ।
—त्रय, सं. पुं. (सं. न.) त्रिभुवनं, त्रैलोक्यं, त्रिलोकी ।
—नाथ, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. विष्णुः ३. शिवः ४. बुद्धः ५. लोकपालः ।
—पति, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. नृपः ३. लोकपालः ।
—परलोक, सं. पुं. (सं.-कौ) उभौ लोकौ, लोकद्वयम् ।
—पाल, सं. पुं. (सं.) दिक्पालः २. नृपः ।
—प्रवाद, सं. पुं. (सं.) जन-लोक,-रवः-श्रुतिः-(स्त्री.)-प्रवादः ।
—मर्यादा, सं. स्त्री. (सं.) लोक,-आचारः-व्यवहारः, जगद्रीतिः (स्त्री.) ।
—यात्रा, सं. स्त्री. (सं.) जीवनं, प्राणधारणं
—विश्रुत, वि. (सं.) जगद्विख्यात । २. व्यवहारः, लौकिककृत्यानि (न. बहु.) ।
—श्रुति, सं. स्त्री. (सं.) दे. 'लोकप्रवाद' ।
—संग्रह, सं. पुं. (सं.) लोक-जन,-रंजनं-प्रसादनं २. लोकहितैषणा ।
लोकांतर, सं. पुं. (सं. न.) पर-प्रेत,-लोकः ।
लोकाचार, सं. पुं. (सं.) जगद्रीतिः-रूढ़िः (स्त्री.), लौकिकं, लोक,-मार्गः व्यवहारः ।
लोकाट, सं. पुं. (चीनी लुः+क्यू) लवकटं, चैनम् ।
लोकालोक, सं. पुं. (सं.) चक्रवालः, पर्वत-विशेषः (पुराणं) ।
लोकैषणा, सं. स्त्री. (सं.) अभ्युदयाभिलाषः २. स्वर्गलिप्सा ।
लोकोक्ति, सं. स्त्री (सं.) आभाणकः, जनवादः, लौकिक,-न्यायः २. अलंकारभेदः (सा०) ।
लोकोत्तर, वि. (सं.) अलौकिक, अमानुष, अपार्थिव, लोकातिशायिन्, दिव्य, अति,-विलक्षण-अद्भुत ।
लोग, सं. पुं. (सं. लोकः) लोकः-काः, जनः-नाः, मानवाः, मनुष्या, नराः, मानुषाः, मर्त्याः, मनुजाः (सब बहु.) ।
लोच[1], सं. स्त्री. (हिं. लचक) दे. 'लचक' २. कोमलता, मृदुता ।
लोच[2], सं. पुं. [सं. रुचिः (स्त्री.)] अभिलाषः, इच्छा ।

लोचन, सं. पुं. (सं. न.) नयनं, नेत्रम्, दे. 'आँख'।

लोट, सं. स्त्री. (हिं. लोटना) लु(लो)ठनं, लोटनं, वेल्लनं, लुंठा,-लुंठा, लोठः।

—पोट, वि., लुटि(ठि)त, वेल्लित, स्खलित २. मुग्ध, वद्धभाव, अनुरागिन् ३. वि-,आकुल ४. व्यत्यस्त, विपर्यस्त।

—जाना, मु., मूर्च्छ् (भ्वा. प. से., मूर्च्छति) २. मृ (तु. आ. अ.) ३. विश्रम् (दि. प. से.) ४. चकितो मुग्धो वा भू।

—पोट होना, मु., (पीडादिभिः) वि-,लुठ् (तु. प. से.; भ्वा. आ. से.) २. भावं-अनुरागं बंध् (क्र्. प. अ.), ३. सहसा विलुठ्य वा मृ (तु. आ. अ.)।

—होना, मु., अनुरक्त-आसक्त (वि.) भू २. व्याकुलीभू।

लोटन, सं. पुं. (सं. न.) दे. 'लोट' २. *लोटनकपोतः ३. लांगलभेदः ४. मार्गशर्करा।

लोटना, क्रि. अ. (सं. लोटनं) लुट् (भ्वा. दि. प. से.), लुठ् (भ्वा. आ. से.; तु. प. से.) २. पार्श्वं परिवृत् (प्रे.) ३. आकुल-व्याकुल (वि.)भू। सं. पुं. तथा भाव, दे. 'लोट' सं. स्त्री.।

लोटा, सं. पुं. (हिं. लोटना) कमंडलुः, दे.।

लोढ़ा, सं. पुं. (सं. लोष्टः-ष्टं>) दे. 'वट्टा'।

लोथ-थि, सं. स्त्री. (सं. लोष्टः-ष्टं>) शवः, दे.।

—पोथ, मु., अति,-शिथिल-श्रांत-खिन्न।

लोथड़ा, सं. पुं. (हिं. लोथ) पलल-मांस,-पिंडः (डं)।

लोद-ध, सं. स्त्री. (सं. लोधः)(लाल) लोध्रः, रक्तः, मार्जनः, तिरीटः, तिंदुकः। (सफेद) शुक्लः, महा-शबरः,-लोध्रः, शावरः।

लोन, सं. पुं. (सं. लवणं) दे. 'नमक' २. लावण्यं, विशिष्टसौन्दर्यम्।

लोना, वि. (हिं. लोन) लवण दे. 'नमकीन' २. सुन्दर, चारु। सं. पुं., *कुडय-भित्ति,-लवणं ३. क्लवणितकुडयस्य धूलिः (स्त्री.)।

लोनिया, सं. पुं. (हिं. लोन) दे. 'लूनिया'। सं. पुं.।

लोप, सं. पुं. (सं.) वि-,नाशः, क्षयः, वि,-ध्वंसः २. अदर्शनं, तिरोभावः, अंतर्धानं ३. अभावः, अविद्यमानता ४. वर्णविनाशः (व्या.) ५. विच्छेदः, विरामः।

लोपामुद्रा, सं. स्त्री. (सं.) अगस्त्यमुनिपत्नी, लोपा, वरप्रदा, कौशीतकी।

लोबान, सं. पुं. (अ.) सुगंधिनिर्यासभेदः, *लोबानम्।

लोबिया, सं. पुं. (सं. लोभ्यः=मूँग) क्षुधाभिजनकः, चप(व)लः, चर्वरः, सुकुमारः, शिंबिका, दीर्घ,-शिम्बी-बीजः।

लोभ, सं. पुं. (सं.) परद्रव्याभिलाषः, गृध्या, गृध्नुता, स्पृहा, लौल्यं, लिप्सा, गर्द्धः, तृष्णा, कांक्षा, शंसा, लोलुपता-भता, इच्छा, वांछा, मनोरथः, अभिलाषः, कामः २. कार्पण्यं, कदर्यता।

लोभित, वि. (सं.) मोहित, आकृष्ट, हृतचित्त, लुब्ध, मुग्ध।

लोभी, वि. (सं.-भिन्) गृध्नु, गर्द्धन, लुब्ध, लोलुप-भ, लिप्सु, अभिलाषुक, तृष्णक।

लोम, सं. पुं. (सं.) लोमन् (न.) दे. 'रोंगटा' २. लांगूलं, पुच्छम्।

—हर्षण, सं. पुं. (सं. न.) रोमांचः, दे.। वि., दे. 'रोमहर्षण'।

लोमड़, सं. पुं. (सं. लोमः>) *लोमशः, *लोमाशः, दे. 'गीदड़'।

लोमड़ी, सं. स्त्री. (हिं. लोमड़) लोमशा, लोमाशिका, दे. 'गीदड़ी' (संस्कृत में गीदड़-लोमड़ तथा गीदड़ी-लोमड़ी के लिये समान शब्दों का ही प्रयोग होता है।)

लोमश, सं. पुं. (सं.) ऋषिविशेषः २. मेषः, दे. 'भेड़ा'। वि., बहुलोमान्वित, केशिन्, केशिक २. ऊर्णामय (-यी स्त्री.), और्ण (-र्णी स्त्री.)।

—मार्जार, सं. पुं. (सं.) गंधमार्जारः, पूतिकः, मूत्रपातनः।

लोरी, सं. स्त्री. (सं. लोल>) निद्रा-शयन,-गीतिका।

—देना, क्रि. स., निद्रा-गीतिकया स्वप् (प्रे.)।

लोल, वि. (सं.) सकंप, कंपमान, वेपमान,

कंपित, कंप्र २. चंचलचित्त ३. क्षणभंगुर, पल, क्षणिक ४. उत्सुक, उत्कंठित।

लोला, सं. स्त्री. (सं.) जिह्वा, रसना २. लक्ष्मीः-श्रीः (स्त्री.)।

लोलुप, वि. (सं.) दे. 'लोभी'।

लोलुपता, सं. स्त्री., दे. 'लोभ'।

लोशन, सं. पुं. (अं.) व्रणक्षालकं, धावनौषधं, *औषधजलम्।

लोष्ट, सं. पुं. (सं. पुं. न.) लोष्टुः, मृत्तिकाखंडं, दलिः (पुं. स्त्री.), दलनी २. अश्मखंडं-डः।

लोह, सं. पुं. (सं. लोहः-हं) लौहं, दे. 'लोहा' २. रुधिरं ३. रक्तछागः।

—कांत, सं. पुं. (सं.) अयस्कांतः, लोह-, चुंबकः।

—कार, सं. पुं. (सं.) अयस्कारः, दे. 'लुहार'।

—किट्ट, सं. पुं. (सं. न.) लोह,-मलं, मंडूरं, लोहज, कृष्णचूर्णं, अयो,-मलं-रजस् (न.)।

—चून, / **—चूर,** / **—चूर्ण,** सं. पुं. (सं. लोहचूर्ण) कालक्षोदः।

—द्रावी, सं. पुं. (सं.-विन्) लोहितः, टंकणं-नं, दे. 'सोहागा'।

लोहा, सं. पुं. (सं. लोहः-हं) कृष्ण-, अयस् (न.)-आयसं, कालं, कालायसं, लौहं, अश्म-गिरि,-सारः, दृढं, पिंडं २. अस्त्रं, शस्त्रं, ३. लोहमयद्रव्यम्। वि., रक्त, लोहित २. अति,-दृढ-कीकस।

लोहे का, वि., लौह (-ही स्त्री.), लोह-अयो,-मय (-यी स्त्री.), आयस (-सी स्त्री.), लोह-, आयस-,।

—गहना या लेना, मु., युध् (दि. आ. अ.) दे. 'लड़ना'।

—बजना, मु., युद्धं प्रवृत् (भ्वा. आ. से.)।

(किसीका)—मानना, मु., (अन्यस्य) प्रभुत्वं *स्वीकृ २. वि-परा,-जि (कर्म.)।

लोहे का चना, मु., सुदुष्करं कर्मन् (न.)।

लोहेकेचने चबाना, मु., सुदुष्करं कर्म संपद् (प्रे.)।

लोहार, सं. पुं. (सं. लोहकारः) दे. 'लुहार'।

—की स्याही, सं. स्त्री., दे. 'हीराकसीस'।

लोहित, वि. (सं.) रक्त, शोण। सं. पुं. (सं.) मंगलग्रहः, कुजः, भौमः २. रक्तवर्णः। (सं. न.) रक्तं, रुधिरम्।

लोहिया, सं. पुं. (हिं. लोहा.) लोहपण्य-विक्रेतृ, लोहविक्रयिन् २. लोहितर्षभः ३. लोह-गुलिका।

लोहू, सं. पुं. (सं. लोहितं) दे. 'रक्त' तथा 'लहू'।

लौं, अव्य. (हिं. लग) दे. 'तक' २. सदृश, तुल्य।

लौंग, सं. पुं. (सं. लवंगं) देवकुसुमं, श्री,-प्रसूनं-पुष्पं-संज्ञं, लवंगकं, दिव्यं, शेखरं, लवं २. लवंगं (घ्राणभूषणभेदः)।

लौंडा, सं. पुं. (हिं. लोना) (लावण्यविशिष्टः) बालकः-दारकः। वि., अबोध, अज्ञ २. चपल, चंचल।

—पन, सं. पुं., बाल्यं २. चांचल्यम्।

लौंडेबाज़, वि. (हिं+फ़ा.) पुंमैथुनकारिन्।

लौंडेबाज़ी, सं. स्त्री. (हिं.+फ़ा.) पुंमैथुनम्।

लौंडी-डिया, सं. स्त्री. (हिं.लौंडा) कन्या, कुमारी २. पुत्री ३. दासी।

लौ[1], सं. स्त्री. (हिं. लपट) कीलः-ला, अग्नि-ज्वाला(लः)ज्वाला, जिह्वा, शिखा २. दीपशिखा।

लौ, सं. स्त्री. (हिं. लाग) अभिलाषः, रागः २. चित्त-मनो,-वृत्तिः (स्त्री.) ३. कामना, वांछा।

—लीन, वि. (सं.) मग्न, आसक्त, निरत।

—लगना, क्रि. अ., उद्यत (वि.) भू २. (भक्त्यादिषु) लीन-मग्न निरत (वि.) भू।

—लगाना, क्रि. स., सततं अभिलष् (भ्वा. प. से.) २. आत्मानं भक्त्यादिषु निमस्ज्-आसंज् (प्रे.) ३. आम्रेड् ((प्रे.)।

लौकिक, वि. (सं.) सांसारिक, ऐहिक, प्रापंचिक, लौक्य २. व्यावहारिक, आचारिक।

लौकी, सं. स्त्री. (सं. लावुः-बूः दोनों स्त्री.) अलावुः-बूः (स्त्री.), दे. 'कद्दू'।

लौटना, क्रि. अ. (हिं. उलटना) दे. 'वापस आना' तथा 'वापस जाना'।

लौटफेर, सं. पुं. (हिं. लौटना+फेरना) बृहत्-महा,-परिवर्तः-परिवर्तनम्।

लौटाना, क्रि. स., दे. 'वापस करना'।

लौह, सं. पुं. (सं. न.) दे. 'लोहा' (१)। वि., दे. 'लोहे का' ('लोहा' में)।

व

व, देवनागरीवर्णमालाया ऊनत्रिंशो व्यंजनवर्णः. वकारः।

वंक, वि. (सं.) अराल, वृजिन, कुंचित, वक्र, आनत, जिह्म, वेल्लित, आभुग्न, कुटिल। सं. पुं. (सं.) नदीवक्रम्।

वंग, सं. पुं. [सं. वंगाः (पुं. बहु.)] वंगप्रांतः (=बंगाल)। (सं. न.) त्रपुः, त्रपु (न.), रंगं, नागजं, कस्तीरं २. सीसं-सकं, सीसपत्रम्।

—भस्म, सं. पुं. [सं.-भस्मन् (न.)] रंगभस्मन् (न.)।

वंचक, वि. तथा सं. पुं. (सं.) कपटिन्, प्रतारक(:), धूर्त (:)।

वंचना, सं. स्त्री. (सं.) वंचनं, प्रतारणं-णा, माया, कपटं, कैतवं, वंचथः।

वंचित, वि. (सं.) प्रतारित, विप्रलब्ध २. हीन, रहित।

वंदन, सं. पुं. (सं. न.) वंदना, प्रणामः, प्रणतिः (स्त्री.), नमस्कारः २. पूजा, अर्चा, आराधना २. स्तुतिः-नुतिः (स्त्री.)।

—वार, सं. स्त्री. (सं. वंदनमाल्यं) वंदनमालालिका, तोरणस्रज् (स्त्री.)।

वंदना, सं. स्त्री. (सं.) दे. 'वंदन' (१-३)।

वंदनीय, वि. (सं.) नमस्य, वंद्य २. पूज्य, अर्चनीय ३ स्तुत्य, न(ना)व्य।

वंदी, सं. पुं. (सं.-दिन्) स्तुतिपाठकः, मा(म)गधः, चारणः, वंदथः २. कारागुप्तः, वंदी-दिः (स्त्री.)।

—गृह, सं. पुं. (सं. न.) कारा, कारा,-गृहं-गारम्।

वंद्य, वि. (सं.) दे. 'वंदनीय'।

वंध्या, सं. स्त्री. (सं.) दे. 'बंध्या'।

वंश, सं. पुं. (सं.) कुलं, अन्वयः, अन्ववायः, गोत्रं, अभिजनः २. जातिः (स्त्री.), वर्गः ३. कुटुंबं, गृहजनः, पुत्रकलत्रादीनि (न. बहु.) ४. वेणुः, दृढग्रंथिः, दे. 'बांस'। ५. मुरली, वंशी ६. पृष्ठास्थि (न.), पृष्ठवंशः ७. भुजादीनां लंबास्थि (न.)।

—ज, सं. पुं. (सं.) पुत्रः २. संतानः।

—धर, सं. पुं. (सं.) वंशजः, संततिः (स्त्री.)।

—लोचन, सं. पुं. [सं.-नो(रो)चना] वंशशर्करा, वंशजं-जा, वांशी, शुभा।

—हीन, वि. (सं.) निर्वंश २. अपुत्र।

वंशावली, सं. स्त्री. [सं.-ली-लि (स्त्री.)] वंश,-क्रमः-श्रेणी-परंपरा।

वंशी, सं. स्त्री. (सं.) वंशिका, मुरली दे.।

—धर, सं. पुं. (सं.) मुरलीधरः, श्रीकृष्णः

व, अव्य. (फ़ा.) च, दे. 'और'।

वक, सं. पुं. (सं.) दे. 'बगला' २. राक्षसविशेषः।

—वृत्ति, सं. स्त्री. (सं.) बिडालवृत्तिः, दंभः।

वकालत, सं. स्त्री. (अ.) अभिभाषकता-त्वं, वाक्कीलत्वं, व्यवहारदर्शकता-त्वं २. परप्रातिनिध्यं, परकार्यसाधकत्वं ३. दूतकर्मन् (न.) ४. परपक्षमंडनम्।

—करना, क्रि. अ., परपक्षं समर्थ् (चु.) २. अभिभाषकवृत्ति उपजीव् (भ्वा. प. से.)।

—नामा, सं. पुं. (अ.+फ़ा.) अभिभाषकतापत्रम्।

वकील, सं. पुं. (अं.) अभिभाषकः, व्यवहारदर्शकः, वाक्कीलः, पक्षवादिन् २. राज-,दतः ३. प्रतिनिधिः, प्रतिहस्तकः ४. पर-पक्षपोषकः।

वकुल, सं. पुं. (सं.) दे. 'बकुल'।

वक़ूफ़, सं. पुं. (अ.) ज्ञानं २. बुद्धिः (स्त्री.)।

बे—, वि. (फ़ा.+अ.) निर्बुद्धि।

वक्त, सं. पुं. (अ.) समयः, कालः २. अवसरः ३. अवकाशः ४. ऋतुः ५. मृत्युकालः।

—की चीज़, सं. स्त्री., कालानुकूलो रागः।

—बे वक्त, क्रि. वि., कालेऽकाले वा, समयेऽसमये वा।

—काटना, मु., येन केन प्रकारेण कालं या (प्रे. यापयति) २. मनो विनुद् (प्रे.)।

—पड़ना, मु., आपद् आपत् (भ्वा. प. से.)-उपनम् (भ्वा. प. अ.)।

वक्तन् फ़ौक़्तन, क्रि. वि. (अ.) कदा कदा, यदा कदा २. यथाकालम्।

वक्तव्य, वि. (सं.) कथनीय, वचनीय २. हीन,

कुत्सित। सं. पुं. (सं. न.) कथनं, वचनं २. व्याख्यानम्।

वक्ता, सं. पुं. (सं. वक्तृ) वाग्मिन्, वाक्पटुः २. व्याख्यातृ, उपदेशकः ३. कथ(थि)कः।

वक्तृता, सं. स्त्री. (सं.) वक्तृत्वं, वाग्मिता, वाक्पाटवं, भाषणकौशलं २. व्याख्यानं, भाषणं, कथनम्।

वक्फ़, सं. पुं. (अ.) परोपकाराय दानं २. धर्मार्थं उत्सृष्टा संपद् (स्त्री.)।

—नामा, सं. पुं. (अ+फ़ा.) दानपत्रम्।

वक़्फ़ा, सं. पुं. (अ.) अवकाशः २. उद्योग-विश्रांतिः (स्त्री.)।

वक्र, वि. (सं.) दे. 'वंक' २. छलिन्, कपटिन्, धूर्त्त। (सं. पुं.) शनैश्चरः २. मंगलः, भौमः। (सं. न.) नदीवक्रं, वंकः।

—गामी, वि. (सं.) कुटिलगति २. शठ, कुटिल।

—तुंड, सं. पुं. (सं.) गणेशः २. शुकः।

वक्रता, सं. स्त्री. (सं.) जिह्मता, आनतिः (स्त्री.), कौटिल्यं २. छलं, कपटं, शाठ्यम्।

वक्रोक्ति, सं. स्त्री. (सं.) काकूक्तिः (स्त्री.) २. शब्दालंकारभेदः (सा.) ३. चमत्कृत-कुटिल,-उक्तिः (स्त्री.)।

वक्षःस्थल, सं. पुं. (सं. न.) उरस्-वक्षस् (न.), अंकः, उत्संगः, उरःस्थलम्।

वग़ैरह, अव्य. (अ.)-आदि,-प्रभृति।

वचन, सं. पुं. (सं. न.) भाषा, सरस्वती, वाणी दे. २. उक्तिः (स्त्री.), कथनं, भाषणं, वाक्यं ३. एकत्वादिबोधकः शब्दरूपभेदः (व्या.) ४. प्रतिज्ञा, संगरः।

वजह, सं. स्त्री. (अ.) कारणं, हेतुः।

वज़न, सं. पुं. (अ.) भारः, गुरुत्वम्।

वज़नी, वि. (अ. वज़न) भारवत्, गुरु २. मान्य, प्रभावशालिन्।

वज़ा, सं. स्त्री. (अ. वज़अ) रचना २. आकृतिः (स्त्री.) ३. आचारः, व्यवहारः ४. दशा ५. रीतिः (स्त्री.)।

वज़ारत, सं. स्त्री. (अ.) साचिव्यं, अमात्यत्वं, मंत्रित्वम्।

वज़ीफ़ा, सं. पुं. (अ.) (छात्र)-वृत्तिः-भृतिः (स्त्री.)।

वज़ीर, सं. पुं. (अ.) अमात्यः, सचिवः, मंत्रिन्, मंत्रधरः, मंत्रज्ञः, धी-बुद्धि,-सहायः।

वज़ीरी, सं. स्त्री., दे. 'वज़ारत'।

वज़ू, सं. पुं. (अ.) प्रार्थनायाः पूर्वं अंग-प्रक्षालनं (इस्लाम), *अङ्गस्पर्शः।

वजूद, सं. पुं. (अ.) अस्तित्वं, सत्ता २. शरीरं ३. सृष्टिः (स्त्री.) ४. अभिव्यक्तिः (स्त्री.)।

वज्र, सं. पुं. (सं. पुं. न.) कुलिशं, पविः, अशनिः (पुं. स्त्री.), दंभोलिः, ह्रादिनी, शतधारं, अभ्रोत्थं, शंवः, गिरिकंटकः २. हीरः-रं, हीरकः, रत्नं २. विद्युत् (स्त्री.)। वि., अति,-दृढ़-संहत-कीकस-कठिन, दुर्भेद्य २. घोर, भीषण।

—धर, सं. पुं. (सं.) इंद्रः, वज्रिन्, वज्र,-पाणिः-बाहुः-मुष्टिः।

—पात, सं. पुं. (सं.) वज्राघातः।

—मय, वि. (सं.) दे. 'वज्र' वि.(१)।

—हृदय, वि. (सं.) पाषाणहृदय, निष्करुण, निर्दय।

वट, सं. पुं. (सं.) न्यग्रोधः, वृक्षनाथः, रक्त-फलः, क्षीरिन्, जटालः, अवरोही, महाच्छायः।

वटी, सं. स्त्री. (सं.) गुली-लिका, वटिका, निस्तली, दे. 'गोली'।

वटु, वटुक, } सं. पुं. (सं.) बालकः, माणवकः २. वर्णिन्, ब्रह्मचारिन्।

वड़ी, सं. स्त्री. (सं. वटी) माषवटी।

वणिक, सं. पुं. (सं. वणिज्) पण्याजीवः, क्रयविक्रयिकः २. वैश्यः।

वतन, सं. पुं. (अ.) जन्म,-भूः-भूमिः (दोनों (स्त्री.), स्वदेशः २. निवासस्थानं ३. जन्म-स्थानम्।

वतीरा, सं. पुं. (अ.) प्रथा, रीतिः (स्त्री.) २. आचारः, वृत्तम्।

वत्स, सं. पुं. (सं.) गोशिशुः, तर्णकः, दोघः-षकः, तंतुभः २. शिशुः, बालकः।

वत्सतर, सं. पुं. (सं.) दम्यः, दुर्दांतः, गडिः।

वत्सतरी, सं. स्त्री. (सं.) त्रिहायणी गौः (स्त्री.)।

वत्सर, सं. पुं. (सं.) अब्दः, हायनः, वर्षम्।

वत्सल, वि. (सं.) अपत्यानुरागिन्, संतान-स्नेहिन्, पुत्रप्रेमिन् २. स्नेहिन्, प्रेमिन्।

वत्सलता, सं. स्त्री. (सं.) (सन्तानादिकस्य) अनुरागः-स्नेहः।

वदान्य, वि. (सं.) बहुप्रद, दानशील, उदार २. वल्गुवाच् , मधुरभाषिन् ।

वदन, सं. पुं. (सं. न.) मुखं, आननम् ।

वध, सं. पुं. (सं.) घातः, हननं, हत्या, विशसनं, प्रमाथः, संहारः ।

वधक, सं. पुं. (सं.) नरघातकः, हंतृ, हिंसकः २. व्याधः, शाकुनिकः ३. मृत्युः ।

वधू, **वधूटी**, सं. स्त्री. (सं.) नवोढ़ा, नववधूः, पाणिगृहीता २. पत्नी ३. पुत्रवधूः ।

वध्य, वि. (सं.) वधार्ह, शीर्षच्छेद्य, हंतव्य ।

वन, सं. पुं. (सं. न.) अरण्यं, विपिनं, अटवी; काननं, गहनं, द(दा)वः, कांतारं २. वाटिका ३. जलम् ।

—चर, सं. पुं. (सं.) वन,-चारिन्-विहारिन् २. वन्य,-पशुः-मनुष्यः ।

—माली, सं. पुं. (सं.) श्रीकृष्णः २. वनपुष्पमालाधारिन् ।

—राज, सं. पुं. (सं.) सिंहः ।

—वास, सं. पुं. (सं.) विपिनवसतिः (स्त्री.)।

—वासी, सं. पुं. (सं.-सिन्) आटविकः, वनेचरः, वनौकस्, वनिन् ।

—स्थली, सं. स्त्री. (सं.) कानन-भूमिः, अरण्यप्रदेशः ।

वनस्पति, सं. स्त्री. (सं. पुं.) पुष्पहीनः फलिवृक्षः (उ. बड़, पीपल आदि) २. वृक्षः, पादपः ३. वटः, न्यग्रोधः ।

—शास्त्र, सं. पुं. (सं. न.) वनस्पतिविज्ञानम् ।

वनिता, सं. स्त्री. (सं.) नारी, रमणी २. प्रिया, कांता ।

वनी, सं. स्त्री. (सं.) वनं, दे. ।

वनी, सं. पुं. (सं.-निन्) वानप्रस्थः दे. २. दे. 'वनवासी' ।

वन्य, वि. (सं.) वन,-उद्भव-उद्भूत-जात, आरण्यक, जांगल २. असभ्य, अशिष्ट ३. क्रूर, हिंस्र ।

वपन, सं. पुं. (सं. न.) केशमुंडनं २. बीजाधानम् ।

वपा, सं. स्त्री. (सं.) मेदस् (न.), वसा ।

वपु, सं. पुं. [सं. वपुस् (न.)] शरीरम् ।

वप्र, सं. पुं. (सं. पुं. न.) वरणः, सालः, प्राकारः २. क्षेत्रं ३. धूलिः (स्त्री.) ४. तुंगतटः ५. गिरिशिखरं ६. वल्मीकः-कं, मृत्तिकाचयः ।

—क्रीडा, सं. स्त्री. (सं.) वप्रक्रिया ।

वफ़ा, सं. स्त्री. (अ.) प्रतिज्ञापालनं २. आज्ञा,-कारिता-अनुसरणं-पालनं ३. विश्वसनीयता ४. सुशीलता ।

—दार, वि. (अ.+फ़ा.) विश्वसनीय, विश्वास्य, स्वामिभक्त २. आज्ञा,-कारिन्-पालक ३. कर्तव्यपालक ।

—दारी, सं. स्त्री. (अ.+फ़ा.) दे. 'वफ़ा' ।

वबा, सं. स्त्री. (अ.) महा-,मारी, जन-, मारः, मारिका २. स्पर्शसंचारिरोगः ।

वबाल, सं. पुं. (अ.) भारः, भरः २. कष्टं, विपद् (स्त्री.) ।

वमन, सं. पुं. (सं. न.) वमः, वमिः (स्त्री.), छर्दनं, छर्दिका २. वांत-वमन,-द्रव्यम् ।

—करना, क्रि. स., उद्-,वम् (भ्वा. प. से.), छर्द् (चु.) ।

वयःसंधि, सं. स्त्री. (सं. पुं.) बाल्ययौवनमध्यकालः ।

वय, सं. स्त्री. [सं. वयस् (न.)] आयुस् (न.), वयःक्रमः, अतीतजीवनकालः ।

वयस्क, वि. (सं.) प्रौढ, प्राप्तव्यवहारः, दे. 'बालिग़' ।

वयस्य, सं. पुं. (सं.) समवयस्क २. मित्रं, सखि (पुं.) ।

वयस्या, सं. स्त्री. (सं.) सखी दे. ।

वयोवृद्ध, वि. (सं.) स्थविर, जरठ-ण, जरित-न, वृद्ध ।

वरंच, अव्य. (सं.) अपि तु, दे. 'बल्कि' २. परंतु, किंतु ।

वर, सं. पुं. (सं.) वृतिः (स्त्री.), तपोभिः देवेभ्यो याचितो मनोरथः २. (देवादीनां) अनुग्रहः, प्रसादः, आशिस् (स्त्री.) ३. जामातृ ४. परिणेतृ, वोढृ ५. पतिः, भर्तृ । वि. (सं.)- उत्तम,-श्रेष्ठ (उ. ऋषिवरः = ऋषिश्रेष्ठः) ।

—मांगना, क्रि. स., वरं याच् (भ्वा. आ. से.) वृ (स्वा. उ. से.)-वृ (क्र्. उ. से.) ।

—दान, सं. पुं. (सं.) मनोरथपूरणं, अभीष्टप्रदानं २. दे. 'वर' (२) ।

—दायक, सं. पुं. (सं.) वर-दः-प्रदः-दातृ, वांछितार्थदः, समर्द्धकः।
—यात्रा, सं. स्त्री. (सं.) *जनेतं, परिणेतृ-प्रस्थानम्। दे. 'बरात'।
—वर्णिनी, सं. स्त्री. (सं.) वर,-अंगना-नारी, सुंदरी।
वरक़, सं. पुं. (अ.) (पुस्तक-) पत्रं-पर्णं २-३. सुवर्ण-रजत,-पत्रम्।
वरगलाना, क्रि. स. (फ़ा. वरग़लानीदन) प्रलुभ्-विमुह् (प्रे.) २. प्रतृ-वंच् (प्रे.)।
वरज़िश, सं. स्त्री. (फ़ा.) व्यायामः, दे.।
वरण, सं. पुं. (सं. न.) वृतिः (स्त्री.), उद्ग्रहणं २. भर्तृत्वेनांगीकरणं, पतित्वेन स्वीकरणं ३. पूजा ४. आवरणं, आच्छादनम्।
वरद, सं. पुं. (सं.) दे. 'वरदायक' ('वर' के नीचे)।
वरदी, सं. स्त्री. (अ.) *नियतपरिधानं, विशिष्ट-वर्गीय-वेषः।
वरन्, अव्य. (सं. वरं >) अपि तु।
वरना, अव्य. (अ.) अन्यथा, इतरथा, नो चेत्।
वराटिका, सं. स्त्री. (सं.) कपर्दिका, दे. 'कौड़ी'।
वरानना, सं. स्त्री. (सं.) सुंदरी, वरवर्णिनी, सुवदना-नी।
वराह, सं. पुं. (सं.) शूकरः, दे. 'सूअर' २. विष्णुः, विष्णोरवतारविशेषः।
वरिष्ठ, वि. (सं.) उत्तम, श्रेष्ठ, पूज्यतम।
वरुण, सं. पुं. (सं.) पाशिन्, प्रचेतस्, अप्-अपां,-पतिः, जलेश्वरः, मेघनादः २. जलं ३. सूर्यः ४. ग्रह-विशेषः (अं. नेपच्यून)।
वरुणालय, सं. पुं. (सं.) सागरः।
वरूथिनी, सं. स्त्री. (सं.) सेना, सैन्यम्।
वरे, क्रि. वि. [सं. अवारतः (अव्य.)] इतः, एतत्स्थानं प्रति, अत्र २. समीपं-पे-पतः, अंतिकं के (सब १-२. अव्य.)।
वरेण्य, वि. (सं.) प्रधान, मुख्य २. वरणीय, सत्कार्य।
वर्कशाप, सं. स्त्री. (अं.) प्रावेशनं, शिल्प,-शालं-शाला।
वर्ग, सं. पुं. (सं.) (सजातीयानां) गणः, जातिः (स्त्री.), समूहः, श्रेणी-णिः (स्त्री.) २. समस्थानवत् व्यंजनपंचकं (उ. कवर्गः, इ.) ३. अध्यायः, परिच्छेदः ४. सम,-चतुर्भुज-चतुरस्र ५. समद्विघातः, वर्गफलं, कृतिः (स्त्री.) (उ. ३×३=९ वर्गांकः)।
—फल, सं. पुं. (सं. न.) दे. 'वर्ग' (५)।
—मूल, सं. पुं. (सं. न.) पूरितसमानांकद्वय-स्यान्यंकः, पदं (उ. ९ का वर्गमूल = ३)।
वर्चस्, सं. पुं. (सं. न.) तेजस् (न.), कांतिः (स्त्री.)।
वर्चस्वी, वि. (सं.-स्विन्) तेजस्विन्, कांतिमत्।
वर्जन, सं. पुं. (सं. न.) त्यागः २. निषेधः।
वर्जनीय, वि. (सं.) त्याज्य, हेय, वर्ज्य २. निषेधार्ह।
वर्जित, वि. (सं.) त्यक्त, उत्सृष्ट २. निषिद्ध, हेय।
वर्ण, सं. पुं. (सं.) आर्याणां ब्राह्मणादिविभाग-चतुष्टयं, जातिः (स्त्री.) २. रंगः, रागः ३. प्रकारः, विधा ४. अक्षरं ५. रूपं, आकारः।
—धर्म, सं. पुं. (सं.) ब्राह्मणादिकर्तव्यकलापः।
—नाश, सं. पुं. (सं.) वर्ण-अक्षर,-लोपः-पातः (निरुक्तः) (उ., पृषतोदर से पृषोदर)।
—माला, सं. स्त्री. (सं.) वर्णसमाम्नायः, अक्षरश्रेणी (उ. अ से ह तक)।
—विकार, सं. पुं. (सं.) अक्षरविक्रिया (निरुक्त) (उ. गाली से गारी)।
—विचार, सं. पुं. (सं.) व्याकरणांगविशेषः, शिक्षा।
—विपर्यय, सं. पुं. (सं.) अक्षरव्यत्यासः (निरुक्त; उ. हिंस से सिंह)।
—वृत्त, सं. पुं. (सं. न) अक्षरछंदस् (न.)।
—श्रेष्ठ, सं. पुं. (सं.) ब्राह्मणः।
—संकर, सं. पुं. (सं.) वर्ण-जाति,-मिश्रणं २. मिश्रजः, संकरजः, सांकरिकः।
—हीन, वि. (सं.) बहिष्कृत, अपांक्तेय।
वर्णन, सं. पुं. (सं. न.) निरूपणं, विवरणं, व्याख्यानं, सविस्तरकथनं, वर्णना २. स्तवनं, गुणकथनं ३. रंजनं, चित्रणम्।
—करना, क्रि. स., विवृ (स्वा. उ. से.), निरूप् वर्ण् (चु.), सविस्तरं कथ् (चु.), व्याख्या (अ. प. अ.)।
वर्णनीय, वि. (सं.) वर्णयितव्य, निरूपयितव्य, व्याख्येय, वर्ण्य।
वर्णित, वि. (सं.) निरूपित, व्याख्यात २. उक्त, कथित।

वर्णी, सं. पुं. (सं.-र्णिन्) ब्रह्मचारिन् २. लेखकः ३. चित्रकारः ।

वर्तन, सं. पुं. (सं. न.) व्यवहारः, वृत्तं, चेष्टितं, आचरणं २. वृत्तिः (स्त्री.), आ-उप,-जीविका ३. पात्रम्, भाजनं, दे. 'बर्तन' ।

वर्तमान, वि. (सं.) प्रचरि(लि)त, प्रचल, सर्वसंमत २. उपस्थित, विद्यमान ३. आधुनिक(-की), अधुना-इदानीं,-तन(-नी स्त्री.)। सं. पुं. (सं.) क्रियायाः कालभेदः (व्या.) २. वृत्तांतः ३. प्रचलितव्यवहारः ।

वर्ती, सं. स्त्री. (सं.) वर्तिः-र्तिका (स्त्री.), दे. 'बत्ती' २. शलाका ।

—वर्ती, वि. (सं.-र्तिन्)-स्थ,-वासिन् ।

वर्तुल, वि. (सं.) गोल, मंडल-चक्र,-आकार ।

वर्दी, सं. स्त्री., दे. 'वरदी' ।

वर्द्धन, सं. पुं. (सं. न.) वृद्धिः-उन्नतिः (स्त्री.) २. समृद्धिः (स्त्री.) ।

वर्मा, सं. पुं. (सं. वर्मन्) क्षत्रियोपाधिः ।

वर्वर, सं. पुं. (सं.) देशविशेषः २. वर्वरवासिन् ३. असभ्यः, ग्राम्यः ४. म्लेच्छः, वर्वरः, वर्वरः, अनार्यः ।

वर्ष, सं. पुं. (सं. पुं. न.) अब्दः, हायनः, समा, शरद् (स्त्री.), सं,-वत्सरः, संवत् (अव्य.) २. मेघः ३. वृष्टिः (स्त्री.) ४. महाभूभागः ।

—गांठ, सं. स्त्री. (सं.+हिं.) वर्षवृद्धिः (स्त्री.), जन्म,-दिवसः-दिनं-तिथिः ।

—फल, सं. पुं. (सं. न.) वार्षिकग्रह-फल-दर्शिका पत्रिका ।

वर्षा, सं. स्त्री. [सं. वर्षाः (स्त्री. बहु.)] प्रावृषा-ष् (स्त्री.), मेघागमः, घनकालः, जलार्णवः, घनाकरः २. वृष्टिः (स्त्री.), वर्षः-र्ष-र्षणं, गोघृतं, परामृतम् ।

—होना, क्रि. अ., वृष् (भ्वा. प. से.), वृष्टिः भू । मु., अतिमात्रं अवपत् (भ्वा. प. से.) ।

—काल, सं. पुं. (सं.) दे. 'वर्षा' (१) ।

वलद, सं. पुं. (अ. वल्द) पुत्रः २. संतानः ।

वलय, सं. पुं. (सं. पुं. न.) कटकः, आवापकः २. वेष्टनं ३. मंडलम् ।

वलयित, वि. (सं.) परिवेष्टित, परिवृत ।

वलवला, सं. पुं. (अ.) उत्साहः, औत्सुक्यम् ।

वलाहक, सं. पुं. (सं.) मेघः, जलदः २. पर्वतः ।

वलि, सं. स्त्री. (सं.) दे. 'वली' ।

वलित, वि. (सं.) न(ना)मित, आभुग्न २. आवर्जित, प्रह्व ३. वलयित, दे. ४. वलीमत्, वलिभ, वलिन ५. आच्छादित ६. सहित ७. लग्न ।

वली, सं. स्त्री. (सं.) वलिः (स्त्री.), वली-लिः (स्त्री.), दे. 'झुर्री' २. श्रेणी, अवली-लिः (स्त्री.) ३. रेखा ४. पुटः, भंगः ।

वली, सं. पुं. (अ.) स्वामिन्, प्रभुः २. शासकः ३. साधुः ।

—अहद, सं. पुं. (अ.) युवराजः ।

वल्कल, सं. पुं. (सं. पुं. न.) वल्कः-कं, वृक्षत्वचा-च् (स्त्री.), चोचं, शल्कं, छल्ली २. वल्कल-वल्क, वसनं-वस्त्रम् ।

वल्द, सं. पुं. (अ.) दे. 'वलद' ।

वल्दियत, सं. स्त्री. (अ.) पितृनामन् (न.) ।

वल्मीक, सं. पुं. (सं.) वामलूरः, वल्मकूटं, कृमिशैलकः, नाकुः २. वाल्मीकिः मुनिः ।

वल्लभ, वि. (सं.) प्रियतम, दयित । सं. पुं. (सं.) नायकः, प्रियतमः, कांतः २. पतिः, भर्तृ ।

वल्लभा, वि. (सं.) प्रियतमा, कांता, दयिता । सं. स्त्री. (सं.) प्रिय-, पत्नी-भार्या ।

वल्लरी-रि, सं. स्त्री. (सं.) लता, वल्ली-लिः (स्त्री.) २. मंजरी ।

वशंवद, वि. (सं.) वश-वर्तिन्-अनुग, आज्ञाकारिन् । सं. पुं. (सं.) सेवकः, दासः ।

वश, सं. पुं. (सं. पुं. न.) अधिकारः, प्रभुत्वं २. शक्तिः (स्त्री.), प्रभावः, सामर्थ्यं ३. अधीनता, आयत्तता ४. इच्छा, कामना । वि. (सं.) अधीन, आयत्त ।

—(में) करना, क्रि. स., वशीकृ, दम् (प्रे. ; दि. प. से.), वशं नी (भ्वा. प. अ.), नियम् (भ्वा. प. अ.) ।

—वर्ती, वि. (सं.-र्तिन्) वशग, वशानुग,-वश,-अधीन,-आयत्त, परतंत्र ।

वशिष्ठ, सं. पुं., दे. 'वसिष्ठ' ।

वशी, वि. (सं.-शिन्) जितात्मन्, संयमिन् २. अधीन,-आयत्त ३. शक्तिमत्, समर्थ ।

वशीकरण, सं. पुं. (सं. न.) (मणिमंत्रौषधादिभिः) स्वायत्तीकरणं २. दमः-मनं, निग्रहः-हणं, वशीकारः।

वशीकृत, वि. (सं.) वशं नीत २. मंत्रमोहित ३. मुग्ध।

वशीभूत, वि. (सं.) अधीन, आयत्त २. परवशग।

वश्य, वि. (सं.) विनेय, शिक्ष्य, दम्य।

वषट्, अव्य. (सं.) देवनिमित्तकहविस्त्यागमंत्रः।

—कार, सं. पुं. (सं.) होमः, देवयज्ञः।

वसंत, सं. पुं. (सं.) ऋतुराजः, दे. 'वसंत' २. शीतलारोगः ३. मसूरिकारोगः ४. रागभेदः ५. तालभेदः।

—तिलक, सं. पुं. (सं.-कः-कं-का) वर्णवृत्त-भेदः।

—पंचमी, सं. स्त्री. (सं.) श्रीपंचमी, माघशुक्लपंचमी।

वसंती, वि., दे. 'वसंती'।

वसती, सं. स्त्री. (सं.) वसतिः-वस्तिः (स्त्री.), नि-, वासः २. गृहं, सद्मन् (न.)।

वसन, सं. पुं. (सं. न.) वस्त्रं, वासस् (न.)।

वसिष्ठ, सं. पुं. (सं.) ऋषिविशेषः २. सप्तर्षिमंडलांतर्गतो नक्षत्रविशेषः।

वसोका, सं. पुं. (अ.) समय-प्रतिज्ञा-संविद्,-लेखः-पत्रम्।

—नवीस, सं. पुं. (अ.+फ़ा.) दे. 'अर्ज़ीनवीस'।

वसीयत, सं. स्त्री. (अ.) (मरणासन्नस्य) अंत्यादेशः २. रिक्थविभागव्यवस्था।

—नामा, सं. पुं. (अ.+फ़ा.) मृत्यु,-पत्रं-लेखः।

—करना, क्रि. स., मृत्युपत्रेण दा (जु. उ. अ.)-ऋ (प्रे., अर्पयति)।

वसीला, सं. पुं. (अ.) उपायः, साधनं, २. साहाय्यं ३. संबंधः।

वसुंधरा, सं. स्त्री. (सं.) वसुधा-दा, पृथिवी, दे.।

वसु, स. पुं. (सं. न.) धनं २. रत्नं ३. सुवर्णं ४. जलम्। (सं. पुं.) गणदेवताविशेषः, अष्टवसवः (धरो ध्रुवश्च सोमश्च विष्णुश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ क्रमात् स्मृताः) २. वकवृक्षः ३. रश्मिः। अष्ट इति संख्या ४. सूर्यः ५. विष्णुः ६. सज्जनः।

वसुदेव, सं. पुं. (सं.) कृष्णपितृ, आनकदुंदुभिः।

वसुधा, सं. स्त्री. (सं.) वसुदा, वसुमती, पृथिवी, दे.।

वसूल, वि. (अ.) प्राप्त, लब्ध २. समाहृत।

वसूली, सं. स्त्री. (अ. वसूल) प्राप्तिः (स्त्री.), अधिगमः २. समाहारः।

वस्ति, सं. स्त्री. (सं. पुं. स्त्री.) नाभेरधोभागः, दे. 'पेडू' २. मूत्राशयः ३. रेचनयंत्रं, शृङ्गकः-कं; दे. 'पिचकारी'।

—कर्म, सं. पुं. [सं.-र्मन् (न.)] यंत्रेण मलमूत्रनिष्कासनम्।

वस्तु, सं. स्त्री. (सं. न.) पदार्थः, द्रव्यं २. सत्यं ३. वृत्तांतः ४. नाटकीयाख्यानं, कथावस्तु (न.)।

वस्तुतः अव्य. (सं.) यथार्थतः, तत्त्वतः, याथार्थ्येन, सत्यं, यथार्थम्।

वस्त्र, सं. पुं. (सं. न.) नि-,वसनं, वासस् (न.), आच्छादनं, चेलः-लं, अंशुकं, अंबरं, पटः, सिचयः, परिधानं, छादं, वासं, कर्पटः।

वस्फ़, सं. पुं. (अ.) सद्-,गुणः, विशेषः, धर्मः २. स्तुतिः (स्त्री.)।

वस्ल, सं. पुं. (सं.) संगमः, समागः, मिलनम्।

वह, सर्व. (सं. सः) तद् तथा अदस् के रूप। [उ. सः, असौ (पुं.); सा, असौ (स्त्री.); तद्, अदः (न.)]।

वहन, सं. पुं. (सं. नः) प्रापणं, स्थानांतरे नयनं, २. धारणं, उत्थापनम्।

वहम, सं. पुं. (अ.) भ्रमः, भ्रांतिः (स्त्री.) २. मिथ्या,-शंका-संदेहः ३. मिथ्याधारणा ४. व्याधिकल्पना, कुक्षिरोगः।

वहमी, वि. (अ. वहम) संशयात्मन्, शंकाशील, आशंकिन्।

वहशी, वि. (अ.) वन्य, आरण्य २. असभ्य, अशिष्ट ३. दुर्दांत, दुर्दमनीय।

वहाँ, क्रि. वि. (हिं. वह) तत्र, तस्मिन् स्थाने।

—से, क्रि. वि., ततः, तस्मात् स्थानात्।

वहीं, क्रि. वि. (हिं. वहां+ही) तत्रैव, तस्मिन्नेव स्थाने।

वही, सर्व. (हिं. वह+ही) स एव, असावेव (पुं.); सैव, असावेव (स्त्री.); तदेव, अद एव (न.) इ.।

वह्नि, सं. पुं. (सं.) अनलः, अग्निः, दे. 'आग'।

वांछनीय, वि. (सं.) स्पृहणीय, कमनीय, काम्य २. वांछित, दे.।

वांछा, सं. स्त्री. (सं.) इच्छा, अभिलाषः, कामना।

वांछित, वि. (सं.) अभिलषित, अभीष्ट।

वा, अव्य. (सं.) अथवा।

वाइदा, सं. पुं., दे. 'वादा'।

वाइस चान्सलर, सं. पुं. (अं.) विश्वविद्यालयस्य उपाध्यक्षः।

वाइसराय, सं. पुं. (अं.) राजप्रतिनिधिः।

वाक्, सं. पुं. [सं. वाच् (स्त्री.)] वाणी, वाक्यं २. सरस्वती, शारदा ३. वागिन्द्रियं, वाक्शक्तिः (स्त्री.)।

—पटु, वि. (सं.) वाक्कुशल, वाग्मिन्।

—पटुता, सं. स्त्री. (सं.) वाक्पाटवं, वाग्मिता, वाग्वैदग्ध्यम्।

—पारुष्य, सं. पुं. (सं. न.) अप्रियवाक्योच्चारणं, कटुभाषणम्।

—संयम, सं. पुं. (सं.) वाग्यमः, मितवाच् (स्त्री.)।

वाक़ई, क्रि. वि. (अ.) वस्तुतः, यथार्थतः। वि., यथार्थ, सत्य।

वाक़या, सं.पुं. (अ.) घटना, वृत्तं २. समाचारः।

वाक़ा, वि. (अ.) स्थित,-वर्ति,-स्थ।

वाक़िफ़, वि. (अ.) परिचित, अभ्यस्त २. ज्ञातृ, बोद्धृ, अभिज्ञ ३. अनुभविन्।

—कार, वि. (अ.+फ़ा.) कार्याभिज्ञ, कुशल, निष्णात।

वाकफ़ियत, सं. स्त्री. (अ.) परिचयः, परिज्ञानं २. अनुभवः।

वाक्य, सं. पुं. (सं. न.) पदसमूहः, योग्यताकांक्षासत्तियुक्तः पदोच्चयः २. कथनं, वचनं ३. सूत्रं ४. आभाणकः।

वागा, सं. स्त्री. (सं.) वल्गा, दे. 'लगाम'।

वागीश, सं. पुं. (सं.) बृहस्पतिः २. ब्रह्मन् (पुं.) ३. वाग्मिन्, कविः। वि. (सं.) सुवक्तृ, सुव्याख्यातृ।

वागुरा, सं. स्त्री. (सं.) मृगबंधनार्थं जालभेदः।

वागुरिक, सं. पुं. (सं.) व्याधः, शाकुनिकः।

वाग्जाल, सं. पुं. (सं. न.) वाग्डंबरः, शब्दाडंबरः, वाक्प्रपंचः।

वाग्दंड, सं. पुं. (सं.) निर्भर्त्सना, अधिक्षेपः।

वाग्दत्ता, सं. स्त्री. (सं.) *नियतवरा, *वाचार्पिता (कन्या)।

वाग्दान, सं. पुं. (सं. न.) कन्यादानप्रतिज्ञा।

वाग्दुष्ट, वि. (सं.) कटुभाषिन् २. अभिशप्त।

वाग्देवी, सं. स्त्री. (सं.) सरस्वती, दे.।

वाग्मी, सं. पुं. (सं. वाग्मिन्) वाग्विदग्धः, वाक्पटुः, सुवक्तृ २. पंडितः, प्राज्ञः ३. बृहस्पतिः।

वाग्विलास, सं. पुं. (सं.) सानन्दो वार्तालापः।

वाङ्मय, वि. (सं.) वाक्यात्मक २. वाग्विहित (पापादि)। सं. पुं. (सं. न.) भाषा २. साहित्यम्।

वाच्, स. स्त्री. (सं.) वाणी २. वाक्यम्।

वाच, सं. स्त्री. (अं.) *घटिका।

वाचक, वि. (सं.) ज्ञापक, द्योतक, सूचक, बोधक २. पाठक, वाचयितृ ३. वक्तृ।

—लुप्ता, सं. स्त्री. (सं.) उपमालंकारभेदः।

वाचन, सं. पुं. (सं.) पठनं, अध्ययनं, उच्चारणं २. कथनं ३. प्रतिपादनम्।

वाचस्पति, सं. पुं. (सं.) बृहस्पतिः, सुविद्वस्।

वाचा, सं. स्त्री. (सं.) वाणी, गिरा २. वाक्यं, वचनम्।

वाचाट-ल, वि. (सं.) बहुभाषिन्, मुखर, जल्प(ल्पा)क २. वाक्पटु।

वाचाल(ट)ता, सं. स्त्री. (सं.) मुखरता, बहुभाषिता २. वाग्वैदग्ध्यम्।

वाचिक, वि. (सं.) वाग्विषयक २. मौखिक।

—वाची, वि. (सं.-चिन्)-सूचक, -बोधक।

वाच्य, वि. (सं.) वचनीय, कथनीय २. अभिधेय, अभिधावृत्त्या बोध्य (अर्थ.) ३. कुत्सित, हीन।

वाच्यार्थ, सं. पुं. (सं.) अभिधेय-मूलशब्द,-अर्थः-शब्दार्थः।

वाच्यावाच्य, वि. (सं.) भद्राभद्र (वाक्यादि)।

वाज़, सं. पुं. (अ.) उपदेशः, धार्मिकव्याख्यानम्।

वाजपेय, सं. पुं. (सं. पुं. न.) श्रौतयागभेदः।

वाजपेयी, सं. पुं. (सं.-यिन्) हुतवाजपेयः २. ब्राह्मणोपाधिभेदः ३. सुकुलजः।

वाजसनेय, सं. पुं. (सं.) यजुर्वेदस्य शाखाविशेषः २. याज्ञवल्क्यः।

वाजिब-बी, वि. (अ.) उचित, योग्य, उ

वाजी, सं. पुं. (सं.-जिन्) अश्वः, घोटकः २. आमिक्षामस्तु (न.), मोरटः (= फटे हुए दूध का पानी) ३. पक्षिन् ४. बाणः ५. वासकः।

—कर, वि. (सं.) कामोद्दीपक (औषधादि)।

—करण, सं. पुं. (सं. न.) वीर्यवृद्धिकरः प्रयोगः।

वाट, सं. पुं. (सं.) मार्गः २. वास्तु ३. मंडपः।

वाटर, सं. पुं. (अं.) जलम्।

—प्रूफ़, वि. (अं.) अक्लेद्य, जलाभेद्यम्।

—वर्क्स, सं. पुं. (अं.) *जलयंत्रं २. जलयंत्रालयः।

वाटिका, सं. स्त्री. (सं.) क्षुद्र,-आरामः-उद्यानं, दे. 'बग़ीचा'।

वाडवाग्नि, सं. स्त्री. (सं.) वाडवः, व(वा)डवानलः।

वाण, सं. पुं. (सं.) बाणः, दे.।

वाणिज्य, सं. पुं. (सं. न.) क्रयविक्रयः, निगमः, वणिक्कर्मन् (न.), व्यापारः।

वाणी, सं. स्त्री. (सं.) दे. 'बाणी'।

वात, सं. पुं. (सं.) पवनः, वायुः, दे.। २. देहस्थवायुः ३. रोगभेदः।

—चक्र, सं. पुं. (सं. न.) चक्रवातः, वातावर्त्तः।

—ज, वि. (सं.) वातप्रकोपज (रोगादि)।

—जात, सं. पुं. (सं.) हनुमत्, मारुतिः।

—तूल, सं. पुं. (सं. न.) वृद्धसूत्रकं, ग्रीष्महासम्।

—ध्वज, सं. पुं. (सं.) वातरथः, मेघः।

—पट, सं. पुं. (सं.) ध्वजः, पताका।

—पुत्र, सं. पुं. (सं.) हनुमत् २. भीमः ३. महाधूर्त्तः।

—प्रकोप, सं. पुं. (सं.) (शरीरे) वायुवृद्धिः (स्त्री.)।

—रोग, सं. पुं. (सं.) वायु-वात,-व्याधिः, चलातंकः, अनिलामयः, दे. 'गठिया'।

—वैरी, सं. पुं. (सं.-रिन्) वातादः, दे.।

वाताद, सं. पुं. (सं.) नेत्रोपमफलः, वाताम्रः, वातवैरिन्। (फल) वाताम्रं, वादामम्। (दे. बादाम)।

वातायन, सं. पुं. (सं. न.) क्षुद्रखडक्किका २. दे. 'रोशनदान'।

वातुल, सं. पुं. (सं.) उन्मत्तः, दे. 'बावला'।

वात्सल्य, सं. पुं. (सं.) रसविशेषः (काव्य.)। (सं. न.) पित्रोः अपत्यस्नेहः, वत्सलता।

वात्स्यायन, सं. पुं. (सं.) न्यायसूत्रभाष्यकारः २. कामसूत्रप्रणेतृ, पक्षिलः, मंदनागः।

वाद, सं. पुं. (सं.) वादानुवादः, वादप्रतिवादः, ऊहापोहः, *शास्त्रार्थः, दे.। २. सिद्धांतः, राद्धांतः ३. कलहः, विवादः।

—विवाद, सं. पुं. (सं.) दे. 'वाद' (१)।

वादक, सं. पुं. (सं.) वाद्यवादयितृ २. वक्तृ ३. वादिन्, तार्किक।

वादन, सं. पुं. (सं. न.) वाद्य-वादित्र,-ध्वननं २. वाद्यं दे.।

वादरायण, सं. पुं. (सं.) महर्षिः वेदव्यासः।

वादा, सं. पुं. (अ. वाइदा) नियतसमयः २. प्रतिज्ञा, वचनं, संगरः।

वादानुवाद, सं. पुं. (सं.) दे. 'वाद' (१)।

वादी, सं. पुं. (सं.-दिन्) अभियोक्तृ, अभियोगिन्, अर्थिन्, शिरोवर्तिन्, दे. 'मुद्दई' २. प्रस्तावकः, प्रस्तोतृ ३. वक्तृ।

—प्रतिवादी, सं. पुं. (सं. वादिप्रतिवादिनौ) अर्थिप्रत्यर्थिनौ २. पक्षिप्रतिपक्षिणौ (सब द्वि.)।

वाद्य, सं. पुं. (सं.) वादित्रं, आतोद्यम्।

वानप्रस्थ, सं. पुं. (सं.) तृतीयाश्रमिन्, वैखानसः, आरण्यकः, तापसः २. तृतीयाश्रमः ३-४. मधूक-पलाश,-वृक्षः।

वानर, सं. पुं. (सं.) कपिः, मर्कटः, दे. 'बंदर'।

वानरी, सं. स्त्री. (सं.) मर्कटी, वलीमुखी।

वापस, वि. (फ़ा.) वि-प्रत्या-प्रतिनि,-वृत्त, प्रति,-गत-आगत-यात-आयात।

—आना, क्रि. अ., प्रत्यागम्, प्रत्यावृत् (भ्वा. आ. से.)।

—करना, क्रि. स., प्रतिगम्, प्रतिनिवृत् (प्रे.) २. प्रतिदा (जु. उ. अ.), प्रति-ऋ (प्रे. प्रत्यर्पयति)।

—जाना, क्रि. अ., प्रति,-गम्-निवृत्।

—लेना, क्रि. स., प्रत्यादा, पुनः स्वीकृ।

—होना, क्रि. अ., दे. 'वापस जाना' २. प्रतिदा-आदा (कर्म.)।

वापसी, वि. (फ़ा. वापस) प्रत्या-प्रतिनि,-वृत्त। सं. स्त्री., प्रति,-गमनं-आगमनं-आवृत्तिः (स्त्री.) २. प्रति,-दानं-अर्पणं-आदानम्।

वापी, सं. स्त्री. (सं.) वापिः (स्त्री.), दीर्घिका, वापिका ।

वाम, वि. (सं.) सव्य, दक्षिणेतर, दे. 'बायाँ' २. प्रतिकूल, विरुद्ध, प्रतीप ३. कुटिल ४. दुष्ट, नीच ५. अभद्र, अमंगल ।

—देव, सं. पुं. (सं.) शिवः ।

—मार्ग, सं. पुं. (सं.) वामाचारः, वेदविरुद्ध-संप्रदायविशेषः ।

—मार्गी, सं. पुं. (सं.-गिन्) वामाचारिन् , वेदविरोधिन् ।

—लोचना, सं. स्त्री. (सं.) वामाक्षी, सुंदरी, शोभना ।

वामन, वि. (सं.) खर्व, ह्रस्व, लघुकाय । सं. पुं. (सं.) खट्टनः, खट्टेरकः, खर्वः, ह्रस्वः २. विष्णुः ३. शिवः ४. पुराणग्रंथविशेषः ।

—अवतार, सं. पुं. (सं. वामनावतारः) अदितिगर्भजो विष्णोः पंचमावतारः ।

वामनी, सं. स्त्री. (सं.) खर्वा, खट्टनी ।

वामा, सं. स्त्री. (सं.) नारी, रामा ।

वामी, सं. स्त्री. (सं.) वडवा २. रासभी ३ शृगाली ।

वायव्य, वि. (सं.) १-३. वायु,-संबंधिन्-देवताक-निर्मित, वायवीय ।

—कोण, सं. पुं. (सं.) पश्चिमोत्तर,-कोणः-दिशा, वायवी ।

वायस, सं. पुं. (सं.) काकः, ध्वांक्षः ।

वायु, सं. स्त्री. (सं. पुं.) वातः, पवनः, अनिलः, गंधव(वा)हः, समीरः-रणः, मरुत्, मा(म)रुतः, श्वसनः, मातरिश्वन्, सदागतिः, जगत्प्राणः, नभस्वत्, पवमानः, प्रभंजनः, धूलिध्वजः, फणिप्रियः ।

—कोण, सं. पुं. (सं.) पश्चिमोत्तरदिशा, वायवी ।

—गुल्म, सं. पुं. (सं.) वातचक्रं, चक्रवातः, वात्या २. जल,-गुल्मः-आवर्तः ३. वातगुल्मः, उदरव्याधिभेदः ।

—पुत्र, सं. पुं. (सं.) पवन,-सुतः-पुत्रः, हनुमत् ।

—भक्षण, सं. पुं. (सं.) वायु,-भक्षः-भुज् , यतिभेदः २. पवनाशनः, सर्पः ।

—मंडल, सं. पुं. (सं. न.) अंतरि(री)क्षं, गगनं २. वातावरणम् ।

वारंट, सं. पुं. (अं.) अधिकारपत्रम् ।

—गिरफ़्तारी, सं. स्त्री. (अं.+फ़ा.) *आसेधाधिकारपत्रम् ।

—तलाशी, सं. पुं. (अं.+फ़ा.) *अन्वेषणाधिकारपत्रम् ।

—रिहाई, सं. पुं. (अं.+फ़ा.) (कारागारादिभ्यः) मोचनाधिकारपत्रम् ।

वारंवार, क्रि. वि., दे. 'बारंबार' ।

वार, सं. पुं. (सं.) पर्यायः, क्रमः २. अवसरः, समयः ३. सप्ताह,-दिनं-दिवसः, वासरः, ४. द्वारं ५. आघातः, प्रहारः, आक्रमणं ६. आवरणं ७. समूहः ८. पारः-रम् ।

—करना, क्रि. स., अभिद्रु (भ्वा. प. अ.), अवस्कंद् (भ्वा. प. अ.), आक्रम् (भ्वा. प. से.; भ्वा. आ. अ.) ।

—खाली जाना, मु., लक्ष्यं न व्यध् (कर्म.), अस्त्रं अपलक्ष्यं पत् (भ्वा. प. से.) २. युक्तिः निष्फलीभू ।

वारक, वि. (सं.) निषेधक, प्रतिबंधक ।

वारण, सं. पुं. (सं. न.) नि-प्रति,-षेधः, २. विघ्नः, अंतरायः । (सं. पुं.) गजः, वाण-वारः, कवचः-चम् ।

वारदात, सं. स्त्री. (अ.) दुर्घटना २. विप्लवः, संक्षोभः ।

वारना, क्रि. स. (सं. वारणं >) अनिष्टवारणाय उत्सृज् (तु. प. अ.)-त्यज् (भ्वा. प. अ.) । सं. पुं., शांतिकरः उत्सर्गः, कष्टवारकं दानम् ।

वारनारी, सं. स्त्री. (सं.) वारमुखी, वारांगना, वेश्या, वारविलासिनी ।

वारपार, सं. पुं. [सं. अवारपारौ-रे (पुं. न.)] (नद्यादीनां) तटद्वयं २. अंतः, सीमा । क्रि. वि., अवारात् पारं यावत् २. निकटपार्श्वात् परपार्श्वपर्यंतम् ।

वारांगना, सं. स्त्री. (सं) वारनारी, दे. ।

वारा, सं. पुं. (सं. वारणं >) मितव्ययः २. लाभः ।

वाराणसी, सं. स्त्री. (सं.) काशी-शिका, शिवपुरी, तपःस्थली, व(वा)रणसी ।

वारान्यारा, सं. पुं. (हि. वार+न्यारा) निर्णयः, निश्चयः, निर्धारणं २. समाधानं, संधिः, शमः-मनम् ।

वारापार, सं. पुं. तथा क्रि. वि., दे. 'वारपार'।
वाराह, सं. पुं. (सं.) वराहः, दे.।
वारि, सं. पुं. (सं. न.) पानीयं, जलं, दे.।
—चर, सं. पुं. (सं.) जलजन्तुः २. मत्स्यः।
—ज, सं. पुं. (सं. न.) कमलं, वारि,-जातं-रुहम्।
—द, सं. पुं. (सं.) वारि,-धरः-वाहः, मेघः।
—धि, सं. पुं. (सं.) वारिनिधिः, सागरः।
—यंत्र, सं. पुं. (सं. न.) जलयंत्रं, दे. 'फव्वारा'।
वारिस, सं. पुं. (अ.) अंश,-हरः-हारिन्-भाज्, दायादः, दायिकः २. उत्तराधिकारिन्।
—होना, क्रि. अ., पैतृकसंपदधिकारी जन् (दि. आ. से.), दायादो भू।
वारींद्र, सं. पुं. (सं.) वारीशः, सागरः।
वारुणी, सं. स्त्री. (सं.) मदिरा, मद्यं, सुरा २. पश्चिमदिशा ३. वरुणानी।
वार्ड, सं. पुं. (अं.) रक्षणं, गोपनं २. पुरविभागः ३. कारागारादीनां विभागः।
वार्डर, सं. पुं. (अं.) रक्षकः २. कारारक्षकः।
वार्त्ता, सं. स्त्री. (सं.) विषयः, प्रसंगः २. किंवदंती, जनश्रुतिः (स्त्री.) ३. समाचारः, वृत्तं ४. वार्त्तालापः, दे.।
वार्त्तालाप, सं. पुं. (सं.) संलापः, संवादः, संभाषणं, आलापः।
—करना, क्रि. अ., संलप्-संवद् (भ्वा. प. से.), संभाष् (भ्वा. आ. से.)।
वार्त्तिक, सं. पुं. (सं. न.) उक्तानुक्तदुरुक्तार्थप्रकाशको ग्रंथः; टीका। (सं. पुं.) चरः २. दूतः।
वार्द्धक्य, सं. पुं. (सं. न.) वार्द्धकं, वृद्धत्वं, वृद्धावस्था, स्थाविरम्।
वार्षिक, वि. (सं.) आब्दिक, वात्सरिक, सांवत्सरिक २. प्रावृषेण्य।
वालंटियर, सं. पुं. (अं.) स्वयंसेवकः, स्वेच्छासेवकः।
वालदैन, सं. पुं. (अ.) पितरौ, मातापितरौ (दोनों द्वि.)।
वालिद, सं. पुं. (अ.) पितृ, जनकः।
वालिदा, सं. स्त्री. (अ.) मातृ (स्त्री.), जननी।
वाल्मीकि, सं. पुं. (सं.) रामायणप्रणेतृमुनिविशेषः, व(वा)ल्मीकः, प्राचेतसः, आद्यकविः, कविज्येष्ठः।
वावदूक, सं. पुं. (सं.) वाग्मिन् २. वाचालः।
वावैला, सं. पुं. (अ.) विलापः २. कोलाहलः।
वाष्प, सं. पुं. (सं.) उष्मन्, दे. 'भाप' २. अश्रु (न.)।
वासंती, सं. स्त्री. (सं.) माधवी, प्रहसंती, वसंतजा २. यूथी।
वास, सं. पुं. (सं.) अव,-स्थानं-स्थितिः (स्त्री.) नि-,वसतिः (स्त्री.) २. गृहं, भवनं ३. सु-,गंधः ४. दुर्-,गंधः।
वासक, सं. पुं. (सं.) अटरूषः, वैद्य-भिषङ्-मातृ (स्त्री.), वासा-सकः।
वासकेट, सं. स्त्री. (अं. वेस्टकोट) वासकटिः।
वासना, सं. स्त्री. (सं.) कामना, अभिलाषः, वांछा २. संस्कारः, भावना, स्मृतिहेतुः ३. ज्ञानं ४. प्रत्याशा ५. देहात्मबुद्धिजन्यो मिथ्यासंस्कारः (न्याय.)।
वासर, सं. स्त्री. (सं. पुं. न.) दिवसः, दिनम्।
वासव, सं. पुं. (सं.) इन्द्रः, दे.।
वासित, वि. (सं.) भावितः, सुरभीकृतः २. वस्त्रवेष्टित ३. पर्युषित।
वासी, सं. पुं. (सं.-सिन्) निवासिन्, वास्तव्य।
वासुदेव, सं. पुं. (सं.) श्रीकृष्णः।
वास्तव, वि. (सं.) सत्य, यथार्थ, अवितथ।
—में, क्रि. वि., वस्तुतः, सत्यम्।
वास्तविक, वि. (सं.) तथ्य, सत्य, तात्त्विक, दे. 'वास्तव'।
वास्ता, सं. पुं. (अं.) संबंधः, संपर्कः।
—पड़ना, मु., व्यवहारावसरः जन् (दि आ. से.)।
वास्तु, सं. पुं. (सं. पुं. न.) वेश्मभूः, गृहपोतकः २. गृहं, सौधः।
—विद्या, सं. स्त्री. (सं.) भवननिर्माणकला, स्थापत्यम्।
वास्ते, अव्य. (अ.)-अर्थं, -निमित्तम्, चतुर्थी विभक्ति से भी (उ., तेरे वास्ते = त्वदर्थं, तुभ्यम्)।
वाह[1], अव्य. (फ़ा.) साधु, वरं, भद्रं, शोभनं २. अद्भुतं, आश्चर्य ३. धिक् ४. हंत।
वाह[2], अव्य., साधु-साधु इ.।
—करना, क्रि. स., अभि-प्रति,-नंद् (भ्वा. प. से.), साधु-वादान् दा २. करतलध्वनिं कृ।

——होना, मु., अभि-प्रति-नंद् (कर्म.)।

वाहक, सं. पुं. (सं.) भारवाहः, भारिकः २. सारथिः, यंतृ।

वाहन, सं. पुं. (सं.) यानं, युग्यं, दे. 'सवारी'।

वाहवाही, सं. स्त्री. (फ़ा.) ख्यातिः-विश्रुतिः (स्त्री.), साधुवादः, प्रशंसा।

—लेना या लूटना, मु., यशः वितन् (त. उ. से.), साधुवादान् लभ् (भ्वा. आ. अ.), प्रशंसापात्रं भू।

वाहिनी, सं. स्त्री. (सं.) सेना २. नदी ३. सैन्यभेदः (= ८१ हस्ती, ८१ रथ, २४३ घोड़े, ४०५ पैदल)।

—पति, सं. पुं. (सं.) सेनापतिः।

वाहियात, वि. (अ. वाही + फ़ा. यात) व्यर्थ, निरर्थक २. दुष्ट, खल।

वाहीतबाही, वि. (अ. + फ़ा.) निरर्थक, निष्प्रयोजन २. असंगत, असंबद्ध। सं. स्त्री., प्र-, जल्पः-पनं २. गालिः (स्त्री.), अपभाषणम्।

वाह्य, वि. (सं.) वोढव्य २. वोढृ।

विंदु, सं. पुं., दे. 'बिंदु'।

विंध्याचल, सं. पुं. (सं.) विंध्यः, पर्वतविशेषः।

वि, उप. (सं.) वैशिष्ट्यनिषेधादिबोधकः उपसर्गः (व्या.)।

विकच, वि. (सं.) विकसित, उत्फुल्ल २. केशहीन।

व्याल, सं. पुं. (सं.) सर्पः, अहिः २. सिंहः ३. व्याघ्रः ४. हिंस्रपशुः । वि. (सं.) दुष्ट, अपकर्तृ ।

—ग्राही, सं. पुं. (सं.-हिन्) दे. 'संपेरा'।

व्यावहारिक, वि. (सं.) वर्तन-व्यवहार,-विषयक २. अभियोगसम्बन्धिन् ३. सामान्य, साधारण ।

व्यास, सं. पुं. (सं.) पाराशरः-रिः-र्यः, कृष्ण-, द्वैपायनः, कानीनः, वादरायणः-णिः, सत्य,-भारतः-व्रतः-रतः, माठरः, वेदव्यासः, सात्यवतः २. कथावाचकः ३. विष्कंभः, गोलस्य मध्यरेखा ४. विस्तारः ।

व्यासक्त, वि. (सं.) अत्यंतानुरक्त ।

व्याहृति, सं. स्त्री. (सं.) उक्तिः (स्त्री.) २. मंत्रविशेषः (= भूः, भुवः, स्वः)।

व्युत्पत्ति, सं. स्त्री. (सं.) विशिष्टज्ञानं २. उद्गमस्थानं, मूलं ३. निरुक्तिः (स्त्री.), शब्द,-साधनं-सिद्धिः (स्त्री.), निर्वचनम् ।

व्युत्पन्न, वि. (सं.) निष्णात, प्रवीण, निपुण, विशेषज्ञ, विज्ञ २. व्युत्पत्तियुत ३. संस्कृत ।

व्यूह, सं. पुं. (सं.) सैन्य-सेना,-विन्यासः-संस्थानं २. सेना ३. समूहः ४. रचना, तर्कः ६. शरीरम् ।

—रचना, क्रि. स., व्यूह् (भ्वा. प. से.), सैन्यं विन्यस् (दि. प. से.), व्यूहं रच् (चु.)।

व्योम, सं. पुं. [सं.-मन् (न.)] आकाशः-शं २. जलं ३. जलदः ।

—यान, सं. पुं. (सं. न.) विमानः-नं, वायुयानं, *वातपोतः ।

व्रज, सं. पुं. (सं.) समूहः, समुदायः २. मथुरावृंदावनयोश्चतुष्पार्श्ववर्तिदेशः, व्रज,-मंडलं-भूमिः (स्त्री.) ३. गोष्ठम् ।

—नाथ, सं. पुं. (सं.) श्रीकृष्णः, व्रज,-मोहनः-राजः- वल्लभः- ईश्वरः-इंद्रः ।

—भाषा, सं. स्त्री. (सं.) शौरसेनीप्राकृतादुद्भूतो भाषाविशेषः ।

व्रण, सं. पुं. (सं. पुं. न.) क्षतं-तिः (स्त्री.), अरुस् (न.), ईर्मः-र्मं २. दे. 'विस्फोट' (२.)।

व्रत, सं. पुं. (सं. पुं. न.) निय(या)मः, पुण्यकं, २. उपवासः, उपोषणं, लंघनं ३. दृढ, संकल्पः-अध्यवसायः-निश्चयः-प्रतिज्ञा ।

—रखना, क्रि. अ., उपवस् (भ्वा. प. अ.), लंघ् (भ्वा. आ. से.), उपोषणं कृ, व्रतयति (ना. धा.)।

—लेना, क्रि. अ., दृढ-संकल्पं कृ, सशपथं प्रतिज्ञा (क्र्. आ. अ.), व्रतं धृ (चु.) चर्-(भ्वा. प. से.)।

व्रती, सं. पुं. (सं.-तिन्) व्रत,-धरः-स्थः-चारिन् २. यजमानः ३. ब्रह्मचारिन् ४. तापसः तपस्विन् ।

व्रात्य, सं. पुं. (सं.) संस्कारहीनः २. सावित्रीपतितः ३. सांकरिकः, मिश्रजः ।

व्रीडा, सं. स्त्री. (सं.) त्रपा, लज्जा ।

व्रीहि, सं. पुं. (सं.) शालिः, स्तंबकरिः २. धान्यमात्रम् ।

बहु—, सं. पुं. (सं.) समासभेदः (व्या.)।

श

श, देवनागरीवर्णमालायाः त्रिंशो व्यंजनवर्णः, शकारः।

शंकर, वि. (सं.) शुभ(भं)कर, मंगल्य, शुभ, शिव, भद्र। सं. पुं. (सं.) महादेवः, शिवः, दे.। २. शंकराचार्यः।

शंकराचार्य, सं. पुं. (सं.) अद्वैतमतप्रवर्तक आचार्यविशेषः।

शंका, सं. स्त्री. (सं.) भयं, भीतिः (स्त्री.), त्रासः, दरः, साध्वसं २. संदेहः, संशयः, विकल्पः, आशंका ३. आक्षेपः।

शंकित, वि. (सं.) भीत, त्रस्त, ससाध्वस २. संदिग्ध, अनिश्चित ३. संशय-संदेह,-मग्न, आशंकिन्, साशंक।

शंकु, सं. पुं. (सं.) तीक्ष्णाग्र-निशिताग्र,-पदार्थः २. कीलः ३. नागदंतकः, कीलकः ४. कुन्तः, प्रासः ५. (शरादीनां) फलं, फलकं ६. दशलक्षकोटिः (स्त्री.) (संख्याविशेषः) ७. मेढ्रः ८. गोपुच्छाकारः सूक्ष्माग्रो यूपः।

शंख, सं. पुं. (सं. पुं. न.) कंबुः, कंबोजः, अर्णोभवः, पावनध्वनिः, अंतःकुटिलः, महा-सु-बहु-दीर्घ,-नादः, मुखरः, हरिप्रियः २. लक्ष-कोटिः (स्त्री.), दशनिखर्वसंख्या ३. गंडः ४. गजगंडः गजदंतमध्यं वा ५. असुरविशेषः।

—बजाना, क्रि. स., शंखं ध्मा (भ्वा. प. अ.), श्वासेन पूर् (चु.)।

—ध्वनि, सं. स्त्री. (सं. पुं.) कंबुनादः।

—पाणि, सं. पुं. (सं.) शंखधरः, विष्णुः २. कृष्णः।

शंखिनी, सं. स्त्री. (सं.) चतुर्विधनारीष्वन्य-तमा २. यव-महा-भद्र,-तिक्ता, सूक्ष्मपुष्पी ३. दे. 'सीप'।

शंठ, सं. पुं. (सं.) अविवाहितः, अकृतविवाहः, कुमारः २. मूर्खः ३. क्लीवः।

शंड, सं. पुं. (सं.) क्लीवः, छिन्नमुष्कः, षंडः, नपुंस् (पुं.), नपुंसः-सकः(कं) २. गोपतिः, वलीवर्दः ३. उन्मत्तः।

शंतनु, सं. पुं. (सं.) महाभीष्मः, प्रातीपः, भीष्मजनकः।

शंबर, सं. पुं. (सं.) दैत्यविशेषः २. युद्धम्। (सं. न.) जलं २. मेघः ३. धनम्।

—सूदन, सं. पुं. (सं.) कामदेवः।

शंबुक-क, सं. पुं. (सं.) शंबूकः-का, शंबुः, जल,-शुक्तिः-(स्त्री.)-डिंबः, दुश्चरः, पंकमंडूकः, घोंघः २. शंखः ३. क्षुद्रशंखः।

शंभु, सं. पुं. (सं.) महादेवः, शिवः दे. २. ब्रह्मन् ३. विष्णुः।

—बीज, सं. पुं. (सं. न.) पारदः, दे. 'पारा'।

—भूषण, सं. पुं. (सं. न.) चंद्रः।

शऊर, सं. पुं. (अ.) विवेकः, सूक्ष्म,-दृष्टिः-बुद्धिः (स्त्री.) २. योग्यता, कौशलं ३. शिष्टता, सुशीलता।

—दार, वि. (अ+फ़ा.) विवेकिन् २. योग्य ३. शिष्ट।

शक, सं. पुं. (सं.) जातिविशेषः २. शकादित्यः, शालिवाहनः ३. शालिवाहनप्रवर्तितः संवद्-विशेषः।

शक, सं. पुं. (अ.) संदेहः, संशयः २. अवि-श्वासः, प्रत्ययाभावः।

—करना, क्रि. अ., दे. 'संदेह करना'।

शकट, सं. पुं. (सं. पुं. न.) वहनं, अक्षः, अनस् (न.) २. शरीरं, देहः।

—का भार, सं. पुं., शलाटः, शाकटीनः।

शकटिका, सं. स्त्री. (सं.) लघुशकटः-टं. शकटी २. शकटक्रीडनकम्।

शकर, सं. स्त्री. (सं. शर्करा ; फ़ा.) शार्कः, स्थूल-रक्त,-शर्करा, गुडचूर्णम्।

—कंद, सं. पुं. (सं. शर्कराकंदः-दं) (लाल) रक्तालुः, लोहितालुः, रक्त,-कंदः-पिंडकः (सफेद) शर्करा-मधुर,-कंदः।

—पारा, सं. पुं. (सं. फ़ा.) शंखपालः, शर्करा-पालः।

—बादाम, सं. पुं. (फ़ा.) क्षुरमानिका, दे. 'खुरमानी' तथा 'जर्द आलू'।

शकल[1], सं. स्त्री. (अ. शक्ल) आकारः, आकृतिः (स्त्री.), रूपं २. मुख,-मुद्रा ३. रचना, घटनं-ना ४. उपायः ५. मूर्तिः (स्त्री.), दे. 'रू'

—बिगाड़ना, मु., भृशं तड् (चु.)।

शकल[२], सं. पुं. (सं. पुं. न.) खंडः-डं, लवः, भागः।

शकील, वि. (अ. शक्ल) आकृतिमत्, सुंदर, सुरूप, चारु।

शकुंत, सं. पुं. (सं.) खगः, दे. 'पक्षी' २. कीट-भेदः ३. विश्वामित्रपुत्रः।

शकुंतला, सं. स्त्री. (सं.) कण्वप्रतिपालिता मेनकाविश्वामित्रयोः कन्या, दुष्यंतपत्नी २. श्रीकालिदासप्रणीतं प्रख्यातनाटकम्।

शकुन, सं. पुं. (सं. पुं. न.) फल-पूर्व,-लक्षणं, अजन्यं, निमित्तं २. मंगल्यमुहूर्तः (-र्तं), तत्र भवं कार्यं वा ३. पक्षिन् ४. गृध्रः ४. माङ्गलिक-गीतं ४. विवाहनिश्चायको वरोपहारः, *शकुनः-नम्।

—देखना या विचारना, मु., (कार्यारंभात् प्राक्) शकुनैः फलं चिंत् (चु.)।

शकुनि, सं. पुं. (सं.) पक्षिन् २. गृध्रः ३. गांधारीभ्रातृ, सौवलकः ४. महादुष्टः।

शक्कर, सं. स्त्री. (सं. शर्करा) दे. 'शकर' २. दे. 'चीनी'।

शक्की, वि. (अ. शक) संशयात्मन्, विश्वास-विहीन, श्रद्धाशून्य, शंकाशील।

शक्त, वि. (सं.) समर्थ, क्षम, योग्य २. सबल, शक्तिमत् ३. धनिक ४. मधुरभाषिन्।

शक्ति, सं. स्त्री. (सं.) वलं, सामर्थ्यं, प्रभावः, तरस्-ओजस्-तेजस्-ऊर्जस्-सहस् (न.), शौर्यं, पराक्रमः, शुष्मं, सहं, स्थामन्-शुष्मन् (न.), प्राणः २. वशः, अधिकारः ३. शत्रु-विजयसाधनं प्रभु-मंत्र-उत्साह,-शक्तिः (स्त्री.), ४. माया, प्रकृतिः (स्त्री.) ५. दुर्गा, भगवती ६. गौरी ७. लक्ष्मीः (स्त्री.) ८. काशूः-सूः (स्त्री.), शस्त्रभेदः (९) खड्गः (१०) देव-तावलम्।

—धर, सं. पुं. (सं.) शक्ति,-ग्रहः-ध्वजः-पाणिः-भृत्, कार्त्तिकेयः।

—वाला, वि., शक्ति,-मत्-शालिन्, वलवत्, शक्त, वलिन्, पराक्रमिन्, ऊर्जस्विन्, समर्थ।

—हीन, वि. (सं.) अशक्त, अवल, निर्वल, वलहीन, असमर्थ २. नपुंस, क्लीव।

शक्य, वि. (सं.) संभवनीय, संभाव्य, संभा-वित २. संपाद्य, साध्य ३. दे. 'शक्त'। सं. पुं. (सं.) वाच्यार्थः।

शक्यता, सं. स्त्री. (सं.) संभाव्यता, संभवः २. साध्यता, संपादनीयता।

शक्र, सं. पुं. (सं.) पुरन्दरः, दे. 'इन्द्र'।

शक्ल, सं. स्त्री. (अ.) दे. 'शकल' (१)।

शख्स, सं. पुं. (अ.) जनः, मनुष्यः, दे. 'व्यक्ति'।

शख्सियत, सं. स्त्री. (अ.) व्यक्तित्वं, दे.।

शग़ल, सं. पुं. (अ.) व्यवसायः, उपजीविका २. मनोविनोदः।

शगु(गू)न, सं. पुं., दे. 'शकुन'।

शगुनिया, सं. पुं. (हिं. शगुन) निमित्तज्ञः, दैवज्ञः।

शगूफ़ा, सं. पुं. (फ़ा.) कोरकः-कं, कलिका २. पुष्पं ३. विलक्षणवृत्तांतः।

—खिलना, मु., अद्भुतं संवृत् (भ्वा.आ.से.)।

शचि-ची, सं. स्त्री. (सं.) पौलोमी, ऐन्द्री, दे. 'इन्द्राणी'।

—पति, सं. पुं. (सं.) शचीशः, वलभिद्, दे. 'इन्द्र'।

शजर, सं. पुं. (अ.) पादपः, वृक्षः।

शजरा, सं. पुं. (अ.) वंशावली-लिः (स्त्री.), वंशवृक्षः २. वृक्षः ३. क्षेत्रमानचित्रम्।

शठ, वि. (सं.) धूर्त्त, वंचक, प्रतारक, माया-विन् २. दुर्वृत्त, दे. 'लुच्चा'।

शठता, सं. स्त्री. (सं.) धूर्तता, माया, शाठ्यं, कपटं २. दुर्वृत्तं, दुराचारः, दौर्जन्यम्।

शड़प्पा, सं. पुं. (अनु. शड़प्) शड़प्कारः, द्रुतनिगरणध्वनिः।

—मारना, मु., द्रुतं निगॄ (तु. प. से.), शड़प्कारैः भुज् (क्. आ. अ.)।

शण, सं. पुं.(सं.) दीर्घ,-शाखः-पल्लवः, माल्य-पुष्पः, त्वक्सारः, वमनः, कटुतिक्तकः २. भंगा, विजया ३. शणपुष्पी।

शत, वि. [सं. शतं (नित्य न.)]। सं. पुं., दशगुणितदशसंख्या तद्बोधका अङ्काश्च (१००), दे. 'सौ'।

—कोटि, सं. पुं. (सं.) वज्रं, पविः। सं. स्त्री. (सं.) अब्जसंख्या, अर्वुददशकं, अर्बम्।

—क्रतु, सं. पुं. (सं.) शतमखः, इन्द्रः ।
—घ्नी, सं. स्त्री. (सं.) अस्त्रभेदः, लोहकंटक-संछन्ना महती शिला ।
—च्छद, सं. पुं. (सं.) काष्ठकुट्टपक्षिन् । (सं. न.) शतदलपद्मम् ।
—दल, सं. पुं. (सं. न.) शतपत्रं, कमलम् ।
—पत्र, सं. पुं. (सं. पुं. न.) दे. 'शतच्छद' ।
—पथ ब्राह्मण, सं. पुं. (सं. न.) शुक्लयजुर्वेदस्य ब्राह्मणग्रंथविशेषः ।
—पथिक, वि. (सं.) नानामतावलंबिन्, नानापथगामिन् ।
—पद, सं. पुं. (सं.) शतपदी, कर्णकीटी २. पिपीलिका । वि., शत,-पद्-पाद् ।
—पदी, सं. स्त्री. (सं.) कर्णकीटी, शतपादिका, कर्ण,-जलुका-जलौकस् (स्त्री.), शतपाद (स्त्री.) ।
—भिष, सं. पुं. (सं. शतभिषा) नक्षत्रविशेषः, शतभिषज् (स्त्री.) ।
—लक्ष, सं. पुं. (सं. न.) कोटी-टिः (स्त्री.) ।
—वादन, सं. पुं. (सं. न.) अनेकवाद्यानां युगपद् वादनम् ।
—वर्ष, वि. (सं.) शताब्द, शतायुस् । सं. पुं. (सं. न.) शताब्दी-ब्दम् ।
—सहस्र, सं. पुं. (सं. न.) लक्षम् ।
शतक, सं. पुं. (सं. न.) शतवर्षं, वर्षशतं, शताब्दं-ब्दी २. शतं, शतवस्तुसमूहः । वि., शतसंख्याविशिष्ट, शतम् ।
शतधा, अव्य. (सं.) शतप्रकारं २. शतखंडेषु ३. शतगुण-णित ।
शतद्रु, सं. स्त्री. (सं.) शितद्रुः, शतद्रूः, शुतुद्रिः-द्रूः (सब स्त्री.) ।
शतरंज, सं. पुं. (फ़ा.) चतुरंगम् ।
—का मुहरा, सं. पुं., खेलनी, शारः-रिः ।
—की बिसात, सं. स्त्री., अष्टापदं, शारिफलम् ।
—बाज़, सं. पुं. (फ़ा.) चतुरंगक्रीडकः ।
—बाज़ी, सं. स्त्री. (फ़ा.) (१-२) चतुरंग,-क्रीडा-व्यसनम् ।
शतरंजी, सं. स्त्री. (फ़ा.) विविधान्नरोटिका २. बहुवर्ण,-कुथा-स्तरी ३. अष्टापदं, शारिफलम् । सं. पुं., चतुरंगचतुरः ।
शताब्दी, सं. स्त्री. (सं.) दे. 'शतक' (१) ।
शतायु, वि. (सं.-युस्) शत,-वर्ष-अब्द ।

शत्रुंजय, सं. पुं. (सं.) शत्रु-अमित्र,-जित्, शत्रुंतपः, अरिंदमः, रिपुसूदनः ।
शत्रु, सं. पुं. (सं.) रिपुः, अरिः, सपत्नः, वैरिन्, द्वेषणः, द्विष्, दुर्हृद्, दौर्हृदः, परः, शात्रवः, अरातिः, प्रत्यर्थिन्, परिपंथिन्, प्रतिपक्षः-क्षिन्, द्वेषिन्, जिघांसुः, घातकः, हिंसकः, २. शत्रुसेना ।
शत्रुघ्न, सं. पुं. (सं.) लक्ष्मणानुजः, शत्रुमर्दनः । (अन्य) दे. 'शत्रुंजय' ।
शत्रुता, सं. स्त्री. (सं.) वैरं, सापत्न्यं, विद्वेषः, प्रति-वि,-पक्ष(क्षि)ता, विरोधः ।
—करना, क्रि. अ., वैरायते, अमित्रति, अमित्रयति, अमित्रायते (सब ना. धा.), वि.-, द्विष् (अ. उ. अ.) ।
शदीद, वि. (अ.) गंभीर, प्रबल, भयंकर, तीव्र ।
शनाख़्त, सं. स्त्री. (फ़ा.) दे. 'पहचान' ।
शनि, सं. पुं. (सं.) शनैश्चरः, सौरिः, मंदः, छायासुतः, ग्रहनायकः, वक्रः, पंगुः, सूर्यपुत्रः २. दौर्भाग्यं ३. शनिवासरः ।
—प्रिय, सं. पुं. (सं.) नीलमणिः, दे. 'नीलम' ।
—वार, सं. पुं. (सं.) शनि-शनैश्चर,-वारः-वासरः ।
शनैः, अव्य. (सं.) मंदं, शनकैः ।
—शनैः, अव्य. (सं.) मंदं मंदं, शनकैः शनकैः ।
शनैश्चर, सं. पुं. (सं.) दे. शनि (१-३) ।
शपथ, सं. स्त्री. (सं.) दे. 'सौगंद' २. दिव्यं ३. प्रतिज्ञा ।
शफ, सं. पुं. (सं. न.) (गवादीनां) खुरः, दे. ।
शफ़क़, सं. स्त्री. (अ.) संधा, संध्या, संध्यांशुः ।
शफ़क़त, सं. स्त्री. (अ.) अनुग्रहः २. प्रेमन् (पुं. न.) ।
शफ़तालू, सं. पुं. (फ़ा.) (पेड़) सप्तालुकः । (फल) सप्तालुकं, आरूकं, दे. 'आड़ू' ।
शफ़ा, सं. स्त्री. (अ.) स्वास्थ्यं, नीरोगता ।
—खाना, सं. पुं. (अ.+फ़ा.) चिकित्सालयः ।
शब, सं. स्त्री. (फ़ा.) रात्री-त्रिः (स्त्री.), रजनी ।
शबनम, सं. स्त्री. (फ़ा.) अवश्यायः, दे. 'ओस' ।
शबल, वि. (सं.) कर्बुर, कल्माष, नानावर्ण, चित्र ।
शबाब, सं. स्त्री. (अ.) यौवनं २. सौन्दर्यातिशयः ।

शबाहत, सं. स्त्री. (अ.) आकृतिः (स्त्री.) २. समानता ।

शबीह, सं. स्त्री. (अ.) चित्रं २. साम्यम् ।

शब्द, सं. पुं. (सं.) निन(ना)दः, वि-, र(रा)वः, निर्-,घोषः, स्व(स्वा)नः, ध्वनिः, ध्व(ध्वा)नः २. पदं, सार्थकोऽक्षरसमूहः ३. ओ३म्, प्रणवः ४. भक्तिगीतम् ।

—कोष, सं. पुं. [सं.-षः(-शः)] अभिधानं, शब्द-संग्रहः ।

—चातुर्य, सं. पुं. (सं. न.) वाग्मिता, वाक्पाटवम् ।

—चित्र, सं. पुं. (सं. न.) अधमकाव्यभेदः, अनुप्रासः ।

—चोर, सं. पुं. (सं.) कुम्भिलः, शब्दतस्करः ।

—चोरी, सं. स्त्री., शब्दचौर्यं, कुंभिलत्वम् ।

—पति, सं. पुं. (सं.) अनुयायिरहितो नेतृ ।

—प्रमाण, सं. पुं. (सं. न.) आप्तप्रमाणम् ।

—विरोध, सं. पुं. (सं.) विरोधाभासः, मिथ्या-वैपरीत्यम् ।

—ब्रह्मन्, सं. पुं. (सं. न.) चत्वारो वेदाः ।

—भेदी, वि. (सं.-दिन्) शब्द,-वेधिन्-पातिन्। सं. पुं., अर्जुनः २. दशरथः ३. बाणभेदः ४. पायुः ।

—वेधी, सं. स्त्री. (सं.-धिन्) दे. 'शब्दभेदी'।

—शक्ति, सं. स्त्री. (सं.) शब्दानामर्थबोधक-शक्तिः (स्त्री.) (= अभिधा, लक्षणा, व्यंजना)।

—शास्त्र, सं. पुं. (सं. न.) शब्दविद्या, व्याकरणम् ।

—श्लेष, सं. पुं. (सं.) शब्दालंकारभेदः (सा.), अनेकार्थकपदप्रयोगः ।

—सौष्ठव, सं. पुं. (सं. न.) पदलालित्यम् ।

शब्दाडंबर, सं. पुं. (सं.) शब्द पद,-जालं-प्रपञ्चः ।

शब्दातीत, वि. (सं.) शब्दातिग, अवर्णनीय, (ईश्वरादि) ।

शब्दानुशासन, सं. पुं. (सं. न.) दे. 'शब्द-शास्त्र' ।

शब्दार्थ, सं. पुं. (सं.) पदानुवर्ती अर्थः, भावोपेक्षकोऽर्थः ।

शब्दालंकार, सं. पुं. (सं.) अलंकारभेदः (सा.), शब्दाश्रितो वाक्चमत्कारः ।

शम, सं. पुं. (सं.) प्र-,शांतिः (स्त्री.), शमथः, निश्चलत्वं, स्वास्थ्यं, प्र-उप,-शमः २. मोक्षः ३. इन्द्रियनिग्रहः ४. निवृत्तिः (स्त्री.), वैराग्यं ५. क्षमा ।

शमन, सं. पुं. (सं. न.) दे. 'शम' (१)। २. यज्ञार्थं पशुहननं ३. दमनं, नाशनं ४. चर्वणं ५. हिंसा ।

शमशेर, सं. स्त्री. (फ़ा.) असिः, खड्गः ।

—बहादुर, सं. पुं. (फ़ा.) आसिकः, खड्गिन्।

शमा, सं. पुं. (अ. शमअ्) दे. 'मोम' २. दीपिका ३. दीपः-पकः ।

—दान, सं. पुं. (फ़ा.) दीप-दीपिका,-वृक्षः-ध्वजः ।

शमी[1], सं. स्त्री. (सं.) शक्तु,-फला-फली, शिवा, केशमथनी, पापशमनी, भद्रा, शं-शुभ,-करी ।

शमी[2], वि. (सं.-मिन्) शांत, क्षोभरहित, निश्चल ।

शयन, सं. पुं. (सं. न.) संवेशः, स्वपनं, निद्राणं, सुप्तिः (स्त्री.), स्वापः २. शय्या ३. संवेशनं, मैथुनम् ।

—गृह, सं. पुं. (सं. न.) शयन,-आगारं-मन्दिरम् ।

शयालु, वि. (सं.) निद्रालु, तंद्रालु २. सुषुप्सु, निद्रावश ।

शय्या, सं. स्त्री. (सं.) आस्तरः, दे. 'बिछौना' २. खट्वा, पर्यंकः, दे. 'खाट' ।

—गत, वि. (सं.) रुग्ण, रोगिन् ।

—गृह, सं. पुं. (सं. न.) दे. 'शयनगृह' ।

—मूत्र, सं. पुं. (सं. न.) * स्वप्नप्रस्रावः, शिशुरोगभेदः ।

—छादन, सं. पुं. (सं. न.) पर्यंकप्रच्छदः ।

शर, सं. पुं. (सं.) इषुः, बाणः, दे. । २. शरकांडः, दे. 'सरकंडा' ३. क्षीरशरः, दुग्धाग्रं, संतानिका ४. दधिशरः, दधि,-सारः-स्नेहः, कट्टरं, कट्वरं ५. उशीरः ।

शरअ्, सं. स्त्री. (अ.) धर्मः, मतं २. धर्मशास्त्रं ३. प्रथा ४. धार्मिकादेशः ५. ईशदर्शितमार्गः (इस्लाम) ।

शरकांड, सं. पुं. (सं.) दे. 'सरकंडा' ।

शरण, सं. स्त्री. (सं. न.) आश्रयः, गतिः(स्त्री.) २. आश्रय-त्राण,-स्थानं ३. गृहं, भवनं ४. शरण्यः, रक्षितृ, त्रातृ ५. शरणागतरक्षणम् ।

—देना, क्रि. स., अव-रक्ष् (भ्वा. प. से.), शरणं दा।

—लेना, क्रि. अ., आश्रि (भ्वा. उ. से.), शरणं प्रपद् (दि. आ. अ.) इ-या (दोनों अ. प. अ.)।

शरणागत, वि. (सं.) शरणापन्न, अभिपन्न, शरणार्थिन् , शरणैषिन्। सं. पुं. (सं.) शिष्यः।

शरण्य, वि. (सं.) शरणद, शरणागतरक्षक, रक्षितृ, त्रातृ।

शरद्, सं. स्त्री. (सं.) परि-,वत्सरः, अब्दः, वर्षः-र्षं २. वर्षावसानः, मेघांतः, कालप्रभातः-तं, प्रावृडत्ययः (=आश्विन-कार्तिक)।

शरधि, सं. पुं. (सं.) तूणः, इषुधिः, दे. 'तरकश'।

शरबत, सं. पुं. (अ.) शर्करोदकं, गुडोदकं, पानकं, गौल्यं, सितोदं, मिष्टोदं २. शर्करा-मधु,-क्वाथः।

शरबती, सं. पुं. (अ. शरबत) दे. 'मीठी' (फल) २. ईषत्पीतवर्णः। वि., रसपूर्ण, सरस, सुमधुर।

शरम, सं. स्त्री., दे. 'शर्म'।

शरह, सं. स्त्री. (अ.) टीका, व्याख्या, भाष्यं २. दे. 'भाव' (मूल्य)।

शरा, सं. स्त्री., दे. 'शरअ़'।

शराकत, सं. स्त्री. (फ़ा.) सहभागिता, दे. 'साझा' २. सहकारिता।

शराफ़त, सं. स्त्री. (अ.) सज्जनता, सौजन्यं, शीलम्।

शराब, सं. स्त्री. (अ.) सुरा, मदिरा २. दे. 'शरबत' (हिकमत)।

—खींचना, क्रि. स., मद्यं संधा (जु. उ. अ.), सुरां सु-स्यंद् (प्रे.)। सं. पुं., मद्य,-संधानं-अभिषवः।

—पीना, क्रि. स., सुरां पा (भ्वा. प. अ.), मद्यं सेव् (भ्वा. आ. से.)।

—का खमीर, सं. पुं., मद्यपंकः, सुराकल्कः, मेदकः, जगलः।

—का प्याला, सं. पुं., पान-मद्य-सुरा,-भाजनं-भांडं-पात्रम्।

—के खमीर की झाग, सं. स्त्री., मद्य,-फेनः-मंडः, कार,-उत्तरः-उत्तमः।

—के नशे में चूर, वि., मत्त, क्षीब, मदोत्कट, मदोद्धत, समद, मदाढ्य, मदोन्मत्त, शौंड।

—खाना, सं. पुं. (अ.+फ़ा.) गंजा, शुंडा, सुरालयः।

—खींचने का स्थान, सं. पुं., संधानी, अभिषव-शाला।

—खींचनेवाला, सं. पुं., सुराकारः, शौंडिकः, संधानिन्।

—खोर, सं. पुं. (अ+फ़ा.) पान,-आसक्तः-रतः, मधु-मद्य-सुरा,-पः, पानशौंडः, सुरासुः।

—खोरी, सं. स्त्री., सुरापानं-णं, मद्यसेवनम्।

शराबी, सं. पुं. (अ. शराब) दे. 'शराबखोर'।

शराबोर, वि. (फ़ा.) दे. 'लथपथ'।

शरारत, सं. स्त्री. (अ.) कुचेष्टा-ष्टितं, दुर्ललितं, दुष्टता, खलता, अपकारः।

शरारती, वि. (अ. शरारत) कुचेष्टक, दुर्ललित, दुष्ट, खल, अपकारक।

श(स)राव, सं. पुं. (सं. पुं. न.) वर्द्धमानकः, मार्तिकः, मृत्कांस्यं, दे. 'कुल्हड़'।

शरासन, सं. पुं. (सं. न.) शरास्यं, शरावापः दे. 'धनुष'।

शरीअत, सं. स्त्री. (अ.) दे. 'शरअ़' (२, ५)।

शरीक, वि. (अ.) संमिलित। सं. पुं., सह,-चरः-कारिन्-योगिन् २. सह,-भागिन्, अंशिन्, अंशग्राहिन् ३. सहायः-यकः ४. सजातीयः, सजातिः।

शरीफ़, सं. पुं. (अ.) अभिजातः, कुलीनः, आर्यः, सुप्रतिष्ठः, भद्रजनः, सज्जनः। वि. (अ.) सभ्य, शिष्ट, सदाचारिन् २. कुलीन, अभिजात, अभिजनवत् ३. पवित्र, निर्दोष।

शरीफ़ा, सं. पुं. (सं. श्रीफलं>) (फल) सीताफलं, वैदेहीवल्लभं, गंडगात्रं, कृष्ण बहु,-बीजकम्। (वृक्ष) सीताफलः इ. पुं. रूप।

शरीर[1], सं. पुं. (सं. न.) कायः, देहः-हं, कलेवरः-रं, गात्रं, अंगं, क्षेत्रं, विग्रहः, संहननं, वपुस् (न.)। मूर्तिः-तनुः(नूः)(स्त्री.) पुरं, चतुःशाखं, पिंडं, स्कन्धः, पंजरः, इन्द्रिया-यतनं, पुद्गलः, करणम्।

—त्याग, सं. पुं. (सं.) देहपातः, मृत्युः।

—रक्षक, सं. पुं. (सं.) अंगरक्षकः, *तनुत्रः।

—शास्त्र, सं. पुं. (सं. न.) शरीरविज्ञानम्।

—संस्कार, सं. पुं. (सं.) गर्भाधानादयः षोडशसंस्काराः २. कायशुद्धिः (स्त्री.), देहपरिष्कारः ।

शरीर[२], वि. (अ.) दे. 'शरारती' ।

शरीरांत, सं. पुं. (सं.) देहपातः, निधनम् ।

शरीरी, सं. पुं. (सं.-रिन्) शरीरवत्, देहिन् २. जीवः,आत्मन् ३. प्राणिन्, जंतुः ।

शर्करा, सं. स्त्री. (सं.) दे. 'शकर' २. सिकता-कणः ३. अश्मरी, दे. 'पथरी' ३. अष्ठीलाः-पाषाणशकलाः (बहु.) ४. क(ख)र्परः ।

शर्त, सं. स्त्री. (अ.) पणः, ग्लहः २. संकेतः, समयः, नियमः ।

—करना, बाँधना या लगाना, मु., पण् (भ्वा. आ. से.), ग्लह् (भ्वा. चु. उ. से.) २. समयं-नियमं कृ ।

बिला—, क्रि. वि., समयं-नियमं विना ।

शर्तिया, क्रि. वि. (अ.) ग्लहेन, पणेन, ग्लह-पण,-पूर्वकं २. निस्संशयं, निस्सन्देहम् । वि., अमोघ, अवंध्य ।

शर्म, सं. स्त्री. (फ़ा.) दे. 'लज्जा' २. संकोचः, दे. 'लिहाज़' ३. मानः, प्रतिष्ठा ।

—से गड़ना या पानी पानी होना, मु., अत्यर्थं लज्ज् (तु. आ. से.)-त्रप् (भ्वा. आ. से.), लज्जानतास्य (वि.) भू ।

शर्मसार, वि. (फ़ा.) लज्जाशील २. ह्रीण, लज्जित ।

शर्मा, सं. पुं. (सं. शर्मन्) ब्राह्मणोपाधिभेदः ।

शर्माना, क्रि. अ. तथा क्रि. स. (फ़ा. शर्म) दे. 'लज्जित होना' २. दे. 'लज्जित करना' ।

शर्माशर्मी, क्रि. वि. (फ़ा. शर्म) लज्जया, ह्रिया ।

शर्मिंदगी, सं. स्त्री. (फ़ा.) लज्जा, त्रपा, व्रीडा ।

—उठाना, मु., दे. 'लज्जित होना' ।

शर्मिंदा, वि. (फ़ा.) लज्जित, व्रीडित, त्रपित ।

शर्मीला, वि. (फ़ा. शर्म) लज्जावत्, सलज्ज, दे. 'लज्जाशील' ।

शर्वरी, सं. स्त्री. (सं.) निशा, रात्री, दे. 'रात' ।

—नाथ, सं. पुं. (सं.) शर्वरीदीपः, चन्द्रः ।

शलग़(ज)म, सं. पुं. (फ़ा.) शिखा,-मूलं-कंदः, गृंजनम् ।

शल(र)भ, सं. पुं. (सं.) पत्रांकः-गः, पतङ्गः, फडिंगा, शिरिः, दे. 'टिड्डी' २. पतंगः, दे. 'पतंगा' ।

शलाका, सं. स्त्री. (सं.) धातुकाष्ठादिनिर्मिता यष्टिका, दे. 'सलाख़' २. बाणः ३. अस्थि (न.) ४. तृणं ५. शारिका ६. कज्जलशलाका ७. अक्षः, देवनः ८. दीपशलाका ।

शल्य, सं. पुं. (सं.) मद्रराजः, माद्रीभ्रातृ २-३. बिल्व-लोध्र,-वृक्षः ४. सीमा ५. शलाका ६. शललः-ली, शल्यकः ७. मीनभेदः (सं. न.) कुंतः, प्रासः २. इषुः, बाणः ३. कंटकः-कं ४. पीडाकारणं ५. दुर्वाक्यं ६. पापं ७. कष्टं ८. विषं ९. अस्थि (न.) १०. अस्त्रचिकित्सा ११. शंकुः ।

—कर्ता, सं. पुं. (सं.-र्तृ) दे. 'सर्जन' ।

—क्रिया, सं. स्त्री. (सं.) दे. 'सर्जरी' ।

शव, सं. पुं. (सं. पुं. न.) कुणपः, क्षितिवर्द्धनः, मृतकः-कं, प्रेतम् ।

—दाह, सं. पुं. (सं.) अंत्येष्टि-मृतक,-संस्कारः ।

—यान, सं. पुं. (सं. न.) शवरथः, खाटी-टिका, खोटः, काष्ठमल्लः, दे. 'अरथी' ।

शवर, सं. पुं. (सं.) म्लेच्छजातिभेदः २. शिवः ३. जलम् ।

शवरी, सं. स्त्री. (सं.) श्रमणानाम्नी तपस्विनी २. शवरजातेर्नारी ।

शश, सं. पुं. (सं.) शशकः, शूलिकः, रोम-कर्णः, मृदुरोमन् २. चंद्रलांछनं ३. पुरुषभेदः ।

—धर, सं. पुं. (सं.) शशभृत्, चंद्रः ।

—शृंग, सं. पुं. (सं. न.) शशकविषाणं, खपुष्पं, गगनकुसुमं, असंभवनीयवस्तु (न.) ।

शशक, सं. पुं. (सं.) दे. 'शश'(१) ।

शशमाही, वि. (फ़ा.) षाण्मासिक-अर्द्धवार्षिक-(-की स्त्री.-) ।

शशांक, सं. पुं. (सं.) शशधरः, चन्द्रः ।

शशी, सं. पुं. (सं. शशिन्) शशधरः, सोमः, दे. 'चाँद' ।

—कर, सं. पुं. (सं.) चन्द्रकिरणः ।

—कला, सं. स्त्री. (सं.) चंद्रलेखा २. वृत्त-भेदः (छंद.) ।

—कांत, सं. पुं. (सं.) चंद्रकांतमणिः । (सं. न.) कुमुदम् ।

—कुल, सं. पुं. (सं. न.) चंद्रवंशः ।
—पुत्र, सं. पुं. (सं.) शशिजः, बुधग्रहः ।
—प्रभा, सं. स्त्री. (सं.) कौमुदी, चंद्रिका ।
—भूषण, सं. पुं. (सं.) शशि-चंद्र;-मौलिः-शेखरः, शिवः ।
—वदना, सं. स्त्री. (सं.) वृत्तभेदः (छंद.) २. चंद्रमुखी-खा । (उपर्युक्त सभी समासों में 'शशि' रूप रहेगा । उ. शशिकर इ.) ।
शस्त्र, सं. पुं. (सं. न.) अस्त्रं, प्रहरणं, शत्रुघ्नं, हत्नुः, हेतिः (पुं. स्त्री.) ।
—बाँधना, क्रि. अ., शस्त्राणि धृ (चु.), सन्नह् (दि. उ. अ.) ।
—कर्म, सं. पुं. [सं.-र्मन् (न.)] शल्य-शस्त्र,-क्रिया ।
—गृह, सं. पुं. (सं. न.)शस्त्र,-शाला-आगारम् ।
—जीवी, सं. पुं. (सं.-विन्) शस्त्रवृत्तिः, आयुधिकः ।
—धारी, वि. (सं.-रिन्) सशस्त्र, शस्त्र,-भृत्-धर ।
—विद्या, सं. स्त्री. (सं.) धनुर्वेदः ।
शस्त्राभ्यास, सं. पुं. (सं.) अस्त्रशिक्षा, खुरली ।
शस्य, सं. पुं. (सं.) शस्यं, क्षेत्रस्थं फलं, दे. 'फ़सल' शष्पं, शादः ३. वृक्ष-लता,-फलं ४. धान्यं (शस्यं क्षेत्रगतं प्राहुः, सतुषं धान्यमुच्यते । आमं वितुषमित्युक्तं, स्विन्नमन्नमुदाहृतम् ॥) वि. (सं.) उत्तम, श्रेष्ठ २.स्तुत्य, प्रशंसनीय ।
—भक्षक, वि. (सं.) तृण-शाक,-भक्षक ।
शहंशाह, सं. पुं. (फ़ा.) राजाधिराजः, दे. 'सम्राट्' ।
शह, सं. स्त्री. (फ़ा.) गुप्तोत्तेजना ।
—देना, मु., निभृतं उत्तिज्-उद्दीप् (प्रे.) ।
शहज़ादा, सं. पुं. (फ़ा.) राजकुमारः २. युवराजः ।
शहज़ोर, वि. (फ़ा.) बलिन्, शक्तिशालिन् ।
शहसवार, सं. पुं. (फ़ा.) कुशलसादिन् ।
शहतीर, सं. पुं. (फ़ा.) तुला, स्थूणा, छद्याधारः ।
शहतूत, सं. पुं. (फ़ा.) (वृक्ष) ब्रह्मदारुः, तूदः, तूतः, पूषः, ब्रह्मण्यः, तूलः, यूपः । (फल) तूतं, तूलं, तूदं, पूषं, यूषम् ।
शहद, सं. पुं. (अ.) माक्षिकं, क्षौद्रं, मधु (न.) दे. ।
—की मक्खी, सं. स्त्री., मधुमक्षिका ।
—लगाकर चाटना, मु., व्यर्थं पदार्थं निरर्थं रक्ष् (भ्वा. प. से.) ।
शहनाई, सं. स्त्री. (फ़ा.) सानेयी-यिका, सानिका ।
शहबाला, सं. पुं. (फ़ा.) *सहबालः (पं. सबाला), *वर,-पृष्ठगः-सहचरः ।
शहर, सं. पुं. (फ़ा.) नगरं, पुरम् ।
—पनाह, सं. स्त्री. (फ़ा.) *नगरकोट्टः, वृत्तिः (स्त्री.), प्राचीरं दे. ।
शहरी, सं. पुं. (फ़ा.) पौरः, नागरिकः, नगर-पौर, जनः । वि., नगरीय, नागर, नागरेयक, नागरिक दे. ।
शहसवार, सं. पुं. (फ़ा.) कुशलसादिन् ।
शहादत, सं. स्त्री. (अ.) साक्ष्यं, दे. 'गवाही' २. प्रमाणं ३. बलिदानम् ।
शहीद, सं. पुं. (अ.) *हुतात्मन्, धर्महतः, धर्मपतंगः ।
—होना, क्रि. अ., धर्मार्थं प्राणान् हा (जु. प. अ.), परोपकाराय हन् (कर्म.) ।
शांत, वि. (सं.) स्वस्थचित्त, प्रसन्न,-मानस-चेतस्, निर्वृत, स्वस्थ, निरुद्वेग, आवेशशून्य, शमित, शमान्वित २. रुद्ध, वेग-गति-क्रिया,-रहित, विरत ३. सौम्य, गंभीर, धीर ४. निःशब्द, मौनिन् ५. जितेन्द्रिय, संयमशील ६. शिथिल, निरुत्साह ७. श्रांत, क्लांत, खिन्न ८. निर्वापित, निर्वाण (अग्न्यादि) ९. निर्विघ्न, निर्बाध । सं. पुं. (सं.) रसविशेषः (काव्य.) २. विरक्तः, योगिन् ।
—करना, क्रि. स., उप-प्र-शम् (प्रे.) २.प्रसद्-तुष् (प्रे.) ।
—होना, क्रि. अ., शम् (दि. प. से.), शांत-निश्चल (वि.) भू ।
शांतता, सं. स्त्री. (सं.) दे. 'शांति' ।
शांतनु, सं. पुं. (सं.) दे. 'शंतनु' २. कर्कटी ।
शांता, सं. स्त्री. (सं.) दशरथतनया, ऋष्यशृंगभार्या ।
शांति, सं. स्त्री. (सं.) दे. 'शम' (१) । २. गति-क्रिया-वेग-क्षोभ,-राहित्यं ३. नीरवता, निःशब्दता ४. रोगादीनां क्षयः-नाशः ५. मृत्युः ६. सौम्यता, गम्भीरता ७. वैराग्यं, तृष्णाक्षयः ८. संकटनिवारणम् ।

—दायक, वि. (सं.) शांति,-प्रद-कर-दायिन्।
—पर्व, सं. पुं. [सं.-पर्वन् (न.)] श्रीमन्महाभारतस्य द्वादशपर्वन्।
शाइस्तगी, सं. स्त्री. (फ़ा.) शिष्टता, सज्जनता।
शाइस्ता, वि. (फ़ा,-तः) शिष्ट, सुशील।
शाक, सं. पुं. (सं. पुं. न.) दे. 'साग'।
शाकाहार, सं. पुं. (सं.) हरितकभोजनं, मांसत्यागः।
शाकाहारी, वि. (सं.-रिन्) हरितकभोजिन्, मांसत्यागिन्।
शाक्त, सं. पुं. (सं.) शक्त्युपासकः, शाक्तिकः, शाक्तेयः।
शाक्य, सं. पुं. (सं.) प्राचीनक्षत्रियजातिविशेषः।
—मुनि, सं. पुं. (सं.) गौतमबुद्धः, सिद्धार्थः, महाबोधिः, महामुनिः।
शाख़, सं. स्त्री. (फ़ा.) दे. 'शाखा' (१)। २. शृंगं, विषाणं ३. उपांगं ४. उपनदी।
—दार, वि. (फ़ा.) शाखायुत २. शृंगयुत।
शाखा, सं. स्त्री. (सं.) विटपः-पं, शिखा, लंका, लता २. देहावयवः, शरीरांगं (हाथ, पाँव आदि) ३. अंगुली, करशाखा ४. अंगं, उपांगं ५. वि-,भागः ६. वैदिकग्रंथ-भेदः।
—नगर, सं. पुं. (सं. न.) उपपुरं, शाखापुरं, नगरप्रांतः।
शाखी, सं. पुं. (सं.-खिन्) वृक्षः २. वेदः। वि., सशाख।
शागिर्द, सं. पुं. (फ़ा.) शिष्यः, दे.।
शागिर्दी, सं. स्त्री. (फ़ा. शागिर्द) शिष्यता २. सेवा।
शाटक, सं. पुं. (सं. पुं. न.) पटः, वस्त्रम्।
शाटिका, सं. स्त्री. (सं.) दे. 'धोती'।
शाटी, सं. स्त्री. (सं.) दे. 'साड़ी'।
शाठ्य, सं. पुं. (सं. न.) दे. 'शठता' (१-२)।
शाण, सं. पुं. (सं.) शाणी, सामकं। (छोटा) झामरः २. नि-,कषः-सः, कषपट्टिका ३. माषचतुष्टयं, टंकः, निष्कः।
शाद[1], सं. पुं. (सं.) कर्दमः २. शष्पम्।
शाद[2], वि. (फ़ा.) प्रसन्न, मुदित २. परिपूर्ण।
शादाब, वि. (फ़ा.) जलाढ्य, जलसिक्त।
शादियाना, सं. पुं. (फ़ा.) मंगलवाद्यं २. दे. 'बधाई'।
शादी, सं. स्त्री. (फ़ा.) विवाहः, दे. २. हर्षः ३. आनन्दोत्सवः।
—ग़मी, सं. स्त्री. (फ़ा+अ.) हर्षशोकौ, सुखदुःखे।
शाद्वल, सं. पुं. (सं. पुं. न.) हरितः-तं, शष्पबहुलो देशः। वि., हरित, शष्पाच्छन्न।
शान, सं. स्त्री. (अ.) श्रीः (स्त्री.), अभिख्या, औज्ज्वल्यं, शोभा, प्रभा, भव्यता; आडंवरः २. विभूतिः-शक्तिः (स्त्री.) ३. प्रतिष्ठा, गौरवं ४. विभ्रमः ५. महिमन् (पुं.)।
—दार, वि. (अ.+फ़ा.) श्रीमत्, शोभान्वित, भव्य, साडंवर, शोभन, सुप्रभ, समुज्ज्वल, वैभवशालिन्।
—शौकत, सं. स्त्री. (अ.) दे. 'शान' (१)।
—घटना, मु., लघूभू, महिमा अपचि (कर्म.)।
शाप, सं पुं. (सं.) दे. 'सराप' २. धिक्कारः।
शापित, वि. (सं.) शाप,-ग्रस्त-बद्ध-पीडित।
शाबाश, अव्य. (फ़ा.) साधु, साधु साधु, शोभनं, सुष्ठु, भद्रम्।
शाबाशी, सं. स्त्री. (फ़ा. शाबाश) प्रशंसा, स्तुतिः (स्त्री.), साधुवादः।
—देना, क्रि. स., अभि-प्रति नंद् (भ्वा.प.से.), प्रोत्सह् (प्रे.)।
शाब्दिक, वि. (सं.) मौखिक, लेखरहित; २. शाब्द, शब्दप्रधान, शब्दसम्बन्धिन्।
शाम[1], सं. स्त्री. (फ़ा.) संध्या, दे.।
शाम[2], सं. स्त्री. (देश.) यष्ट्यादिमध्यवर्ती प्रांतवर्ती वा धातुवलयः।
—जड़ना, क्रि. स., धातुवलयेन खच् (चु.)।
शामत, सं. स्त्री. (अ.) दौर्भाग्यं २. आपद् (स्त्री.) ३. दुर्दशा।
—आना, क्रि. अ., आपदा ग्रस् (कर्म.)।
—का मारा, मु., दैवहतकः, दुर्दैवः, मंदभाग्यः।
शामियाना, सं. पुं. (फ़ा. शाम) महावितानः, बृहदुल्लोचः।
शामिल, वि. (फ़ा.) दे. 'संमिलित'।
शामी, सं. स्त्री. (देश.) दे. 'शाम' (२)।
शायक़, वि. (अ.) प्रेमिन्, अनुरागिन् २. अभिलाषिन्।

शायद, अव्य. (फ़ा.) स्यात्, कदापि, कदाचित्, नाम, सम्भाव्यते ।
शायर, सं. पुं. (अ.) कविः, दे. ।
शायरी, सं. स्त्री. (अ.) काव्यकला २. काव्यं, कविता ।
शारदा, सं. स्त्री. (सं.) सरस्वती दे. २. दुर्गा ३. ब्राह्मी ४. प्राचीनलिपिविशेषः ।
शारीरिक, वि. (सं.) शारीर(-री स्त्री.), कायिक-दैहिक(-की स्त्री.) ।
—भाष्य, सं. पुं. (सं. न.) श्रीशंकराचार्यप्रणीतं ब्रह्मसूत्रभाष्यम् ।
—सूत्र, सं. पुं. (सं.-त्राणि) श्रीवेदव्यासप्रणीतानि वेदांतसूत्राणि (न. बहु.) ।
शार्क, सं. स्त्री. (अं.) जलकिराटः ।
शार्टहैंड, सं. पुं. (अं.) शीघ्र-संक्षिप्त,-लिपी-पिः (स्त्री.) ।
शार्दूल, सं. पुं. (सं.) व्याघ्रः, दे. २. सिंहः, दे. । वि., उत्तम, श्रेष्ठ (केवल समासांत में; उ. नरशार्दूल=नरोत्तम) ।
—विक्रीडित, सं. पुं. (सं. न.) वर्णवृत्तभेदः (छन्द.) ।
शाल[1], सं. पुं. (सं.) सालः, सर्जः, शंकुवृक्षः, अश्वकर्णकः, चीरपर्णः, गंधवृक्षकः, रालनिर्यासः, अग्निवल्लभः, यक्षधूपः, सुरेष्टकः २. दे. 'राल' ३. मीनभेदः (=गजाड़ मछली) ।
शाल[2], सं. स्त्री. (फ़ा.) १-२. और्ण-कौशेय,-प्रावारः-रकः, दे. 'दुशाला' ।
शालग्राम, सं. पुं. (सं.) विष्णुमूर्तिभेदः २. शालबहुलो गंडकीतीरवर्तिग्रामविशेषः ।
शाला, सं. स्त्री. (सं.) गृहं, गेहः-हं, सदनं, अ(आ)गारः-रं २. स्थानं, स्थलं ३. शाखा ।
शालि, सं. पुं. (सं.) व्रीहिश्रेष्ठः, धान्योत्तमः, सुकुमारकः, कैदारः, नृपप्रियः २. गंधमार्जारः ।
—धान, सं. पुं. (सं. शालिधान्यं) * तंडुलोत्तमः, दे. 'वासमती चावल' ।
शालिवाहन, सं. पुं. (सं.) शकजातीयको नृपविशेषः, सातवाहनः ।
शालिहोत्र, सं. पुं. (सं.) पशुचिकित्साशास्त्रलेखकविशेषः २. घोटकः । (सं. न.) पशुचिकित्साशास्त्रम् ।

शालीन, वि. (सं.) विनीत, नम्र २. लज्जाशील ३. समान ४. सदाचारिन् ५. धनाढ्य ६. व्यवहारकुशल ७. शालासंबंधिन् ।
शालीनता, सं. स्त्री. (सं.) विनयः २. लज्जा ३. सदाचारः ।
शावक, सं. पुं. (सं.) शावः, अर्भकः, पोतः, पोतकः, डिंभः पृथुकः, खग-मृग,-शिशुः २.शिशुः (कदाचित्) ।
शाश्वत, वि. (सं.) नित्य, अनन्त, अक्षय, अविनाशिन् ।
शासन, सं. पुं. (सं. न.) शास्तिः-शिष्टिः (स्त्री.), राज्यं, आधिपत्यं, अधिकारः २.आज्ञा, आदेशः ३. राजदत्तभूमिः (स्त्री.) ४. अधिकारपत्रं ५. शास्त्रं ६. इन्द्रियनिग्रहः ७. नियन्त्रणा, नियमनं ८. राज्य-,दण्डः ९. लिखितप्रतिज्ञा ।
—करना, क्रि. स., प्र-,शास् (अ. प. से.), ईश् (अ. आ. से.), तंत्र् (चु.), अधिष्ठा (भ्वा. प. से.), नियम्-विनी (भ्वा. प. अ.) । सं.पुं., ईशनं, अधिष्ठानं, नियमनं, नियंत्रणम् ।
—कर्ता, सं. पुं. (सं.-र्तृ) शासकः, शासनधरः, शास्तृ, शासितृ, अधिष्ठातृ, देशकः ।
—पत्र, सं. पुं. (सं. न.) राजादेशपत्रम् ।
—हर, सं. पुं. (सं.) आज्ञावाहकः २. शासन,-हारक-हारिन् , राजदूतः ।
शासित, वि. (सं.) कृतशासन, अधिकृत, अधिष्ठित, नियंत्रित २. दंडित, दे. ।
शास्त्र, सं. पुं. (सं. न.) धर्मग्रंथः २. विज्ञानम् ।
—कार, सं. पुं. (सं.) शास्त्र,-कृत्-रचयितृ, आचार्यः ।
—चक्षु, सं. पुं. [सं.-क्षुस् (न.)] व्याकरणं २. ज्ञानिन् ।
—ज्ञ, सं. पुं. (सं.) शास्त्र,-दर्शिन्-दृष्टिः विद्-कोविदः-वेत्तृ ।
—वक्ता, सं. पुं. (सं.-क्तृ) उपदेशकः ।
—विरुद्ध, वि. (सं.) धर्मविरुद्ध, अधर्म्य ।
शास्त्रानुसार, क्रि. वि. (सं. न.) यथाशास्त्रं, धर्मानुकूलम् । वि., शास्त्रोक्त, स्मार्त ।
शास्त्री, सं. पुं. (स.-स्त्रिन्) उपाधिभेदः २. धर्मशास्त्रज्ञः ३. दे. 'शास्त्रज्ञ' ।
शास्त्रीय, वि. (सं.) श्रौत, स्मार्त, शास्त्रविषयक २. शास्त्र,-उक्त-विहित ।

शास्त्रोक्त, वि. (सं.) शास्त्र,-विहित-निर्दिष्ट-अनुकूल ।

शाह, सं. पुं. (फ़ा.) महाराजः २. यवनभिक्षूपाधिः । वि., महत्, बृहत्, प्रधान ।

—ज़ादा, सं. पुं. (फ़ा.) दे. 'शहज़ादा' ।

शाही, वि. (फ़ा.) राजकीय २. भूपोचित, राजस ।

शिंगरफ़, सं. पुं. (फ़ा. शंगर्फ़) हिंगुलं,-लः, हिंगुलुः,-लिः, रक्तपारदः, चूर्णपारदं, सुरंगं, रसोद्भवम् ।

शिंघाण, सं. पुं. (स. न.) नासिकामलं, शिंघाणकः-कं २. लोहमलं ३. काचपात्रम् । (सं. पुं.) शिंघाणकः, श्लेष्मन् ।

शिकजबी, सं. स्त्री. (फ़ा. शिकजबीं) पानकं, * अम्लगौल्यम् ।

शिकंजा, सं. पुं. (फ़ा.) १-३. निपीडन-दृढीकरण-निर्गालन,-यंत्रं ४. ग्रन्थनिपीडनयंत्रं ५. निगडः, हडिः ६. दे. 'कोल्हू' ।

शिकंजे में खींचना, मु., प्रमंथ् (क्र्. प. से.), यत् (प्रे.), अत्यर्थं अर्द् (प्रे.)-पीड् (चु.), निगडयति (ना. धा.) ।

शिकन, सं. स्त्री. (फ़ा.) व(ब)ली-लिः (स्त्री.) २. पुटः, भंगः ।

—डालना, क्रि. स., वलिनं कृ २. सपुटं विधा ।

—पड़ना, क्रि. अ. वलिन-वलिभ-वलियुत (वि.) भू २. सपुट-सभंग (वि.) जन् (दि. आ. से.) ।

शिकम, सं. पुं. (फ़ा.) उदरं, जठरम् ।

शिकरा, सं. पुं. (फ़ा.) श्येनभेदः, *शीकरः ।

शिकवा, सं. पुं. (अ.) दे. 'शिकायत' ।

शिकस्त, सं. स्त्री. (फ़ा.) अभि-परा, भवः, पराजयः दे. २. वैफल्यम् ।

—खाना, क्रि. अ., परिभू-विजि (कर्म.), दे. 'हारना' ।

शिकायत, सं. स्त्री. (अ.) (सविलापा) विज्ञापना, दुःखनिवेदनं २. परि(री)वादः, आक्षेपः, गर्हा, निंदा ३. उपालम्भः ४. आमयः, व्याधिः ।

—करना, क्रि. अ., सशोकं सविलापं विज्ञानिविद् (प्रे.) २. आ-अधि-क्षिप् (तु. प. अ), गर्ह् (भ्वा. चु. आ. से.), अप-परि,-वद् (भ्वा. प. से.) ३. उपालभ् (भ्वा. आ. अ.) ।

शिकार, सं. पुं. (फ़ा.) आखेटः-खेटनं-टकं, मृगया, मृगव्यं, आच्छोदनं, पापर्द्धिः (स्त्री.) २. मृग्य,-जंतुः-प्राणिन् ३. मृगयाहतो जीवः ४. मांसं ५. भक्ष्यं ६. प्रतारितः, वञ्चितः ।

—करना, क्रि. स., मृग् (चु. आ. से.; दि. प. से.) मृगयां कृ, अनुधाव् (भ्वा. प. से.) । मु., छलेन धनादिकं हृ (भ्वा. प. अ.) ।

—होना, क्रि. अ., आखेटे हन्-मार् (कर्म.) । मु., वशवर्ती जन् (दि. आ. से.) ।

शिकारी, सं. पुं. (फ़ा.) व्याधः, लुब्धकः, मृगयुः, आखेटकः, जीवांतकः, शाकुनिकः, जालिकः, वागुरिकः । वि., आखेटिक ।

—कुत्ता, सं. पुं., मृगदंशकः, मृगयाकुक्कुरः, विश्वकद्रुः ।

—ब्याह, सं. पुं., गांधर्वविवाहः ।

—लिबास, सं. पुं., मृगया-आखेट,-वेशः(षः) ।

शिक्षक, सं. पुं. (सं.) अध्यापकः, गुरुः, उपाध्यायः, अनुशास्तृ, उपदेशकः, आचार्यः ।

शिक्षण, सं. पुं. (सं. न.) शिक्षा, अध्यापनं, विद्यादानं, पाठनं; अनु,-शासनं-शिष्टिः (स्त्री.), विनयः २. विद्या,-उपादानं-ग्रहणं-अभ्यासः ।

शिक्षा, सं. स्त्री. (सं.) अध्ययनाध्यापनं, पठनपाठनं । २-३. दे. 'शिक्षण' (१-२) ४. निपुणता ५. उपदेशः, मंत्रः ६. वेदांगविशेषः ७. नियंत्रणं ८. दंडः, कुफलम् ।

—हीन, वि. (सं.) अशिक्षित, निरक्षर ।

शिक्षार्थी, सं. पुं. (सं.-र्थिन्) शिक्षाग्राहकः, छात्रः ।

शिक्षालय, सं. पुं. (सं.) शिक्षणालयः, विद्यालयः ।

शिक्षित, वि. (सं.) साक्षर, अक्षराभिज्ञ, लेखनवाचनक्षम, कृतविद्य २. पंडित, विज्ञ । [शिक्षिता (स्त्री.)=कृतविद्या पंडिता इ.] ।

शिखंड-डक, सं. पुं. (सं.) मयूरपुच्छं २. चूड़ा, शिखा ३. काकपक्षः ।

शिखंडी, सं. पुं. (सं-डिन्) मयूरः २. कुक्कुटः ३. द्रुपदपुत्रविशेषः ४. विष्णुः ५. कृष्णः ६. शिवः ७. वाणः ८. गुञ्जा ९. स्वर्णयूथिका ।

शिखर, सं. पुं. (सं. पुं. न.) गिरि,-मस्तकं-शृङ्गं, पर्वताग्रं, कूटं २. उच्चतमो भागः, दे. 'चोटी' ।

शिखरन, सं. स्त्री. (सं. शिखरिणी) *दधिसितोदकम्।

शिखरिणी, सं. स्त्री. (सं.) वर्णवृत्तभेदः २. स्त्रीरत्नं ३. रोमराजी ४. द्राक्षाभेदः ५. दे. 'शिखरन'।

शिखरी, सं. पुं. (सं.-रिन्) पर्वतः २. वृक्षः ३. कोट्टः।

शिखा, सं. स्त्री. (सं.) शिखंडः-डकः, चूड़ा २. अग्निज्वाला, ज्वालः, अर्चिस् (न.) ३. दीप,-अर्चिस् (न.)-शिखा ४. शिखरः-रं ५. किरणः ६. शाखा।

—कंद, सं. पुं. (सं. पुं. न.) दे. 'शलजम'।

—सूत्र, सं. पुं. (सं.-त्रे) चूड़ायज्ञोपवीते (न. द्वि.)।

शिखी, वि. (सं.-खिन्) शिखावत्, चूड़ावत्। सं. पुं. (सं.) मयूरः २. कुक्कुटः ३. दीपकः ४. अग्निः ५. पर्वतः ६. बाणः ७. वृक्षः ८. उल्का, केतुः।

शिगाफ़, सं. पुं. (फ़ा.) छिद्रं, बिलं २. विदरः, भेदः।

शिताब, क्रि. वि. (फ़ा.) शीघ्रं, सत्वरम्।

शिथिल, वि. (सं.) मंदबन्धन, श्लथ, स्रस्त, दे. 'ढीला' २. अलस, मंथर ३. उदासीन ४. दृढ़त्वशून्य ५. बंधनहीन, मुक्त ६. श्रांत, क्लांत ७. अस्पष्ट (शब्दादि) ८. उपेक्षित (नियम)।

शिथिलता, सं. स्त्री. (सं.) शैथिल्यं, श्लथता, स्रस्तता, दे. 'ढीलापन' २. आलस्यं ३. औदासीन्यं ४. दृढ़ताऽभावः ४. श्रांतिः (स्त्री.) ५. नियमभंगः ६. शक्तिन्यूनता।

शिद्दत, सं. स्त्री. (अ.) उग्रता, तीव्रता, प्रचंडता २. आधिक्यम्।

शिर, सं. पुं. (सं.) शिरस् (न.) दे. 'सिर'।

शिर(रा)कत, सं. स्त्री. (अ.) दे. 'शराकत'।

शिरस्त्राण, सं. पुं. (सं. न.) शीर्षण्यं, शिरस्त्रं, दे. 'खोद'।

शिरा, सं. स्त्री. (सं.) सिरा, ईलिका, रक्तवाहिनी नाड़ी (Vein)।

शिरोधार्य, वि. (सं.) अंगी-स्वी,-कार्य, पालयितव्य।

—करना, मु., सादरं स्वी-अंगी,-कृ।

शिरोमणि, सं. पुं. स्त्री. (सं.) चूड़ामणिः, शिरोरत्नं २. प्रधानः, मुख्यः।

शिला, सं. स्त्री. (सं.) शिला,-पट्टः फलकं २. अश्मन्-ग्रावन् (पुं.) ३. गंडशैलः ४. *पेषणशिला, *शिला-पट्टी-पट्टिका, *शिला।

—जीत, सं. पुं. [सं.-जतु (न.)] गिरि-अग-अद्रि-अश्म-शिला,-जं, अश्म,-जतुकं लाक्षा-उत्थं, शिला,-जित् (स्त्री.)-दद्रुः-मलं-स्वेदः।

—लेख, सं. पुं. (सं.) प्रस्तरलेख्यम्।

—वृष्टि, सं. स्त्री. (सं.) करकासारः।

शिलोंछ, सं. पुं. (सं.) उंछशिलं, उपात्तशस्य-क्षेत्रात् शेषावचयनम्।

शिल्प, सं. पुं. (सं. न.) यंत्र-,कला, * हस्त,-कर्मन् (न.)-शिल्पं-व्यवसायः, शिल्पिकं, दे. 'दस्तकारी'।

—कला, सं. स्त्री. (सं.) दे. 'शिल्प'।

—कार, सं. पु. (सं.) शिल्पिन्, कारुः, देवटः, शिल्पजीविन्, शिल्पकारिन्, कर्मकारः।

—विद्या, सं. स्त्री. (सं.) हस्तकौशलं २. गृह-निर्माण-वास्तु,-कला।

—शाला, सं. स्त्री. (सं.) शिल्प(ल्पि),-गृहं-गेहं-शाला-आवेशनम्।

—शास्त्र, सं. पुं. (सं. न.) हस्तव्यवसाय-शास्त्रं २. गृहनिर्माण-वास्तु,-शास्त्रम्।

शिल्पी, सं. पुं. (सं.-पिन्) दे. 'शिल्पकार' २. गृह,-कारकः-संवेशकः, पलगंडः ३. चित्रकारः।

शिव, सं. पुं. (सं.) महादेवः, शंभुः, पशुपतिः, शूलिन्, महा-,ईश्वरः, शंकरः, चंद्रशेखरः, गिरीशः, मृडः, पिनाकिन्, त्रिलोचनः, भूतेशः, धूर्जटिः, हरः, त्र्यंबकः, त्रिपुरारिः, गंगाधरः, वृषध्वजः, भवः, रुद्रः, उमापतिः, महानटः, भैरवः, पचाननः, कंठेकालः, नंदीश्वरः २. परमेश्वरः ३. वेदः ४. शृगालः। (सं. न.) कल्याणं, मंगलम्। वि., कल्याण-मंगल,-कारक-कारिन्।

—द्रुम, सं. पुं. (सं.) विल्ववृक्षः।

—नंदन, सं. पुं. (सं.) गणेशः।

—पुराण, सं. पुं. (सं. न.) शैवपुराणं, पुराण-ग्रंथविशेषः।

—पुरी, सं. स्त्री. (सं.) काशी, शिवतीर्थम् ।

—बीज, सं. पुं. (सं. न.) पारदः, शिववीर्यम् ।

—रात, सं. स्त्री. (सं. शिवरात्रिः) शिवचतुर्दशी, फाल्गुनकृष्णचतुर्दशी ।

—लिंग, सं. पुं. (सं. न.) शिवप्रतिमाभेदः ।

—लिंगी, सं. स्त्री. (सं. लिंगिनी) शिव,-वल्ली-वल्लिका, ईश्वरलिंगी, चित्रफला ।

—लोक, सं. पुं. (सं.) कैलासः, शिवशैलः ।

—वाहन, सं. पुं. (सं.) शिववृषभः, नंदिन् ।

—सुंदरी, सं. स्त्री. (सं.) दुर्गा ।

शिवा, सं. स्त्री. (सं.) दुर्गा २. पार्वती ३. शृगाली ।

शिवाला, सं. पुं. (सं.-लयः) शिव,-मंदिरं-आयतनं २. देवालयः ३. श्मशानम् ।

शिवि, सं. पुं. (सं.) उशीनरनृपपुत्रः, ययातिदौहित्रः २. हिंस्रपशुः ३. भूर्जवृक्षः ।

शिविका, सं. स्त्री. (सं.) याप्ययानं, शिबिरथः, दे. 'पालकी' ।

शिविर, सं. पुं. (सं. न.) कटकः-कं, निवेशः, आगन्तुकसैन्यवासः २. पट,-मंडपः-कुटी, दे. 'तंबू' ३. दुर्गः-र्गम् ।

शिशिर, सं. पुं. (सं. पुं. न.) कंपनः, शीतः, हिमकूटः, कोटनः (माघ तथा फाल्गुन) २. तुषारः, तुहिनम् । वि., शीत, शीतल, उष्णताशून्य ।

—कर, सं. पुं. (सं.) हिमांशुः, चंद्रः ।

—काल, सं. पुं. (सं.) शीतर्तुः, शीतकालः ।

शिशु, सं. पुं. (सं.) स्तनंधयः, स्तनपः, वत्सः, बालकः, दारकः, उत्तानशयः, डिंभः, अपत्यम् ।

शिशुता, सं. स्त्री. (सं.) शिशुत्वं, शैशवं, बाल्यं दे. ।

शिशुपाल, सं. पुं. (सं.) चेदिराजः, दमघोषसुतः, चैद्यः ।

—वध, सं. पुं. (सं. न.) महाकविमाघप्रणीतमहाकाव्यविशेषः ।

शिष्ट, वि. (सं.) सभ्य, भद्र, श्रेष्ठ, सुशील २. धर्मशील ३. शांत ४. बुद्धिमत् ५. शालीन, व्यवहारनिपुण ६. प्रख्यात ७. आज्ञाकारिन् ।

शिष्टता, सं. स्त्री. (सं.) सभ्यता, भद्रता, सुशीलता, श्रेष्ठता २. अधीनता ।

शिष्टाचार, सं. पुं. (सं.) सदाचारः, सद्व्यवहारः २. सत्कारः, संमानः ३. विनयः, प्रश्रयः ४. उपचारः, आचारः, यथाविधि वर्तनं ५. आतिथ्यं, आतिथेयम् ।

शिष्य, सं. पुं. (सं.) छात्रः, अंते,-वासिन्-सद्, विद्यार्थिन्, शिक्षार्थिन् २. अनु,-गामिन्-यायिन् ।

शिस्त, सं. स्त्री. (फ़ा.) शरव्यं, लक्ष्यम् ।

—बाँधना, मु., लक्ष्ये दृष्टिं बंध् (क्र्. प. अ.) ।

शीकर, सं. पुं. (सं.) पवनादिप्रेरित-, जलकणः, तुषारः २. अवश्यायः, दे. 'ओस' ३. स्वल्पवृष्टिः (स्त्री.), दे. 'फुहार' (३) ।

शीघ्र, क्रि. वि. (सं. शीघ्रं) आशु, सद्यः, सपदि, अचिरेण, अविलंबेन, सत्वरं, झटिति ।

—कारी, वि. (सं.-रिन्) विलम्बासह, आशुकारिन् ।

—कोपी, वि. (सं.-पिन्) कोपन, आशुक्रोधिन् ।

—गामी, वि. (सं.-मिन्) द्रुतगामिन्, आशु ।

—चेतन, वि. (सं.) तीव्रबुद्धि ।

—वेधी, सं. पुं. (सं.-धिन्) लघुहस्तः ।

शीघ्रता, सं. स्त्री. (सं.) त्वरा, क्षिप्रता, लाघवं, तरस्-रंहस् (न.), जवः, वेगः, रभसः-सम् ।

—करना, क्रि. अ., त्वर् (भ्वा. आ. से.), सत्वर-झटिति कृ ।

शीत, वि. (सं.) शीतल, शिशिर, हिम, तुषार, उष्णत्वशून्य २. शिथिल, दीर्घसूत्रिन् । सं. पुं. (सं. न.) शीतः, शीतर्तुः, शीतकालः, शिशिरः, हिमागमः २. शीतता, हिमता, शैत्यं ३. अवश्यायः, तुषारः ४. प्रतिश्यायः, दे. 'जुकाम' ५. जलम् ।

—कटिबंध, सं. पुं. (सं.) कर्कमकररेखापरवर्तिनौ अतिशीतौ भूभागौ (पुं. द्वि.) ।

—काल, सं. पुं. (सं.) दे. 'शीत' सं. पुं. (१) ।

—किरण, सं. पुं. (सं.) शीत-हिम,-करः-रश्मिः-अंशुः-द्युतिः, चंद्रः ।

—ज्वर, सं. पुं. (सं.) दे. 'मलेरिया' ।

शीतता, सं. स्त्री. (सं.) शैत्यं, शीतं-तलम् ।

शीतल, वि. (सं.) दे. 'शीत' वि. । २. शांत, शमान्वित ३. संतुष्ट, प्रसन्न ।

शीतलता, सं. स्त्री. (सं.) दे. 'शीतता' ।

शीतला, सं. स्त्री. (सं.) विस्फोटकरोगः, विस्फोटा, मसूरिका, शीतली, वसंतरोगः, दे. 'चेचक' २. वसंतविस्फोटकादीनामधिष्ठात्री देवी।
शीतांशु, सं. पुं. (सं.) चंद्रः २. कर्पूरः-रम्।
शीर, सं. पुं. (फ़ा.) क्षीरं, दुग्धं, दे. 'दूध'।
शीरा, सं. पुं. (फ़ा.) दे. 'शरबत' २. दे. 'चाशनी'।
शीरीं, वि. (फ़ा.) मधुर २. प्रिय।
शीरीनी, सं. स्त्री. (फ़ा.) मिष्टान्नं, दे. 'मिठाई' २. माधुर्यम्।
शीर्ण, वि. (सं.) कृश, क्षीणतनु, क्षाम २. भग्न, खंडित ३. च्युत ४. जीर्ण, विदीर्ण ५. म्लान, विरस।
शीर्णता, सं. स्त्री. (सं.) कृशता, दौर्बल्यं, जीर्णता, विदीर्णता।
शीर्ष, सं. पुं. (सं. न.) शिरस् (न.), दे. 'सिर' २. ललाटं, दे. 'माथा' ३. शिखरं ४. अग्रभागः।
शीर्षक, सं. पुं. (सं. न.) अग्राक्षरपंक्तिः शिरःपंक्तिः (स्त्री.) २. शिरस्त्रं, दे. 'खोद'।
शील, सं. पुं. (सं. न.) चरित्रं, आचरणं, वृत्तिः (स्त्री.) ३. स्वभावः, प्रकृतिः (स्त्री.) ४. सदाचारः, सच्चरित्रम् ५. सत्,-स्वभावः-प्रकृतिः (स्त्री.) ६. हृदयमार्दवं ७. संकोचः, आदरः वि.,-पर,-परायण (उ. दानशील)।
शीलवान, वि. (सं.-वत्) सदाचारिन्, सद्वृत्त २. सत्स्वभाव, कोमलप्रकृति, सुशील।
शीशम, सं. स्त्री. (फ़ा.) शिंशपा, पिच्छि-(च्छ)ला, पिंगला, कपिला, भस्मगर्भा।
शीशमहल, सं. पुं. (फ़ा.शीशा+अ. महल) काच-स्फटिक,भवनं २. काचकोष्ठः, आदर्शावासः।
—का कुत्ता, मु., उन्मत्तः, वातुलः।
शीशा, सं. पुं. (फ़ा.) काचः, दे. २. आदर्शः, मुकुरः, दर्पणः, दे. ३. काचफलकः-कम्।
शीशी, सं. स्त्री. (फ़ा. शीशा) काचकूपी।
—सुँघाना, औषधगंधेन मूर्च्छ् (प्रे.)।
शुंठी, सं. स्त्री. (सं.) कटुग्रंथिः, दे. 'सोंठ'।
शुक, सं. पुं. (सं.) कीरः, वक्रतुंडः, दे. 'तोता' २. महर्षि-व्यासपुत्रः।
शुक्ति, सं. स्त्री. (सं.) मुक्तामातृ (स्त्री.), दे. 'सीपी'।

—बीज, सं. पुं. (सं. न.) मौक्तिकं, शुक्तामणिः।
शुक्र, सं. पुं. (सं.) सितः, श्वेतः, काव्यः, कविः, भार्गवः, दैत्यगुरुः २. अग्निः ३. ज्येष्ठमासः ४. शुक्रवासरः। (सं. न.) बीजं,वीर्यं-रेतस् (न.) २. बलं, सामर्थ्यम्। वि. (सं.) भासुर, देदीप्यमान २. स्वच्छ, उज्ज्वल।
शुक्र,[२] सं. पुं. (अ.) धन्यवादः, कृतज्ञताप्रकाशः।
—गुज़ार, वि. (अ.+फ़ा.) कृतज्ञ, दे.।
—गुज़ारी, सं. स्त्री. (अ.+फ़ा.) कृतज्ञता।
शुक्ल, वि. (सं.) धवल, सित, श्वेत, दे. 'सफ़ेद'।
—पक्ष, सं. पुं. (सं.) शुक्लकः, दे. 'पक्ष' में।
शुक्लता, सं. स्त्री. (सं.) धवलता, दे. 'सफेदी'।
शुचि, वि. (सं.) वि-शुद्ध, पवित्र, पूत २. उज्ज्वल, निर्मल ३. निर्दोष, निष्पाप ४. शुद्ध मानस।
शुतुरमुर्ग़, सं. पुं. (फ़ा.) * उष्ट्रकुक्कुटः।
शुदनी, सं. स्त्री. (फ़ा.) नियतिः (स्त्री.), भवितव्यता।
शुद्ध, वि. (सं.) केवल, स्वच्छ, मिश्रणशून्य २. उज्ज्वल, श्वेत ३. त्रुटिरहित, यथातथ, यथार्थ ४. निर्दोष ५. पूत, पवित्र, पावन, मेध्य।
—करना, क्रि. स., परि-,पू (क्र्. उ. से.), शुचीकृ। परि-वि-सं-, शुध् (प्रे.), निर्मलीकृ २. प्रतिसमा-समा-धा (जु. उ. अ.), त्रुटिरहितं विधा (जु. उ. अ.)।
शुद्धता, सं. स्त्री. (सं.) शुचिता, शौचं, पवित्रता, पूनता, वि,-शुद्धिः (स्त्री.) २. निर्दोषता, यथार्थता।
शुद्धि, सं. स्त्री. (सं.) दे. 'शुद्धता' (१)। २. स्वच्छता, नैर्मल्यं ३. वैदिकधर्मप्रवेशसंस्कारः।
—पत्र, सं. पुं. (सं. न.) त्रुटिदर्शकपत्रम्।
शुबहा, सं. पुं. (अ.) संदेहः २. भ्रमः।
शुभ, वि. (सं.) मंगल, हित, कल्याण २. उत्तम, भद्र। सं. पुं. (सं.न.) मंगलं, हितं, कल्याणम्।
—कर्म, सं. पुं. (सं.-र्मन् न.) सुकृत्यं, पुण्यम्।
—चिंतक, वि. (वि.) हितैषिन्, हितचिंतक।
—दर्शन, वि. (वि.) प्रिय-सु,-दर्शन, सुन्दर।

—फल, सं. पुं. (सं. न.) सुपरिणामः ।
—घड़ी, सं. स्त्री., मांगलिकमुहूर्तः र्तम् ।
शुभ्र, वि. (सं.) श्वेत, शुक्ल, भासुर ।
शुभ्रता, सं. स्त्री. (सं.) शुक्लता, भासुरता ।
शुमार, सं. पुं. (फ़ा.) 'गणनं'. संकलनम् ।
शुमाल, सं. पुं. (अ.) उदीची, दे. 'उत्तर' (दिशा) ।
शुरू, सं. पुं. (अ.) उपक्रमः, आरंभः दे. २. प्रभवः, आदिः ।
शुल्क, सं. पुं. (सं. पुं. न.) घट्टपथादीनां करः २. वरात् ग्राह्योऽर्थः ३. युतकं, दे. 'दहेज़' ४. पणः, ग्लहः ५. मूल्यं ६. भाटं, भाटकं ७. प्रतिफलं, वेतनम् ।
शुश्रूषा, सं. स्त्री. (सं.) परिचर्या, सेवा दे. २. श्रवणेच्छा ।
शुष्क, वि. (सं.) निर्जल, आर्द्रतारहित, वान २. वि-नी-अ,-रस, निःस्वाद ३. खेदकर, अरुचिकर ४. मोघ, निरर्थक ५. रूक्ष, स्नेहहीन ६. जीर्ण, शीर्ण ।
शुष्कता, सं. स्त्री. (सं.) शोषः, शुष्कता २. नीरसता ३. अरोचकता ४. रूक्षता ५. जीर्णता ।
शूकर, सं. पुं. (सं.) वराहः, दे. 'सूअर' ।
शूद्र, सं. पुं. (सं.) वृषलः, दासः, पादजः, पद्यः, पज्जः, जघन्यः, द्विजसेवकः, उपासकः, चतुर्थः २. निकृष्टः ३. सेवकः ।
शूद्रक, सं. पुं. (सं.) मृच्छकटिकरचयिता महाकविः २. शूद्रः ३. शंबुकः, तपस्विशूद्रविशेषः (रामायण) ।
शूद्रा, सं. स्त्री. (सं.) शूद्रजातेः स्त्री ।
शूद्री, सं. स्त्री. (सं.) शूद्रस्य पत्नी ।
शून्य, वि. (सं.) रिक्त, वशिक, शून्य-रिक्त,-गर्भ-मध्य २. निराकार ३. असत् ४. रहित । सं. पुं. (सं. न.) आकाशः-शं दे. २. विंदुः, खं ३. रिक्त-एकांत-निर्जन,-स्थानं ४. अभावः ।
शून्यता, सं. स्त्री. (स.) शून्यत्वं, रिक्तता ।
शूप, सं.पुं. (सं. शूर्पः-र्पं) सूर्पः, कुल्यः, प्रस्फोटनं-नी, दे. 'छाज' ।
शूर, सं. पुं. (सं.) दे. 'वीर' ।
शूरण, सं. पुं. (सं.) दे. 'सूरन' ।
शूरता, सं. स्त्री. (सं.) दे. 'वीरता' ।
शूर्प, सं. पुं. (सं. पुं. न.) दे. 'शूप' ।
—कर्ण, सं. पुं. (सं.) गजः २. गणेशः ।
—णखा, सं. स्त्री. (सं.) रावणभगिनी ।
शूल, सं. पुं. (सं. पुं. न.) उदरवेदना, जठरव्यथा, वातरोगभेदः २. पीडा, क्लेशः व्यथा ३. कुंतः, प्रासः ४. त्रिशूलं, त्रिशीर्षकं ५. ध्वजः ६. मृत्युः ७. अयःकीलः ८. शलाका ९. दे. 'सूली' ।
—धारी, सं. पुं. (सं.-रिन्) शूल,-धर-ग्राहिन्-पाणिः, शिवः ।
शूली, सं. पुं. (सं.-लिन्) शिवः, शूलपाणिः २. शशकः ३. शूलार्त्तः । सं. स्त्री., दे. 'सूली' ।
शृंखला, सं. स्त्री. (सं.) शृंखलः-लं, निगडः, बंधः, बंधनं २. क्रमः, परंपरा ३. श्रेणी, पंक्तिः (स्त्री.) ४. मेखला, पुंस्कटिवस्त्रबन्धः ५. कांची, रश(स)ना ।
—बद्ध, वि. (सं.) शृङ्खलित, निगडित २. क्रम-श्रेणी, बद्ध ।
शृंग, सं. पुं. (सं. न.) विषाणं, दे. 'सींग' २. सानुः, कूटः-टं, शिखरं, शैलाग्रं ३. वाद्यभेदः ४. कामोत्तेजना ५. क्रीडाजलयंत्रं (पिचकारी, दे. रघुवंश १६।७०) ६. दे. 'कंगूरा' ।
शृंगार, सं. पुं. (सं.) रसविशेषः (सा.) २. मैथुनस्पृहा ३. मंडनं, भूषणं, प्रसाधनं, अलंकरणं, परिष्करणं ४. संभोगः, मैथुनं ५. मंडन-प्रसाधन,-साधन-द्रव्य (चंदनादि) दे. 'षोडश संस्कार' ।
—करना, क्रि. स., अलंकृ, परिष्कृ, प्रसाध् (प्रे.), भूष्-मंड् (चु.) ।
—योनि, सं. पुं. (सं.) मदनः, कंदर्पः ।
शृंगी, सं. पुं. (सं.-गिन्) गजः २. वृक्षः ३. पर्वतः ४. ऋषिविशेषः ५. शृङ्गवत् पशुः ६. वाद्यभेदः ७. महादेवः ।
शृगाल, सं. पुं. (सं.) गोमायुः, क्रोष्टुः, जंबु-(बू)कः, दे. 'गीदड़' । वि., भीरु २. खल ३. निष्ठुर ।
शेख, सं. पुं. (अ.) श्रीमोहंमदवंशजानामुपाधिः २. यवनवर्गविशेषः ३. यवनोपदेशकः ४. वृद्धः ।
—चिल्ली, सं. पुं. (अ. + हिं.) मंदः, जडः २. भंडः, विदूषकः ।

शेखर, सं. पुं. (सं.) शिरोमाल्यं, शीर्षमाला २. शिरोभूषणमात्रं ३. शीर्षं ४. किरीटः, मौलिः ५. पर्वताग्रं, सानुः।

शेखी, सं. स्त्री. (अ. शेख़ः) दर्पः, गर्वः २. विकत्थनं, गर्वोक्तिः (स्त्री.)।

—बाज़, वि. (हिं. + फ़ा.) विकत्थक, आत्मश्लाघिन् २. दृप्त।

—झड़ना या **निकलना,** मु., गर्वः खंड् (कर्म.), मदः व्यपगम् (भ्वा. प. अ.) लघूभू।

—बघारना,-मारना या-**हाँकना,** मु., विकत्थ् (भ्वा. आ. से.), आत्मानं श्लाघ् (भ्वा. आ. से.)।

शेर[1], सं. पुं. (फ़ा.) द्वीपिन्, भेलः, मृगांतकः, शार्दूलः, व्याघ्रः. दे. २. केसरी, सिंहः दे. ३. वीरः, शूरः।

—पंजा, सं. पुं. (फ़ा.+हिं.) दे. 'बघनखा'।

—बच्चा, सं. पुं. (फ़ा.+हिं.) सिंह-व्याघ्र,-पोतः-शावकः २. वीरः, शूरः।

—बबर, सं. पुं. (फ़ा.) दे. 'शेर' (२)।

—मर्द, वि. (फ़ा.) वीर, निर्भय।

—होना, मु., भयं मुच् (तु. प. अ.), निर्भय (वि.) भू।

शेर[2], सं. पुं. (अ.) कवितायाश्चरणद्वयं (उर्दू, फ़ारसी आदि)।

शेरनी, सं. स्त्री. (फ़ा. शेर) व्याघ्री, द्वीपिनी २. सिंही, केसरिणी इ.।

शेरवानी, सं. स्त्री. (देश.) *आजानुलंबी कञ्चुकभेदः।

शेष, सं. पुं. (सं.) अनंतः, सर्पराजः, शेषनागः, फणींद्रः, फणीश्वरः २. परमेश्वरः ३. लक्ष्मणः ४. बलरामः ५. अंतरम् (गणित) ६. अन्तः ७. परिणामः ८. गजः ९. मृत्युः १०. नाशः। (सं. पुं. न.) अव-परि,-शेषः, उद्वर्तः, अवशिष्ट-उपयुक्तेतर,-वस्तु (न.) २. अध्याहार्यशब्दः। वि., अवशिष्ट २. समाप्त ३. इतर, अपर, अन्य।

—नाग, सं. पुं. (सं.) दे. 'शेष' सं. पुं. (१)।

—शायी, सं. पुं. (सं.-शायिन्) विष्णुः।

शेषांश, सं. पुं. (सं.) १-२. अवशिष्ट-अंतिम,-भागः।

शैतान, सं. पुं. (अ.) ईश्वरविरोधी देवविशेषः (सामी धर्म) २. भूतः, प्रेतः ३. क्रूरः ४. दुष्टः, खलः ५. कामः, मदनः ६. क्रोधः।

शैतानी, सं. स्त्री. (अ. शैतान) दुष्टता, कुचेष्टा।

शैत्य, सं. पुं. (सं. न.) शीतता, शीतलत्वम्।

शैथिल्य, सं. पुं. (सं. न.) शिथिलता, दे.।

शैल, सं. पुं. (सं.) गिरिः, अद्रिः, पर्वतः, दे.। २. गंडशैलः, दे. 'चट्टान' ३ दे. 'शिलाजीत'।

—कुमारी, सं. स्त्री. (सं.) अद्रितनया, शैल,-कन्या-जा, दे. 'पार्वती'।

शैली, सं. स्त्री. (सं.) भाषण-लेखन,-रीतिः-सरणिः (दोनों स्त्री.)-प्रकारः २. प्रथा, रीतिः ३. परिपाटिः (स्त्री.), प्रणाली ४. चर्या, वर्तनं, वृत्तिः (स्त्री.)।

शैलेंद्र, सं. पुं. (सं.) हिमगिरिः, हिमालयः।

शैव, सं. पुं. (सं.) शिव,-भक्तः-उपासकः-अनुयायिन् २. संप्रदायविशेषः। वि. (सं.) शिवसंबन्धिन्।

शैव्या, सं. स्त्री. (सं.) सत्यहरिश्चन्द्रपत्नी।

शैशव, सं. पुं. (सं. न.) शिशुता-त्वं, बाल्यम्। वि. (सं.) बाल-बाल्य,-संबंधिन्।

शोक, सं. पुं. (सं.) आर्तिः (स्त्री.) आधिः, दुःखं, परितापः, खेदः, शुच् (स्त्री.), शुचा, मन्युः, निस्समः, शोचनम्।

शोकार्त, वि. (सं.) शोकिन्, शोक,-आकुल-आतुर-ग्रस्त-उपहत-विह्वल, सशोक, परितप्त।

शोख, वि. (फ़ा.) धृष्ट, वियात २. चंचल, चपल ३. गाढ, भासुर (रंग) ४. दुर्ललित, कुचेष्टक।

शोखी, सं. स्त्री. (फ़ा.) धाष्ट्र्यं, वैयात्यं २. चाञ्चल्यं ३. गाढ़ता, प्रखरता।

शोच, सं. पुं. (सं. शोचनं) शोकः २. चिंता।

शोचनीय, वि. (सं.) आपन्न, दुःख, आर्त्त, निरानंद २. सांशयिक, संदिग्ध।

शोण, सं. पुं. (सं.) रक्त-लोहित,-वर्ण-रंगः २. नदविशेषः, हिरण्यवाहः ३. माणिक्यं ४. रक्तेक्षुः ५. अग्निः ६. लोहिताश्वः। सं. न., रुधिरं २. सिंदूरम्।

—रत्न, सं. पुं. (सं. न.) पद्मरागमणिः, शोणितोपलः।

शोणित, सं. पुं. (सं. न.) रुधिरं, रक्तं दे.। वि. (सं.) लोहित, रक्त, शोण।

शोथ, सं. पुं. (सं.) शोफः, शोथकः, श्वयथुः।

शोध, सं. पुं. (सं.) शोधनं, निस्तारः (ऋणादि का) २. अनुसंधानं, अन्वेषणं ३. शुद्धिः (स्त्री.), शुद्धिसंस्कारः ४. परीक्षा क्षणम्।

शोधक, सं. पुं. (सं.) पावन, शोधन, मलहर २. अन्वेषक, अनुसंधातृ ३. दे. 'सुधारक'।

शोधन, सं. पुं. (सं. न.) पावनं, संस्करणं, निर्मली-पवित्री-शुची,-करणं, मार्जनं, प्रक्षालनं, धावनं २. प्रतिसमा-समा,-धानं, त्रुटिनिरसनं ३. धातूनां निर्दोषीकरणं ४. अन्वेषणं, अनुसंधानं ५. परीक्षणं ६. ऋणनिस्तारणं ७. दंडः ८. प्रायश्चित्तं ९. विरेचनं १०. निंबूकं ११. व्यवकलनम्।

शोधना, क्रि. स. (सं. शोधनं) दे. 'शुद्ध करना' (१-२) ३. औषधार्थं धातुं संस्कृ ४. अन्विष् (दि. प. से.), अनुसंधा (जु. उ. अ.)। सं. पुं., दे. 'शोधन'।

शोधनीय, वि. (सं.) पवनीय; मार्जनीय २. निस्तार्य, प्रत्यर्पयितव्य ३. अनुसंधेय।

शोभन, वि. (सं.) सुंदर, रम्य, रमणीय, २. उत्तम, श्रेष्ठ ३. उचित, उपयुक्त ४. मांगलिक, मंगल्य, मंगलीय।

शोभा, सं. स्त्री. (सं.) कांतिः-द्युतिः-दीप्तिः (स्त्री.), भा, भासा, श्रीः (स्त्री.) २. छवीविः (स्त्री.), सुन्दरता, रुचिरता ३. भूषा, परिष्क्रिया ४. वर्णः, रंगः ५. श्रेष्ठगुणः।

—देना, क्रि. अ., राज्-शुभ् (भ्वा. आ. से.)।

शोभायमान, वि. (सं. शोभमान) राजमान, भ्राजमान, भासुर, देदीप्यमान, सुन्दर २. विद्यमान, उपस्थित।

शोभित, वि. (सं.) शोभान्वित, सुन्दर, छविमत्। २. मंडित, भूषित ३. उपस्थित, विद्यमान।

शोर, सं. पुं. (फ़ा.) महारवः. कलकल;, कोलाहलः दे.।

—मचाना, क्रि. अ., कोलाहलं कृ, उत्क्रुश् (भ्वा. प. अ.)।

शोरबा, सं. पुं. (फ़ा.) यूषः-षं, सूपः, लासः, *रसः २. मांसरसः, दे. 'यख़नी'।

शोरा, सं. पुं. (फ़ा. शोर) यवक्षारः, विपाकिन्, निपीतिन्, पाक्यः।

शोरे का तेज़ाब, सं. पुं., भूयिकाम्लः, पाक्यद्रावकं, नत्रिक-यवक्षार,-अम्लः।

शोला, सं. पुं. (अ.), ज्वाला, अर्चिस् (न.)।

शोशा, सं. पुं. (फ़ा.) अद्भुत-विलक्षण,-वार्त्ता २. व्यंग्योक्तिः (स्त्री.)३. कलहोत्पादिका वार्त्ता।

शोषक, वि. (सं.) रसाकर्षक, शोषणकर २. क्षय-ध्वंस,-कारिन्।

शोषण, सं. पुं. (सं. न.) रसाकर्षणं, शुष्कीकरणं २. क्षपणं ३. वि,-नाशनं, वि,-ध्वंसनं ४. सारोद्धारः ५. चूषणम्।

शोहदा, सं. पुं. (अ.) दे. 'लुच्चा'।

शोहरत, सं. स्त्री. (अ.) ख्यातिः-प्रसिद्धिः (स्त्री.)।

शोहरा, सं. पुं. (अ. शोहरत, दे.)।

शौक, सं. पुं. (अ.) अभि,-रुचिः (स्त्री.), प्रवृत्तिः (स्त्री.), प्रवणता २. लालसा, उत्कंठा, औत्सुक्यम्।

—करना, मु., भुज् (रु. आ. अ.)।

—चर्राना, मु , तीव्रम् अभिलष् (भ्वा.प.से.)।

—पूरा करना, मु., कामं उपभोगेन शम् (प्रे.)।

—से, मु., सानंदं, सहर्षं, समोदम्।

शौकीन, सं. पुं. (अ. शौक) प्रसाधन-शृङ्गार-सुवेश,-प्रियः, वेषाभिमानिन्, छेकः २. वेश्यागामिन् ३. प्रेमिन्, अनुरागिन्, स्नेहिन्, अभिलाषिन्।

शौकीनी, सं. स्त्री. (हिं. शौकीन) वेषाभिमानः, शृङ्गारप्रियता २. वेश्यागमनम्।

शौच, सं. पुं. (सं. न.) शुद्धता, शुद्धिः (स्त्री.), पवित्रता, पूतता, शुचिता-त्वं, पुण्यता, निष्पापता २. प्रातः-कृत्यानि कार्याणि (न. बहु०) (शौच, स्नान, संध्या आदि) ३. पुरीषोत्सर्गः, हदनम्।

शौरसेनी, सं. स्त्री. (सं.) १-२. प्राकृत-अपभ्रंश,-भाषाविशेषः।

शौर्य, सं. पुं. (सं. न.) शूरता, वीरता, पराक्रमः।

शौहर, सं. पुं. (फ़ा.) पतिः, भर्तृ।

श्मशान, सं. पुं. (सं. न.) पितृ,-वनं, काननं, अंतशय्या, शतानकं, रुद्राक्रीडः, दाहसरः (पुं.), शवसानम्।

—वासी, सं. पुं. (सं.-सिन्) शिवः, २. चांडालः।

श्मश्रु, सं. पुं. (सं. न.) कूर्चः,-र्चं, चोटः, व्यंजनं, मुखरोमन् (न.), शिंगिन् (न.), शिंघाणं, दे. 'दाढ़ी'।

—वर्धक, सं. पुं. (सं.) नापितः।

श्याम, सं. पुं. (सं.) श्रीकृष्णः २. कृष्णवर्णः। वि. (सं.) काल, कृष्ण २. कालनील, कृष्ण-मेचक।

—सुंदर, सं. पुं. (सं.) श्रीकृष्णः।

श्यामता, सं. स्त्री. (सं.) कालिमन् कृष्णिमन् (पुं.) २. नीलता, मेचकता।

श्यामल, वि. (सं.) काल २. कालीन।

श्यामा, सं. स्त्री. (सं.) राधा-धिका २.शकुनी, कालिका, कृष्णा (खगभेदः) ३. अप्रसूतांगना ४. (तप्तकांचनवर्णाभा) नारी ५. कृष्णा गौः (स्त्री.) ६. यमुना ७. रात्री।

श्येन, सं. पुं. (सं.) शशादः-दनः, कपोतारिः, खगांतकः, घाति-रण,-पक्षिन्, नीलपिच्छः।

श्येनी, सं. स्त्री. (सं.) श्येनिका, नीलपिच्छी-च्छा।

श्रद्धा, सं. स्त्री. (सं.) आदरः, संमानः, सत्कारः २. विश्वासः, प्रत्ययः, विश्रंभः ३. निष्ठा, आस्था, भक्तिः (स्त्री.)।

—करना या **—रखना,** क्रि अ., श्रद्धा (जु उ. अ.), विश्वस् (अ. प. से.)।

—हीन, वि. (सं.) अविश्वासिन्, अश्रद्दधान २. आस्था-निष्ठा-भक्ति,-हीन।

श्रद्धालु, वि. (सं.) श्रद्धा,-वत्-युक्त-अन्वित, श्रद्दधान, विश्वासिन्, प्रत्ययिन् २. (स्त्री.) दोहदवती।

श्रद्धेय, वि. (सं.) विश्वास-श्रद्धा,-पात्रं-आस्पदं, श्रद्धातव्य, पूज्य, सं-,मान्य, नमस्य।

श्रम, सं. पुं. (सं.) परिश्रमः, दे.। २. श्रांतिः (स्त्री.) ३. व्यायामः।

—जल, सं. पुं. (स. न.) प्र,-स्वेदः, श्रम,-कणाः-शीकराः (बहु०) दे. 'पसीना'।

—जीवी, सं. पुं. (सं.-विन्) श्रमिकः, कर्मकरः, दे. 'मज़दूर'।

श्रवण, सं. पुं. (सं. पुं. न.) कर्णः, श्रवः, श्रोत्रं, दे. 'कान' सं. न. निशमनं, आकर्णनम् (सं. पुं. स्त्री.) श्रवणानक्षत्रम्।

श्रवणा, सं. स्त्री. (सं.) श्रवणः-णं, नक्षत्र-विशेषः।

श्रव्य, वि. (सं.) दे. 'श्राव्य'।

श्रांत, वि. (सं.) क्लांत, ग्लान, खिन्न, श्रमार्त्त, अवसन्न, जातश्रम २. शांत ३. निवृत्त।

गुणलुब्धाः स्वयमेव संपदः।	सम्पत्तियाँ स्वयं गुणों की लोभी होती हैं।
गुणान् भूषयते रूपम्।	रूप गुणों को अलंकृत कर देता है।
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।	गुणियों में गुण ही पूज्य होते हैं, न बाह्य चिह्न और न आयु।
गुणी गुणं वेत्ति न वेत्ति निर्गुणः।	गुण का मूल्य गुणी जानता है, निर्गुण नहीं।
गुणैर्विहीना बहु जल्पयन्ति।	गुणहीन मनुष्य वाचाल होते हैं।
गुरुतां नयन्ति हि गुणा न संहतिः। (किरात०)	गौरव गुणों से मिलता है, समूह से नहीं।
गृहे या पुण्यनिष्पत्तिः साध्वनि भ्रमतः कुतः। (कथा०)	गार्हस्थ्य में जो पुण्य किये जा सकते हैं वे संन्यास में नहीं।
ग्रामस्यार्थे कुलं त्यजेत्।	गाँव की रक्षा के लिये कुल की बलि दे दे।
चकास्ति योग्येन हि योग्यसंगमः (नैषध०)	योग्य से योग्य का मेल ही शोभा देता है।
चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।	दुःख और सुख (रथ के) चक्र के तुल्य घूमते हैं।
चक्षुःपूतं न्यसेत् पादम्।	देखकर ही पग रखना चाहिये।
चपलौ किल शूराणां रणे जयपराजयौ। (कथा०)	युद्ध में वीरों की जय या पराजय अनिश्चित होती है।
चाण्डालोऽपि नरः पूज्यो यस्यास्ति विपुलं धनम्।	अति धनवान चाण्डाल भी पूज्य है।
चित्तमेतदमलीकरणीयम्।	इस चित्त को निर्मल करना चाहिये।
चित्ते वाचि क्रियायां च साधूनामेकरूपता।	सज्जनों के मन, वाणी और कर्म में समानता रहती है।
चित्रा गतिः कर्मणाम्।	कर्मों की गति न्यारी।
चिन्ता जरा मनुष्याणाम्।	चिन्ता मनुष्यों का बुढ़ापा है।
चिन्तासमं नास्ति शरीरशोषणम्।	चिन्ता के समान शरीर को कोई भी नहीं सुखाता।
चौराणामनृतं बलम्।	झूठ ही चोरों का बल है।
चौरे गते वा किमु सावधानम्!	चोर के भाग जाने पर सावधानता से क्या!
छिद्रेष्वनर्था बहुलीभवन्ति।	दोषों के कारण अनेक विपत्तियाँ आ घेरती हैं।
जठरं को न बिभर्ति केवलम्!	केवल अपना पेट कौन नहीं भर लेता!
जपतो नास्ति पातकम्।	जप करने वाला पाप-मुक्त रहता है।
जरा रूपं हरति।	बुढ़ापा सौन्दर्य का नाशक है।
जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।	बूँद-बूँद करके घड़ा भर जाता है।
जातस्य हि ध्रुवो मृत्युः।	उत्पन्न व्यक्ति की मृत्यु अटल है।
जातापत्या पतिं द्वेष्टि।	संतानवती नारी पति से द्वेष करती है।
जातौ जातौ नवाचाराः।	प्रत्येक जाति के आचरण अलग-अलग होते हैं।
जानन्ति पशवो गन्धात्।	पशु गन्ध से पहचान जाते हैं।
जामाता दशमो ग्रहः।	दामाद दसवाँ ग्रह है।
जारस्त्रीणां पतिः शत्रुः।	कुलटा को पति शत्रु प्रतीत होता है।
जितक्रोधेन सर्वं हि जगदेतद् विजीयते। (कथा०)	क्रोध का विजेता जगद्विजयी होता है।

जीवन् हि धीरोऽभिमतं किं नाम न यदाप्नुयात् । (कथा०)	धैर्यशाली व्यक्ति जीवित रहे तो प्रत्येक अभीष्ट प्राप्त कर लेता है ।
जीवो जीवस्य जीवनम् ।	प्राणी प्राणी का जीवन है ।
ज्ञानस्याभरणं क्षमा ।	क्षमा ज्ञान का भूषण है ।
ज्येष्ठभ्राता पितुः समः ।	बड़ा भाई पिता के तुल्य है ।
झटिति पराशयवेदिनो हि विज्ञाः । (नैषध०)	विद्वान् लोग दूसरे के भाव को तुरन्त जान जाते हैं ।
तक्रान्तं खलु भोजनम् ।	भोजन के अन्त में मट्ठे का सेवन करे ।
तपोऽधीनानि श्रेयांसि, ह्युपायोऽन्यो न विद्यते । (कथा०)	सुख-सुविधाएँ तपस्या से ही प्राप्त होती हैं, किसी अन्य उपाय से नहीं ।
तपोऽधीना हि संपदः । (कथा०)	संपत्तियाँ तप के अधीन हैं ।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति । (अभिज्ञान०)	सूर्य के चमकने पर अन्धकार कैसे प्रकट होगा ।
तस्करस्य कुतो धर्मः !	चोर का धर्म कहाँ !
तस्य तदेव मधुरं यस्य मनो यत्र संलग्नम् ।	जिसका मन जिसमें लगा हो, उसे वही प्रिय होता है ।
तिष्ठत्येकां निशां चन्द्रः श्रीमान् संपूर्णमंडलः ।	१. शोभान्वित पूर्ण चाँद तो एक ही रात रहता है । २. चार दिन की चाँदनी और फिर अँधेरी रात है ।
तुष्यन्ति भोजनैर्विप्राः ।	ब्राह्मण सुंदर भोजन से प्रसन्न होते हैं ।
तेजसां हि न वयः समीक्ष्यते । (रघु०)	तेजस्वियों की उमर नहीं देखी जाती ।
त्यजन्त्युत्तमसत्त्वा हि प्राणानपि न सत्पथम् । (कथा०)	उत्तम प्रकृति के लोग प्राण त्याग देते हैं, सन्मार्ग नहीं ।
त्यजेदेकं कुलस्यार्थे ।	कुटुम्ब की रक्षार्थ एक सम्बन्धी का त्याग कर देना चाहिए ।
त्यागाज्जगति पूज्यन्ते पशुपाषाणपादपाः ।	पशु, पत्थर और पेड़ त्याग के कारण ही संसार में पूजे जाते हैं ।
त्रिभुवनविषये कस्य दोषो न चास्ति !	त्रिलोकी में कौन निर्दोष है !
त्रैलोक्ये दीपको धर्मः ।	धर्म त्रिलोकी का दीपक है ।
दया मांसाशिनः कुतः !	मांसभक्षक में दया कहाँ !
दयितं जनः खलु गुणीति मन्यते । (शिशु०)	लोग प्रिय मनुष्य को गुणी समझते हैं ।
दरिद्रता धीरतया विराजते ।	निर्धनता धैर्य से शोभा पाती है ।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ।	जहाँ मेंढक वक्ता हों वहाँ मौन ही अच्छा ।
दशाननोऽहरत्सीतां बन्धनं च महोदधेः ।	सीता तो चुराई रावण ने और बाँधा गया समुद्र ।
दारिद्र्यदोषेण करोति पापम् ।	मनुष्य दरिद्रता के कारण पाप करता है ।
दारिद्र्यदोषो गुणराशिनाशी ।	दरिद्रता अनेक गुणों की नाशिका है ।
दारिद्र्यं परमाञ्जनम् । (भागवते)	दरिद्रता सबसे उत्तम सुर्मा है ।
दुग्धधौतोऽपि किं याति वायसः कलहंसताम् !	दूध से धोने पर क्या कौआ हंस बन जाता है !
दुरधीता विषं विद्या ।	बुरी तरह से पढ़ी हुई विद्या विष है ।
दुर्जनस्य कुतः क्षमा ।	दुष्ट में क्षमा कहाँ ?
दुर्जनस्यार्जितं वित्तं भुज्यते राजतस्करैः ।	दुर्जन की कमाई राजा और चोर ने खाई ।

दुर्जया हि विषया विदुषापि। (नैषध०)	विद्वान् भी विषयों को कठिनता से जातता है।
दुर्बलस्य बलं राजा।	राजा दुर्बल का बल है।
दुर्मन्त्री राज्यनाशाय।	कुमन्त्री से राज्य का नाश होता है।
दुर्लभं क्षेमकृत् सुतः।	कल्याणकारी पुत्र दुर्लभ है।
दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम्।	भारत में जन्म दुर्लभ है और फिर मनुष्य-जन्म तो और भी दुर्लभ है।
दुर्लभः स गुरुर्लोके शिष्यचिन्तापहारकः।	शिष्यों की चिन्ता का नाशक गुरु जगत् में दुर्लभ है।
दुष्टेऽपि पत्यौ साध्वीनां नान्यथावृत्ति मानसम्। (कथा०)	पति के दुष्ट होने पर भी सती स्त्रियों का मन अन्यत्र नहीं जाता।
दूरतः पर्वता रम्याः	दूर के ढोल सुहावने।
दैवो दुर्बलघातकः।	ग़रीब को खुदा की मार।
देहस्नेहो हि दुस्त्यजः।	शरीर का प्रेम छोड़ना कठिन है।
दैवमेव हि साहाय्यं कुरुते सत्त्वशालिनाम्। (कथा०)	दैव भी पराक्रमी लोगों की ही सहायता करता है।
दैवी विचित्रा गतिः।	दैव की गति अद्‌भुत है !
दोषग्राही गुणत्यागी पल्लोलीव हि दुर्जनः।	दुष्ट मनुष्य छलनी के समान दोषों का ग्रहण करते हैं और गुणों का त्याग।
दोषोऽपि गुणतां याति प्रभोर्भवति चेत्कृपा।	प्रभु कृपा हो तो दोष भी गुण हो जाता है।
द्रव्येण सर्वे वशाः।	धन से सब अधीन हो जाते हैं।
धनं सर्वप्रयोजनम्।	धन सर्वप्रमुख प्रयोजन है।
धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।	बुद्धिमान् मानव परोपकार के लिए धन और जीवन त्याग दे।
धर्मक्षयकरः क्रोधः।	क्रोध धर्म का नाशक है।
धर्मस्य तत्त्वं निहितं गुहायाम्।	धर्म का तत्त्व गुफा में छिपा है।
धर्मः कीर्तिर्द्वयं स्थिरम्।	धर्म और कीर्ति ही दो स्थिर पदार्थ हैं।
धर्मः स नो यत्र न सत्यमस्ति।	जिसमें सत्य नहीं, वह धर्म नहीं।
धर्मेण हीनाः पशुभिः समानाः।	धर्महीन जन पशुतुल्य हैं।
धिक् कलत्रमपुत्रकम्।	अपुत्रा नारी धिक्कार्य है।
धिक् प्रजमविनीतं च।	अनम्र पुत्र धिक्कार्य है।
धिगाशा सर्वदोषभूः।	सब दोषों की जननी आशा धिक्कार्य है।
धिग्गृहं गृहिणीशून्यम्।	गृहिणीरहित घर धिक्कार्य है।
धिग्जीवितं चोद्यमवर्जितस्य।	उद्यमहीन का जीवन धिक्कार्य है।
धिग्जीवितं व्यर्थमनोरथस्य।	विफल-मनोरथ मनुष्य का जीवन धिक्कार्य है।
धिग्जीवितं शास्त्रकलोज्झितस्य।	शास्त्र तथा कला से रहित मानव का जीवन धिक्कार्य है।
धूर्ताः क्रीडन्त्येव बालिशैः। (कथा०)	धूर्त लोग मूर्खों को ही उल्लू बनाते हैं।
ध्रुवं फलाय महते महतां सह संगमः। (कथा०)	बड़ों की संगति का फल भी बड़ा होता है।
न काचस्य कृते जातु युक्ता मुक्तामणेः क्षतिः (कथा०)	काँच की प्राप्ति के लिए मोती की हानि उचित नहीं।
न कामसदृशो रिपुः।	काम के समान शत्रु नहीं।

न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ।	घर में आग लगने पर कूआँ खोदना उचित नहीं।
न खलु स उपरतो यस्य वल्लभो जनः स्मरति ।	जिसका स्मरण प्रियजन करते हैं, उसे मरा न समझिए ।
न च धर्मो दयापरः ।	दया से बड़ा कोई धर्म नहीं ।
न चलति खलु वाक्यं सज्जनानां कदाचित् ।	सज्जनों की बात कभी झूठी नहीं होती ।
न च विद्यासमो बन्धुः ।	विद्या के समान बन्धु नहीं ।
न च व्याधिसमो रिपुः ।	रोग के तुल्य शत्रु नहीं ।
न चापत्यसमः स्नेहः ।	सन्तति के प्रति प्रेम अप्रतिम है ।
न जाने संसारः किममृतमयः किं विषमयः ।	नजाने यह जगत् अमृतमय है या विषमय ।
न ज्ञानात् परमं चक्षुः ।	ज्ञान से बड़ी आँख नहीं ।
न तोषात् परमं सुखम् ।	संतोष से बड़ा सुख नहीं ।
न तोषो महतां मृषा । (कथा०)	बड़े लोगों की प्रसन्नता व्यर्थ नहीं होती ।
न दरिद्रस्तथा दुःखी लब्धक्षीणधनो यथा ।	निर्धन उतना दुखी नहीं होता जितना धन को पाकर खोनेवाला ।
न धर्मवृद्धेषु वयः समीक्ष्यते । (कुमार०)	धर्म-वृद्धों की उमर नहीं देखी जाती ।
न धर्मसदृशं मित्रम् ।	धर्म के समान मित्र नहीं ।
न नश्यति तमो नाम कृतया दीपवार्तया ।	दीपक की बात करने से अँधेरा नष्ट नहीं होता ।
ननु प्रवातेऽपि निष्कम्पा गिरयः । (अभि०)	आँधी से पर्वत कभी नहीं हिलते ।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः । किरात०)	गुणग्राही लोग बात का गुण ग्रहण करते हैं, वक्ताविशेष का ध्यान नहीं करते ।
न पुत्रात् परमो लाभः ।	पुत्र-प्राप्ति से बड़ा कोई लाभ नहीं ।
न प्राणान्ते प्रकृतिविकृतिर्जायते चोत्तमानाम् ।	प्राणान्तकारी समय आ जाने पर भी उत्तम मनुष्यों के स्वभाव में विकार नहीं आता ।
न भयं चास्ति जाग्रतः ।	जागनेवाले को कोई डर नहीं ।
न भवति पुनरुक्तं भाषितं सज्जनानाम् ।	सज्जन एक ही बात को बार-बार नहीं कहते ।
न भार्यायाः परं सुखम् ।	पत्नी से बड़ा कोई सुख नहीं ।
न भूतो न भविष्यति ।	न हुआ है न होगा ।
न मुक्तेः परमा गतिः ।	मोक्ष से ऊँची कोई स्थिति नहीं ।
नये च शौर्ये च वसन्ति संपदः ।	संपदाएँ नीति और शूरवीरता में रहती हैं ।
न रत्नमन्विष्यति मृग्यते ही तत् । (कुमार०)	रत्न किसी को नहीं खोजता, उसी की खोज की जाती है ।
नवा वाणी मुखे मुखे ।	प्रत्येक मुख में वाणी पृथक्-पृथक् होती है ।
न शरीरं पुनः पुनः ।	शरीर बार-बार नहीं मिलता ।
न शान्तेः परमं सुखम् ।	शान्ति से बड़ा कोई सुख नहीं ।
न शास्त्रं वेदतः परम् ।	वेद से बड़ा कोई शास्त्र नहीं ।
न स शक्नोति किं यस्य प्रज्ञा नापदि हीयते । (कथा०)	जिसकी बुद्धि विपत्ति में भी स्थिर रहती है, वह क्या नहीं कर सकता ।
न सा सभा यत्र न सन्ति वृद्धाः ।	वह सभा ही नहीं जिसमें वृद्ध न हों ।
न सुवर्णे ध्वनिस्तादृग्यादृक् कांस्ये प्रजायते ।	जैसी ध्वनि काँसे से उत्पन्न होती है वैसी सोने से नहीं ।

न स्पृशति पल्वलाम्भः पञ्जरशेषोऽपि कुञ्जरः क्वापि । — हाथी की हड्डियाँ निकल आवें तो भी वह जोहड़ का जल नहीं छूता ।

न स्वेच्छं व्यवहर्तव्यमात्मनो भूतिमिच्छता । (कथा०) — वृद्धि के इच्छुक मनुष्य को स्वेच्छापूर्वक व्यवहार नहीं करना चाहिये ।

न हि कृतमुपकारं साधवो विस्मरन्ति । — श्रेष्ठ लोग किये हुये उपकार को नहीं भूलते ।

न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया । — समुद्र का जल तिनकों की मशाल से गर्म नहीं किया जा सकता ।

न हि दुष्करमस्तीह किंचिदध्यवसायिनाम् । (कथा०) — अध्यवसायी व्यक्ति के लिये जगत् में कोई भी कार्य दुष्कर नहीं ।

न हि नार्यो विनेर्ष्यया । — स्त्रियाँ ईर्ष्या-रहित नहीं होतीं ।

न हि प्रफुल्लं सहकारमेत्य वृक्षान्तरं काङ्क्षति षट्पदाली । रघु०) — भँवरे पुष्पित आम्र-वृक्ष पर पहुँचकर अन्य वृक्ष की इच्छा नहीं करते ।

न हि वन्ध्याऽश्नुते दुःखं यथा हि मृतपुत्रिणी । — बाँझ को वह दुःख नहीं होता जो मृतपुत्रा नारी को ।

न हि सत्त्वावसादेन स्वल्पाप्यापद् विलंध्यते । (कथा०) — उत्साह के त्याग से तो साधारण आपत्ति पर भी विजय नहीं मिलती ।

न हि सर्वविदः सर्वे । — सब लोग सब कुछ नहीं जानते ।

न हि सिंहो गजास्कन्दी भयाद् गिरिगुहाशयः । (रघु०) — हाथियों पर आक्रमण करनेवाला सिंह डर के कारण पर्वत-गुफा में नहीं रहता ।

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः । — सोये हुए सिंह के मुख में मृग स्वयं नहीं आ घुसते ।

नातिपीडयितुं भग्नानिच्छन्ति हि महौजसः । (किरात०) — ओजस्वी जन पराजितों को अत्यधिक पीड़ा नहीं देना चाहते ।

नाधर्मश्चिरमृद्धये । (कथा०) — अधर्म चिरकाल तक धन नहीं देता ।

नानृतात्पातकं परम् । — झूठ से बड़ा कोई पाप नहीं ।

नारीणां भूषणं पतिः । — पति स्त्रियों का भूषण है ।

नार्कातपैर्जलजमेति हिमैस्तु दाहम् । (नैषध०) — कमल धूप से नहीं, पाले से झुलसता है ।

नाल्पीयान् बहु सुकृतं हिनस्ति दोषः । (किरात०) — थोड़े से दोष से बहुत से पुण्यों का नाश नहीं होता ।

नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् । — दूसरे स्थान को देखे बिना पहले को न छोड़े ।

नास्ति कामसमो व्याधिः । — काम के समान कोई रोग नहीं ।

नास्ति क्रोधसमो वह्निः । — क्रोध के समान कोई आग नहीं ।

नास्ति चक्षुःसमं तेजः । — नेत्र के समान कोई तेज नहीं ।

नास्ति आत्मसमं बलम् । — आत्मा के तुल्य कोई बल नहीं ।

नास्ति प्राणसमं भयम् । — प्राणभय के तुल्य कोई भय नहीं ।

नास्ति बन्धुसमं बलम् । — बन्धु के तुल्य कोई बल नहीं ।

नास्ति मेघसमं तोयम् । — मेघ के समान कोई जल नहीं ।

नास्ति मोहसमो रिपुः । — मोह के समान कोई शत्रु नहीं ।

नास्त्यदेयं महात्मनाम् । — ऐसी कोई वस्तु नहीं जिसे महात्मा लोग न दे सकें ।

नास्त्यहो स्वामिभक्तानां पुत्रे वात्मनि वा स्पृहा। (कथा०)	अहो ! स्वामिभक्तों को न पुत्र का मोह होता है न प्राणों का।
निःसारस्य पदार्थस्य प्रायेणाडम्बरो महान्।	प्रायः निकम्मी वस्तु का आडम्बर बहुत होता है।
निजेऽप्यपत्ये करुणा कठिनप्रकृतेः कुतः! (प्रसन्नराघवे)	कठोर स्वभाववाले व्यक्ति को अपनी सन्तति पर भी दया नहीं आती।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते।	वृक्षहीन देश में एरण्ड भी वृक्ष माना जाता है।
निर्द्रव्यं पुरुषं त्यजन्ति गणिकाः।	वेश्यायें निर्धन पुरुष को छोड़ देती हैं।
निर्धनता सर्वापदामास्पदम्।	दरिद्रता सब दुःखों का कारण है।
निर्धनस्य कुतः सुखम्!	निर्धन को सुख कहाँ ?
निर्वाणदीपे किमु तैलदानम्।	दीपक बुझ जाने पर तेल डालने से क्या ?.
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः। (किरात०)	समृद्धियाँ पराक्रम के आश्रय पर रहती हैं, विषाद के साथ नहीं।
निवसन्नन्तर्दारुणि लंघ्यो वह्निर्न तु ज्वलितः।	लकड़ी के अन्दर विद्यमान अग्नि पर से कूदा जा सकता है, जलती पर से नहीं।
निवृत्तरागस्य गृहं तपोवनम्।	राग-रहित के लिए घर ही तपोवन है।
निष्प्रज्ञास्त्ववसीदन्ति लोकोपहसिताः सदा। (कथा०)	बुद्धिहीन व्यक्ति दुःख उठाते हैं तथा लोगों के उपहासास्पद बनते हैं।
निसर्गसिद्धो हि नारीणां सपत्नीषु हि मत्सरः। (कथा०)	स्त्रियों की सौतों के प्रति ईर्ष्या स्वाभाविक है।
निःस्पृहस्य तृणं जगत्।	कामनारहित के लिये जगत् तृणतुल्य है।
नीचाश्रयो हि महतामपमानहेतुः।	नीच का आश्रय लेना बड़े लोगों के लिये अपमानजनक होता है।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण। (मेघ०)	पहिये के हाल के समान मनुष्य की अवस्था ऊँची-नीची होती रहती है।
नीचैरनीचैरतिनीचनीचैः सर्वैरुपायैः फलमेव साध्यम्।	नीचे, ऊँचे और अत्यन्त नीचे, सभी उपायों से अभीष्ट-सिद्धि करनी चाहिये।
नीचो वदति, न कुरुते, वदति न साधुः करोत्येव।	नीच मनुष्य कहता है, करता नहीं; सज्जन कहता नहीं, कर देता है।
नैकत्र सर्वो गुणसंनिपातः।	सभी गुण एकत्र नहीं रहते।
न्याय्यां वृत्तिं समाचरेत्।	जीविकोपार्जन न्याय के अनुसार करना चाहिये।
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।	धीर लोग न्याय के मार्ग से तनिक भी विचलित नहीं होते।
पङ्को हि नभसि क्षिप्तः क्षेप्तुः पतति मूर्धनि। (कथा०)	आकाश में फेंका हुआ कीचड़ फेंकनेवाले के सिर पर ही पड़ता है।
पञ्चभिर्मिलितैः किं यज्जगतीह न साध्यते। (नैषध०)	संसार में ऐसा कौन-सा काम है जिसे पाँच मनुष्य मिलकर नहीं कर सकते ?
पठतो नास्ति मूर्खत्वम्।	अध्ययनशील मनुष्य मूर्ख नहीं रहता।
पदं हि सर्वत्र गुणैर्निधीयते।	गुण सर्वत्र अपना स्थान बना लेते हैं।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं, न पुनः पतत्रिणः। (कुमार०)	शिरीष का फूल भ्रमर के कोमल चरण को तो सह लेता है, पक्षी के चरण को नहीं।

पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ।	कमल-पत्र पर पड़ा हुआ जल मोती की शोभा धारण कर लेता है ।
पयःपानं भुजंगानां केवलं विषवर्धनम् ।	साँपों को दूध पिलाने से उनका विष ही बढ़ता है ।
पयोगते किं खलु सेतुबंधः !	बाढ़ के उतर जाने पर बाँध बाँधने से क्या लाभ ।
परदुःखेनापि दुःखिता विरलाः ।	दूसरों के दुःख से दुखित होनेवाले लोग थोड़े ही हैं ।
परबुद्धिर्विनाशाय ।	दूसरों के मतानुसार आचरण विनाशकारी होता है ।
परभुक्ते हि कमले किमलेर्जायते रतिः ! (कथा०)	क्या भँवरा दूसरे से भुक्त कमल से प्रेम करता है ?
परमं लाभमरातिभङ्गमाहुः । (किरात०)	शत्रु का नाश सब से बड़ा लाभ कहा जाता है ।
परलोकगतस्य को बन्धुः !	दिवंगत व्यक्ति का बन्धु कौन है !
परवृद्धिमत्सरि मनो हि मानिनाम् । (शिशु०)	मानी मनुष्यों का मन दूसरों की उन्नति से ईर्ष्या करता है ।
परसदननिविष्टः को लघुत्वं न याति !	दूसरे के घर जाने से किसका गौरव क्षीण नहीं होता !
परहितनिरतानामादरो नात्मकार्ये ।	परोपकारपरायण लोग अपने कार्यों की परवाह नहीं करते ।
परेङ्गितज्ञानफला हि बुद्धयः ।	बुद्धियाँ वही हैं जो दूसरों के सङ्केत समझ जाती हैं ।
परोपकारजं पुण्यं न स्यात्क्रतुशतैरपि ।	परोपकार-जन्य पुण्य सैकड़ों यज्ञों के पुण्य से श्रेष्ठ है ।
परोपकाराय सतां विभूतयः ।	सज्जनों की सम्पत्तियाँ परोपकार के लिए होती हैं ।
परोपकारार्थमिदं शरीरम् ।	यह शरीर परोपकार के लिए है ।
परोपदेशवेलायां शिष्टाः सर्वे भवन्ति वै ।	दूसरों को उपदेश देते समय तो सब सभ्य बन जाते हैं ।
परोऽपि हितवान् बन्धुः ।	हितकारक बेगाना भी बन्धु ही है ।
पर्वतानां भयं वज्रात् ।	पर्वतों को वज्र से भय होता है ।
पाणौ पयसा दग्धे तक्रं फूत्कृत्य पामरः पिबति ।	दूध का जला छाछ को फूँक-फूँक कर पीता है ।
पात्रत्वाद्धनमाप्नोति ।	मनुष्य योग्य होने पर धन प्राप्त करता है ।
पापप्रभावान्नरकं प्रयाति ।	पाप के प्रभाव से नरक को जाता है ।
पितृदोषेण मूर्खता ।	मूर्खता पिता के दोष से होती है ।
पिपासितैः काव्यरसो न पीयते ।	प्यासे काव्यरस नहीं पिया करते ।
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ।	मोहमयी प्रमाद-मदिरा पीकर जगत् उन्मत्त हो गया है ।
पुण्यवन्तो हि सन्तानं पश्यन्त्युच्चैः कृतान्वयम् । (कथा०)	वंश को ऊँचा करनेवाली सन्तान पुण्यवानों के घर ही होती है ।
पुत्रः शत्रुरपण्डितः ।	मूर्ख पुत्र शत्रु है ।
पुत्रप्रयोजना दाराः ।	पत्नी पुत्र को जन्म देने के लिए ही होती है ।
पुत्रहीनं गृहं शून्यम् ।	पुत्रहीन घर सूना है ।

पुत्रादपि भयं यत्र तत्र सौख्यं हि कीदृशम् !
जहाँ पुत्र से भी भय हो वहाँ सुख कैसा !

पुनर्दरिद्री पुनरेव पापी।
फिर दरिद्री, फिर पापी।

पुनर्धनाढ्यः पुनरेव भोगी।
फिर धनी, फिर भोगी।

पुरुषा अपि बाणा अपि गुणच्युता कस्य न भयाय।
पुरुष भी और बाण भी गुण (गुण, धनुष की डोरी) से रहित हो जाने पर किसके लिए भयंकर नहीं होते !

पूज्यं वाक्यं समृद्धस्य।
धनाढ्य का वाक्य पूज्य होता है।

पूर्वपुण्यतया विद्या।
विद्या पिछले पुण्यों से मिलती है।

प्रच्छन्नमप्यूहयते हि चेष्टा। (किरात०)
चेष्टा गुप्त बात को भी व्यक्त कर देती है।

प्रजानामपि दीनानां राजैव सद्यः पिता।
राजा दीन प्रजाओं का दयालु पिता है।

प्रज्ञाबलं च सर्वेषु मुख्यं कार्येषु साधनम्। (कथा०)
सब कार्यों में बुद्धिबल सबसे बड़ा साधन है।

प्रणामान्तः सतां कोपः।
सज्जनों का क्रोध प्रणाम से समाप्त हो जाता है।

प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः। (रघुवंश०)
पूज्यों की पूजा में उलटफेर कल्याणों का बाधक होता है।

प्राणव्ययाय शूराणां जायते हि रणोत्सवः। (कथा०)
युद्ध का मेला शूरवीरों के प्राणधन के व्ययार्थ होता है।

प्राणिनां हि निकृष्टापि जन्मभूमिः परा प्रिया। (कथा०)
प्राणियों को अपनी निकृष्ट जन्मभूमि भी अत्यन्त प्यारी लगती है।

प्राणेभ्योऽप्यर्थमात्रा हि कृपणस्य गरीयसी। (कथा०)
कंजूस को थोड़ा-सा भी धन प्राणों से अधिक प्यारा लगता है।

प्राणैरपि हि भृत्यानां स्वामिसंरक्षणं व्रतम्। (कथा०)
प्राण देकर भी स्वामी की रक्षा करना सेवकों का व्रत है।

प्राप्नोतीष्टमविक्लवः। (कथा०)
धीर अभीष्ट को पा लेता है।

प्राप्यते किं यशः शुभ्रमनङ्गीकृत्य साहसम् ! (कथा०)
कहीं जान जोखिम में डाले बिना शुभ्र यश प्राप्त हो सकता है !

प्रायः श्वश्रूस्नुषयोर्न दृश्यते सौहृदं लोके।
प्रायः संसार में सास-बहू में सौहार्द नहीं देखा जाता।

प्रायः समानविद्याः परस्परयशः पुरोभागाः।
प्रायः समान विद्यावाले लोग एक दूसरे के यश को सह नहीं सकते।

प्रायः समासन्नविपत्तिकाले धियोऽपि पुंसां मलिनीभवन्ति।
जब आपत्ति आने को होती है तब मनुष्यों की बुद्धि प्रायः मलिन हो जाती है।

प्रायः स्त्रियो भवन्तीह निसर्गविषमाः शठाः। (कथा०)
प्रायः स्त्रियाँ स्वभाव से ही कठोर और शठ हुआ करती हैं।

प्रायः स्वं महिमानं क्रोधात्प्रतिपद्यते हि जनः।
प्रायः क्रोध आने पर ही मनुष्य अपने महत्त्व को प्राप्त करता है।

प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः। (कुमारसंभवे)
प्रायः कुटुम्बी पुरुष कन्याओं के मामलों में गृहिणी के ही मतानुसार चलते हैं।

प्रायेण भार्यादौःशील्यं स्नेहान्धो नेक्षते जनः। (कथा०)
प्रायः प्रेमान्ध पुरुष पत्नी की दुःशीलता की उपेक्षा कर जाता है।

प्रायेण भूमिपतयः प्रमदा लताश्च यः पार्श्वतो भवति तं परिवेष्टयन्ति।	प्रायः राजा, स्त्रियाँ और लताएँ जो भी पास हो उसीसे लिपट जाती हैं।
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः।	प्रायः सदाचारियों की विपत्तियाँ अस्थायी होती हैं।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः। (कुमार०)	प्रायः विधाता सभी गुणों को एकत्र नहीं रखता।
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते।	प्रायः अधम, मध्यम और उत्तम गुण संसर्ग से ही आता है।
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः।	प्रायः भाग्यहीन मनुष्य जहाँ आता है, आपत्तियाँ भी वहीं जा पहुँचती हैं।
प्रारभ्य चोत्तमजना न परित्यजन्ति।	श्रेष्ठ लोग कार्य आरंभ करके बीच में नहीं छोड़ते।
प्रासादशिखरस्थोऽपि काकः किं गरुड़ायते!	क्या महल की चोटी पर बैठा हुआ कौआ गरुड़ बन जाता है!
प्रियबन्धुविनाशोत्थः शोकाग्निः कं न तापयेत्। (कथा०)	प्रिय बन्धु की मृत्यु का शोक किसे संतप्त नहीं करता?
प्रियमांसमृगाधिपोज्झितः किमवद्यः करिकुम्भजो मणिः? (शिशु०)	मांसभक्षक सिंह से त्यक्त, हाथी के मस्तक से निकला हुआ रत्न क्या निन्द्य होता है?
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति।	कान्ता की मृत्यु पर सारा संसार कान्तार ही बन जाता है।
फलं भाग्यानुसारतः।	फल भाग्य के अनुसार होता है।
बताश्रितानुरोधेन किं न कुर्वन्ति साधवः! (कथा०)	आश्रितों के आग्रह पर सज्जन क्या नहीं करते।
बधिरस्य गानम्।	बहिरे के सामने गाना।
बधिरान्मन्दकर्णः श्रेयान्।	बहिरे की अपेक्षा ऊँचा सुननेवाला अच्छा।
बन्धुः को नाम दुष्टानाम्!	दुष्टों का बन्धु कौन?
बन्धुरप्यहितः परः।	अहितकर बन्धु भी शत्रु है।
बलं मूर्खस्य मौनित्वम्।	मौन मूर्ख का बल है।
बली बलं वेत्ति न वेत्ति निर्बलः।	बलवान् ही बल को जानता है, निर्बल नहीं।
बलीयसी केवलमीश्वरेच्छा।	ईश्वर की इच्छा ही बलवती है।
बहुरत्ना वसुन्धरा।	पृथ्वी में बहुत रत्न हैं।
बहुवचनमल्पसारं यः कथयति विप्रलापी सः।	जो अल्प सार को बहुत शब्दों से कहता है, वही विप्रलापी है।
बहुविघ्नास्तु सदा कल्याणसिद्धयः। (कथा०)	कल्याणों की सिद्धि में सदा अनेक विघ्न पड़ते हैं।
बह्वाश्चर्या हि मेदिनी।	पृथ्वी आश्चर्यों से पूर्ण है।
बालानां रोदनं बलम्।	रोना ही बच्चों का बल है।
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि।	बड़ों की बुद्धि भी कुमार्गगामिनी हो जाती है।
बुद्धिः कर्मानुसारिणी।	बुद्धि कर्मों के अनुसार होती है।
बुद्धिर्नाम च सर्वत्र मुख्यं मित्रं न पौरुषम्। (कथा०)	सब स्थानों पर बुद्धि ही मुख्य मित्र है, पुरुषार्थ नहीं।
बुद्धेः फलमनाग्रहः।	हठ का न होना ही बुद्धि का फल है।

बुभुक्षितः किं न करोति पापम् ।	भूखा मनुष्य कौन-सा पाप नहीं करता !
बुभुक्षितं न प्रतिभाति किंचित् ।	भूखे को कुछ नहीं सूझता ।
बुभुक्षितैर्व्याकरणं न भुज्यते ।	भूखे लोग व्याकरण नहीं खाया करते ।
ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् । (नैषध०)	श्रेष्ठलोग अपनी उपयोगिता वाणी से नहीं, फल से कहते हैं ।
भक्त्या हि तुष्यन्ति महानुभावाः ।	महानुभाव लोग भक्ति (श्रद्धा) से ही प्रसन्न होते हैं ।
भद्रकृत्प्राप्नुयाद्भद्रमभद्रं चाप्यभद्रकृत् । (कथा०)	भले का भला और बुरे का बुरा होता है ।
भये सीमा मृत्युः ।	सब से बड़ा भय मृत्यु है ।
भर्तृमार्गानुसरणं स्त्रीणां च परमं व्रतम् ।	पति-निर्दिष्ट मार्ग पर चलना स्त्रियों का परम व्रत है ।
भवन्ति क्लेशबहुलाः सर्वस्यापीह सिद्धयः । (कथा०)	संसार में सबके कार्य अनेक कष्ट उठाने पर ही सिद्ध होते हैं ।
भवन्त्युदयकाले हि सत्कल्याणपरम्पराः । (कथा०)	जब अच्छे दिन आते हैं तब सभी काम शुभ होते जाते हैं ।
भवितव्यता बलवती । (अभिज्ञान०)	होनहार बलवती है ।
भवितव्यं भवत्येव कर्मणामीदृशी गतिः ।	कर्मों की गति ऐसी है कि होनी होकर ही रहती है ।
भवेन्न यस्य यत्कर्म स तत्कुर्वन् विनश्यति । (कथा०)	१. जिसका काम उसी को साजे, और करे तो डफली बाजे ।
	२. जो काम जिसका न हो, उसे करने पर मनुष्य नष्ट हो जाता है ।
भस्मीभूतस्य भूतस्य पुनरागमनं कुतः ! (नैषध०)	भस्मीभूत प्राणी लौटकर कैसे आ सकता है !
भाग्येनैव हि लभ्यते पुनरसौ सर्वोत्तमः सेवकः ।	सर्वोत्तम सेवक भाग्य से ही प्राप्त होता है ।
भार्यासमं नास्ति शरीरतोषणम् ।	पत्नी के समान शारीरिक सुख देनेवाला कोई नहीं ।
भिक्षुको भिक्षुकं दृष्ट्वा श्वानवद् गुर्गुरायते ।	भिखारी भिखारी को देखकर कुत्ते के समान गुर्राता है ।
भिन्नरुचिर्हि लोकः ।	लोगों की रुचि भिन्न-भिन्न है ।
भीता इव हि धीराणां दूरे यान्ति विपत्तयः । (कथा०)	विपत्तियाँ मानो धीरों से डरकर ही दूर भाग जाती हैं ।
भूयोऽपि सिक्तः पयसा घृतेन न निम्बवृक्षो मधुरत्वमेति ।	दूध और घी से निरन्तर सींचा जाने पर भी नीम का वृक्ष मधुर नहीं होता ।
भोगो भूषयते धनम् ।	भोग धन को अलंकृत करता है ।
भ्रष्टस्य का वा गतिः !	पतित की क्या गति होती होगी !
मतिरेव बलाद् गरीयसी ।	बल से बुद्धि ही बड़ी है ।
मदमूढबुद्धिषु विवेकिता कुतः । (शिशु०)	मद से मूढ़ बुद्धिवालों में विवेक कहाँ ?

मद्यपस्य कुतः सत्यम् ! (कथा०)	शराबी में सत्य कहाँ ?
मधुरविधुरमिश्राः सृष्टयो हा विधातुः। (प्रसन्नराघवे)	विधाता की रचनाएँ सुखपूर्ण, दुःखपूर्ण तथा मिली-जुली हैं।
मनःपूतं समाचरेत्।	आचरण ऐसा करे जिसकी पवित्रता का मन साक्षी हो।
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।	मन ही मनुष्यों के बंधन और मुक्ति का कारण है।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।	महात्माओं के मन, वचन और कर्म में एकरूपता होती है।
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्।	मनस्वी कार्यकर्ता दुःख-सुख की चिन्ता नहीं किया करता।
मनोरथानामगतिर्न विद्यते। (कुमार०)	मनोरथ सर्वत्र पहुँच जाते हैं।
मरणं प्रकृतिः शरीरिणाम्।	मृत्यु प्राणियों का स्वभाव है।
मर्दनं गुणवर्धनम्।	मालिश गुणवर्द्धक है।
मर्मवाक्यमपि नोच्चरणीयम्।	दुःखदायक बात न कहनी चाहिए।
महाजनो येन गतः सः पन्थाः।	जिस मार्ग से कोई महापुरुष गया हो वही सुमार्ग है।
महान् महत्येव करोति विक्रमम्।	बड़ा मनुष्य बड़े पर ही पराक्रम दिखाता है।
महीपतीनां विनयो हि भूषणम्।	नम्रता राजाओं का भूषण है।
मातर्लक्ष्मि, तव प्रसादवशतो दोषा अपि स्युर्गुणाः।	हे लक्ष्मी माता, आपकी कृपा से दोष भी गुण हो जाते हैं।
माता दुश्चारिणी रिपुः।	दुश्चरित्र माता शत्रु है।
मातापितृभ्यां शप्तः सन्न जातु सुखमश्नुते। (कथा०)	माता-पिता से शापित जन कभी सुख नहीं पाता।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने।	बछड़े को बाँधने के लिए माता की टाँग ही स्तम्भ बन जाती है।
मात्रा समं नास्ति शरीरपोषणम्।	माता के समान शरीर का पोषक कोई नहीं।
माने म्लाने कुतः सुखम् !	सम्मान दूषित होने पर सुख कहाँ ?
मितं च सारं च वचो हि वाग्मिता।	महत्त्वपूर्ण बात थोड़े शब्दों में कहना ही वाग्मिता है।
मूढः परप्रत्ययनेयबुद्धिः।	मूढ़ दूसरे के विश्वास का अनुसरण करता है।
मूर्खस्य किं शास्त्रकथाप्रसंगैः।	मूर्ख का शास्त्रों की कथाओं से क्या सम्बन्ध !
मूर्खस्य हृदयं शून्यम्।	मूर्ख का हृदय विचाररहित होता है।
मूर्खाणां बोधको रिपुः।	मूर्ख लोग समझानेवाले को शत्रु समझते हैं।
मूर्खैर्हि संगः कस्यास्ति शर्मणे ! (कथा०)	मूर्ख-सङ्गति किसे सुख देती है !
मृत्योः सर्वत्र तुल्यता।	मौत के सामने सब समान हैं।
मेघो गिरिजलधिवर्षी च।	मेघ पर्वत और सागर दोनों स्थानों पर बरसता है।
मोहान्धमविवेकं हि श्रीश्चिराय न सेवते। (कथा०)	मोहग्रस्त और विवेकहीन के पास लक्ष्मी अधिक नहीं ठहरती।
मौनं विधेयं सततं सुधीभिः।	बुद्धिमानों को निरन्तर चुप रहना चाहिये।

मौनं सर्वार्थसाधकम् ।	मौन से सब काम सिद्ध होते हैं।
मौनिनः कलहो नास्ति ।	मौनी का किसी से कलह नहीं होता।
यतः सत्यं ततो धर्मः ।	जहाँ सत्य है वहाँ धर्म है।
यतो धर्मस्ततो धनम् ।	जहाँ धर्म है वहाँ धन है।
यतो रूपं ततः शीलम् ।	जहाँ रूप है वहाँ शील है।
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः?	यदि यत्न करने पर भी सिद्धि न हो तो इसमें यत्नकर्ता का क्या दोष !
यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।	जहाँ विद्वान् नहीं होता वहाँ अल्पबुद्धि भी श्लाघ्य होता है।
यत्राकृतिस्तत्र गुणा वसन्ति ।	जहाँ रूप तहाँ गुण भी है।
यत्रास्ति लक्ष्मीर्विनयो न तत्र ।	जहाँ लक्ष्मी होती है वहाँ नम्रता नहीं।
यथा चित्तं तथा वाचो यथा वाचस्तथा क्रिया ।	जैसा मन वैसी वाणी, जैसी वाणी वैसी क्रिया।
यथा देशस्तथा भाषा ।	जैसा देश वैसी भाषा।
यथा बीजं तथाङ्कुरः ।	जैसा बीज वैसा अङ्कुर।
यथा भूमिस्तथा तोयम् ।	जैसी भूमि वैसा जल।
यथा राजा तथा प्रजा ।	जैसा राजा वैसी प्रजा।
यथा वृक्षस्तथा फलम् ।	जैसा वृक्ष वैसा फल।
यथाशक्त्यतिथेः पूजा धर्मो हि गृहमेधिनाम् । (कथा०)	अतिथि की यथाशक्ति सेवा करना गृहस्थों का धर्म है।
यथौषधं स्वादु हितं च दुर्लभम् ।	जैसे स्वादिष्ट और गुणकारी दवा दुर्लभ है।
यदि वात्यन्तमृदुता न कस्य परिभूतये ! (कथा०)	अत्यधिक कोमलता से किसका निरादर नहीं होता।
यदेव रोचते यस्मै भवेत्तत्तस्य सुन्दरम् ।	जो जिसे अच्छा लगता है, वही उसके लिये सुन्दर होता है।
यद्धात्रा निजभालपट्टलिखितं तन्मार्जितुं कः क्षमः !	विधाता ने भाग्य में जो लिख दिया है, उसे कौन मिटा सकता है !
यद्यपि शुद्धं लोकविरुद्धं नो करणीयं नाचरणीयम् ।	लोकविरुद्ध शुद्ध बात भी न करनी चाहिये।
यद्वा तद्वा भविष्यति ।	कुछ न कुछ तो होगा ही।
यशः पुण्यैरवाप्यते ।	यश पुण्यों से ही मिलता है।
यशस्तु रक्ष्यं परतो यशोधनैः । (रघु०)	यशस्वियों को शत्रु से यश की रक्षा करनी चाहिये।
यः क्रियावान् स पण्डितः ।	जिसके कर्म अच्छे, वही पण्डित है।
याचनान्तं हि गौरवम् ।	याचना गौरव को समाप्त कर देती है।
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा। (मेघ०)	नीच से याचना के सफल होने की अपेक्षा गुणी से उसका विफल होना अच्छा।
यादृशो यः कृतो धात्रा भवेत्तादृश एव सः। (कथा०)	विधाता ने जिसे जैसा बना दिया वह वैसा ही होता है।
यादृशास्तन्तवः कामं तादृशो जायते पटः। (कथा०)	जैसे तागे होते हैं वैसा कपड़ा बनता है।

यानरत्नं हि तुरगः ।
वाहनों में घोड़ा रत्न है ।

यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् । (अनर्घराघवे)
न्यायानुसार चलनेवाले की सहायता पशु-पक्षी भी करते हैं ।

या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ।
जो जिसका सहज स्वभाव है, वह छोड़ा नहीं जा सकता ।

युक्तियुक्तं प्रगृह्णीयाद्बालादपि विचक्षणः ।
बुद्धिमान् को बच्चे की भी युक्तियुक्त बात मान लेनी चाहिये ।

युद्धस्य वार्ता रम्या स्यात् ।
युद्ध के समाचार रोचक होते हैं ।

ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ।
जो दूसरों के कार्यों को व्यर्थ ही नष्ट करते हैं, वे किस कोटि के होते हैं, हम नहीं जानते ।

येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत् ।
मनुष्य को किसी भी उपाय से प्रसिद्धि प्राप्त करनी चाहिये ।

यो यद् वपति बीजं हि लभते सोऽपि तत्फलम् । (कथा०)
जैसा बोएगा वैसा काटेगा ।

रक्षन्ति पुण्यानि पुराकृतानि ।
पूर्व पुण्य मनुष्य की रक्षा करते हैं ।

रत्नदीपस्य हि शिखा वात्ययापि न नश्यति ।
रत्नों के दीये की लौ आँधी से भी नहीं बुझती ।

रत्नव्ययेन पाषाणं को हि रक्षितुमर्हति ! (कथा०)
कौन इतना समर्थ है जो पत्थर के रक्षार्थ रत्न व्यय करे !

वनेऽपि दोषा प्रभवन्ति रागिणाम् ।
वन में भी दोष रागयुक्तों को दबा लेते हैं ।

वरं हि मानिनो मृत्युः, न दैन्यं स्वजनाग्रतः । (कथा०)
प्रतिष्ठित व्यक्ति की मृत्यु अच्छी किन्तु सम्बन्धियों के सामने दीनता बुरी ।

वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम् ।
पुरुषों का नपुंसक होना अच्छा, परस्त्री-गमन बुरा ।

वरं भिक्षाशित्वं न च परधनास्वादनसुखम् ।
भीख माँग कर खाना अच्छा, पराये धन के भोग का सुख बुरा ।

वरं मौनं कार्यं न च वचनमुक्तं यदनृतम् ।
झूठ बोलने की अपेक्षा चुप रहना अच्छा ।

वर्तमानेन कालेन वर्तयन्ति विचक्षणाः ।
बुद्धिमान् वर्तमान काल के अनुसार व्यवहार करते हैं ।

वस्त्रपूतं पिबेज्जलम् ।
वस्त्र से छानकर ही जल पीना चाहिए ।

वस्त्राणामातपो जरा ।
धूप वस्त्रों का बुढ़ापा है ।

वामे विधौ न हि फलन्त्यभिवाञ्छितानि ।
भाग्य विपरीत हो तो अभीष्ट सिद्ध नहीं होते ।

वासः प्रधानं खलु योग्यतायाः ।
योग्यता से भी परिधान प्रधान होता है ।

वासोविहीनं विजहाति लक्ष्मीः ।
वस्त्रविहीन को लक्ष्मी छोड़ जाती है ।

विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः । (कुमार०)
विकारक वस्तुओं की विद्यमानता में भी जिनके चित्त विकृत नहीं होते, वे ही धीर हैं ।

विक्रीते करिणि किमङ्कुशे विवादः !
हाथी के बेच देने पर अंकुश के बारे में विवाद कैसा ?

विचित्ररूपा खलु चित्तवृत्तयः । (किरात०)
चित्त की वृत्तियों के रूप विचित्र होते हैं ।

विदेशे बन्धुलाभो हि मरावमृतनिर्झरः । (कथा०)
विदेश में बन्धु से समागम मरुभूमि में अमृत-स्रोत के समान है

विद्यातुराणां न सुखं न निद्रा ।	विद्या के लिए व्याकुल व्यक्तियों को न सुख रुचता है न नींद ।
विद्या ददाति विनयम् ।	विद्या से नम्रता आती है ।
विद्या मित्रं प्रवासेषु ।	विदेश में विद्या मित्र है ।
विद्यारत्नं सरसकविता ।	सरस कविता करना ही उत्तम विद्या है ।
विद्या रूपं कुरूपिणाम् ।	कुरूप लोगों का रूप विद्या है ।
विद्यासमं नास्ति शरीरभूषणम् ।	विद्या के समान शरीर का कोई भूषण नहीं ।
विद्या सर्वस्य भूषणम् ।	विद्या सबका भूषण है ।
विद्वान् कुलीनो न करोति गर्वम् ।	कुलीन विद्वान् अभिमान नहीं करता ।
विद्वान् सर्वत्र पूज्यते ।	विद्वान् की सब जगह पूजा होती है ।
विनयाद् याति पात्रताम् ।	विनय से मनुष्य योग्य बनता है ।
विनयो हि सतीव्रतम् । (कथा०)	विनय ही सतियों का व्रत है ।
विना मलयमन्यत्र चन्दनं न प्ररोहति ।	चन्दन मलय पर्वत के सिवा कहीं नहीं उगता ।
विनाशकाले विपरीतबुद्धिः ।	विनाश के समय बुद्धि फिर जाती है ।
विना ह्यो गुर्वादेशेन संपूर्णाः सिद्धयः कुतः ! (कथा०)	गुरु के उपदेश के विना सम्पूर्ण सिद्धियाँ कहाँ !
विप्रियमप्याकर्ण्य ब्रूते प्रियमेव सर्वदा सुजनः ।	कटु बात भी सुनकर सज्जन सदा प्रिय बात ही कहते हैं ।
विभूषणं मौनमपण्डितानाम् ।	मौन मूर्खों का भूषण है ।
विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा । (किरात०)	१. दिल दिल का साक्षी है । २. निर्मल या मलिन होता हुआ मन हितैषी या शत्रु को बता देता है ।
विरक्तस्य तृणं भार्या ।	विरक्त को पत्नी तृणसम लगती है ।
विलासिनी हि सर्वस्य संध्येव क्षणरागिणी । (कथा०)	संध्या के समान सब के साथ वेश्या का राग (प्रेम, लाली) क्षणस्थायी होता है ।
विवक्षितं ह्यनुक्तमनुतापं जनयति (अभिज्ञा०)	अकथित अभिलषित बात पश्चात्ताप उत्पन्न करती है ।
विश्वासः कुटिलेषु कः ! (कथा०)	कपटियों पर क्या विश्वास !
विषं गोष्ठी दरिद्रस्य ।	निर्धन की बात-चीत विष है ।
विषयाकृष्यमाणा हि तिष्ठन्ति सुपथे कथम् । (कथा०)	विषयासक्त लोग सुमार्ग पर कैसे रह सकते हैं ।
विषयिणः कस्यापदोऽस्तं गताः !	किस विषयी व्यक्ति की आपत्तियाँ समाप्त हो गई हैं ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् । (कुमार०)	अपने पाले-पोसे हुए विष-वृक्ष को भी उखाड़ना उचित नहीं ।
वीरो हि स्वाम्यमर्हति । (कथा०)	वीर ही स्वामी बनने के योग्य होता है ।
वृक्षं क्षीणफलं त्यजन्ति विहगाः ।	फल-हीन वृक्ष को पक्षी छोड़ जाते हैं ।
वृथा दीपो दिवापि च ।	दिन में दीपक व्यर्थ है ।
वृथा वृष्टिः समुद्रेषु ।	समुद्रों में वर्षा व्यर्थ है ।
वृद्धस्य तरुणी विषम् ।	बूढ़े के लिए युवती विष है ।

वृद्धा न ते ये न वदन्ति धर्मम् ।	जो धर्म की बात नहीं कहते, वे वृद्ध नहीं ।
वृद्धा नारी पतिव्रता ।	वृद्ध स्त्री पतिव्रता होती है ।
वेदाज्जानन्ति पण्डिताः ।	बुद्धिमान् लोग वेद से ज्ञान पाते हैं ।
वेश्याङ्गनेव नृपनीतिरनेकरूपा ।	वेश्या के समान राजनीति भी अनेक रूप धारण करती है ।
व्याघ्रस्य चोपवासस्य पारणं पशुमारणम् ।	भेड़िए के उपवास की पारणा पशु-वध होती है ।
व्याधितस्यौषधं मित्रम् ।	औषध रोगी का मित्र है ।
व्रताभिरक्षा हि सतामलंक्रिया । (किरात०)	व्रत का पालन सज्जनों का भूषण है ।
शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि ।	शत्रु के भी गुणों का और गुरु के भी दोषों का कथन करना चाहिए ।
शरीरमाद्यं खलु धर्मसाधनम् । (कुमार०)	धर्म का प्रथम साधन शरीर ही है ।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः । (कुमार०)	दुष्ट जन उपकार से नहीं, अपकार से ही शान्त होता है ।
शास्त्राद् रूढिर्बलीयसी ।	शास्त्रों से रीति बलवती है ।
शीलं परं भूषणम् ।	शील सर्वोत्तम भूषण है ।
शीलं भूषयते कुलम् ।	शील कुल को अलंकृत करता है ।
शीलं हि विदुषां धनम् । (कथा०)	शील ही विद्वानों का धन है ।
शुभकृन्न हि सीदति । (कथा०)	शुभ कार्य करने वाला दुखी नहीं होता ।
शुभस्य शीघ्रम् ।	भला काम शीघ्र ही कर देना चाहिए ।
शुष्केन्धने वह्निरुपैति वृद्धिम् ।	सूखे ईंधन में आग तुरन्त फैल जाती है ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ।	वीर, कृतज्ञ और दृढ़ मित्र के पास रहने के लिए लक्ष्मी स्वयं जाती है ।
शूरस्य मरणं तृणम् ।	वीर के लिए मृत्यु तृणवत् है ।
शोभन्ते विद्यया विप्राः ।	ब्राह्मण विद्या से सुशोभित होते हैं ।
श्यालको गृहनाशाय ।	साला घर का नाश कर देता है ।
श्रद्धया न विना दानम् ।	श्रद्धा-रहित दान दान नहीं ।
श्रेयसि केन तृप्यते । (शिशु०)	मंगल से कौन तृप्त होता है !
श्रोत्रस्य भूषणं शास्त्रम् ।	शास्त्र कान का भूषण है ।
संसर्गजा दोषगुणा भवन्ति ।	दोष और गुण संगति से होते हैं ।
सकलं शीलेन कुर्याद्वशम् ।	शील से सब को वशीभूत करना चाहिए ।
सकलगुणभूषा च विनयः ।	नम्रता सब गुणों का भूषण है ।
सकलगुणसीमा वितरणम् ।	दान सब गुणों की सीमा है ।
सकलसुखसीमा सुवदना ।	सुमुखी सर्व सुखों की सीमा है ।
स क्षत्रियस्त्राणसहः सतां यः ।	सज्जनों की रक्षा में समर्थ व्यक्ति क्षत्रिय है ।
संकटे हि परीक्ष्यन्ते प्राज्ञाः शूराश्च संगरे । (कथा०)	बुद्धिमानों की परीक्षा संकट में और शूरों की परीक्षा संग्राम में होती है ।
सतां महासंमुखधावि पौरुषम् । (नैषध०)	सज्जनों का पौरुष बड़ों पर ही प्रकट होता है ।
सतां हि सङ्गः सकलं प्रसूते ।	सत्संगति से सब कुछ प्राप्त होता है ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः । (अभिज्ञान०)	संदिग्ध विषयों में सत्पुरुषों का अन्तःकरण ही प्रमाण होता है ।
स तु निरवधिरेकः सज्जनानां विवेकः ।	सज्जनों के विवेक की सीमा नहीं होती ।

सत्त्वाधीना हि सिद्धयः। (कथा०)	सफलताएँ उत्साह के अधीन हैं।
सत्पुत्र एव कुलसद्मनि कोऽपि दीपः।	अच्छा पुत्र ही वंश का विलक्षण दीपक है।
सत्यपूतां वदेद् वाणीम्।	सत्य से शोधित वाणी बोलनी चाहिए।
सत्यं कण्ठस्य भूषणम्।	सत्य कण्ठ का भूषण है।
सत्यं न तद् यच्छलमभ्युपैति।	वह सत्य नहीं जो छल का आश्रय लेता है।
सत्यमेव जयते।	सत्य की ही विजय होती है।
सत्येन धार्यते पृथ्वी।	पृथ्वी को सत्य ही धारण किये हुए है।
सदसद्वा न हि विदुः कुस्त्रीवचनमोहिताः। (कथा०)	बुरी नारियों के वचन से मोहित लोग अच्छाई या बुराई नहीं समझते।
सदोभूषा सूक्तिः।	सुभाषित सभा का भूषण है।
सद्भिः कुर्वीत संगतिम्।	सज्जनों का संग करना चाहिए।
सद्भिर्विवादं मैत्री च।	झगड़ा और मैत्री सज्जनों से ही करनी चाहिए।
सद्भिस्तु लीलया प्रोक्तं शिलालिखित-मक्षरम्।	सज्जनों की स्वाभाविक बात भी पत्थर की लकीर होती है।
स धार्मिको यः परमर्म न स्पृशेत्।	धार्मिक वही है जो दूसरे का जी नहीं दुखाता।
सन्तः परीक्ष्यान्यतरद्भजन्ते।	सज्जन परीक्षा के अनन्तर ही कोई बात स्वीकार करते हैं।
संततिः शुद्धवंश्या हि परत्रेह च शर्मणे। (रघु०)	शुद्ध वंश की सन्तान लोक-परलोक में सुख-दायक होती है।
संतोष एव पुरुषस्य परं निधानम्।	संतोष ही मनुष्य का सर्वोत्तम कोष है।
संतोषतुल्यं धनमस्ति नान्यत्।	संतोष के समान धन नहीं।
संधिं कृत्वा तु हन्तव्यः संप्राप्तेऽवसरे पुनः। (कथा०)	सन्धि करके भी अवसर प्राप्त होने पर शत्रु को मार देना चाहिए।
सभारत्नं विद्वान्।	विद्वान् सभा का रत्न है।
समये हि सर्वमुपकारि कृतम्। (शिशु०)	समय पर किया हुआ सब कुछ उपकारक होता है।
समानशीलव्यसनेषु सख्यम्।	मैत्री समान शील तथा व्यसन वालों में होती है।
सम्पूर्णकुम्भो न करोति शब्दम्।	भरा हुआ घड़ा शब्द नहीं करता।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते। (भगवद्गीता)	सम्मानित मनुष्य के लिए अपयश मृत्यु से भी बुरा होता है।
सरित्पतिर्न हि समुपैति रिक्तताम्। (शिशु०)	समुद्र कभी ख़ाली नहीं होता।
सरित्पूरप्रपूर्णोऽपि क्षारो न मधुरायते।	नदियों के जलसमूह से भर जाने पर भी समुद्र मीठा नहीं होता।
सर्वः कालवशेन नश्यति।	समय पाकर सब नष्ट होते हैं।
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानु-रूपं फलम्।	विपत्ति पड़ने पर भी सब लोग अपनी योग्यता-नुसार फल चाहते हैं।
सर्वः कान्तमात्मीयं पश्यति। (अभिज्ञान०)	सबको अपनी वस्तु सुन्दर दिखाई देती है।
सर्वः प्रियः खलु भवत्यनुरूपचेष्टः। (शिशु०)	अनुकूल चेष्टाओंवाले सब व्यक्ति प्यारे लगते हैं।
सर्वं कार्यवशाज्जनोऽभिरमते तत्कस्य को वल्लभः!	लोग सभी को कार्य-वश प्यारे लगते हैं; वैसे कौन किसका प्रिय है!
सर्वं जीवद्भिराप्यते (कथा०)	जीवित मनुष्य सब कुछ पा लेते हैं।

सर्वं रत्नमुपद्रवेण सहितं निर्दोषमेकं यशः।	सब रत्नों में कोई न कोई दोष होता है; निर्दोष तो केवल यश है।
सर्वं शून्यं दरिद्रस्य।	दरिद्र के लिए सब कुछ सूना है।
सर्वं सावधि नावधिः कुलभुवां प्रेम्णः परं केवलम्।	सबकी सीमा है परन्तु कुलीन नारियों के प्रेम की सीमा नहीं।
सर्वनाशाय मातुलः।	मामा सर्वनाश कर देता है।
सर्वलोकप्रतिष्ठायां यतन्ते बहवो जनाः।	बहुत से व्यक्ति लोगों में प्रतिष्ठा पाने के लिए उद्योग करते हैं।
सर्वांगे दुर्जनो विषम्।	दुष्टजन के सभी अंगों में विष रहता है।
सर्वारम्भास्तण्डुलप्रस्थमूलाः।	सभी उद्योग दुसेरी भर धान के लिए हैं।
सर्वास्ववस्थासु रमणीयत्वमाकृतिविशेषाणाम्। (अभिज्ञा०)	सुंदर व्यक्ति सभी दशाओं में सुंदर लगते हैं।
सर्वे गुणाः काञ्चनमाश्रयन्ते।	सभी गुण धन पर आश्रित रहते हैं।
सलज्जा गणिका नष्टा।	लज्जाशील वेश्या नष्ट हो जाती है।
स सुहृद्व्यसने यः स्यात्।	जो विपत्ति में सहायक है, वही मित्र है।
सहते विपत्सहस्रं मानी नैवापमानलेशमपि।	मानी मानव सहस्रों कष्ट सह लेता है परन्तु तनिक-सा भी अपमान नहीं।
सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।	कोई भी कार्य एकाएक न करना चाहिए; अविवेक भारी आपत्तियों का कारण है।
सहस्रेषु च पण्डितः।	सहस्रों में कोई एक विद्वान् होता है।
सागरं वर्जयित्वा कुत्र महानद्यवतरति! (अभिज्ञा०)	बड़ी नदी सागर के सिवा कहाँ आश्रय लेती है!
साधने हि नियमोऽन्यजनानां योगिनां तु तपसाखिलसिद्धिः। (नैषध०)	साधारण जन साधनों से कार्य सिद्ध करते हैं; योगियों को तप से सब सिद्धियाँ मिलती हैं।
साधुः सीदति दुर्जनः प्रभवति प्राप्ते कलौ दुर्युगे।	इस कलियुग नाम के बुरे युग में सज्जन दुःख पाते हैं और दुर्जन अधिकार जमाते हैं।
साधूनां दुर्जनाद् भयम्।	सज्जनों को दुर्जनों से भय होता है।
सानुकूले जगन्नाथे विप्रियः सुप्रियो भवेत्।	भगवान् अनुकूल हो तो विरोधी भी मित्र बन जाते हैं।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः। (शिशुपालवधे)	प्रकाश और अन्धकार एकत्र कैसे रह सकते हैं!
सारं गृह्णन्ति पण्डिताः।	बुद्धिमान् सारग्राही होते हैं।
सिद्धिर्भूषयते विद्याम्।	सिद्धि विद्या को अलंकृत करती है।
सुकविता यद्यस्ति राज्येन किम्।	यदि सुंदर काव्य रचना आती हो तो राज्य से क्या लाभ है।
सुकृती चानुभूयैव दुःखमप्यश्नुते सुखम्। (कथा०)	सुकर्मी मनुष्य दुःख सहकर भी सुख भोगता है।
सुखमास्ते निःस्पृहः पुरुषः।	कामनारहित मनुष्य सुखी रहता है।
सुखार्थिनः कुतो विद्या!	सुखैषी को विद्या कहाँ!
सुतप्तमपि पानीयं शमयत्येव पावकम्।	पानी भले ही खूब गर्म हो फिर भी अग्नि को शान्त कर ही देता है।

सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् । (किरात०)	संसार में सुन्दरता सुलभ है, गुण-धारण दुर्लभ।
सुलभो हि द्विषां भङ्गो, दुर्लभा सत्स्ववाच्यता । (किरात०)	शत्रु का नाश करना सरल है, सज्जनों में प्रशंसा दुर्लभ।
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् । (शिशु०)	सूर्य के अस्त हो जाने पर कमल अपनी शोभा को धारण नहीं करता।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ! (रघुवंशे)	जब सूर्य चमक रहा हो तब रात्रि लोगों की दृष्टि कैसे बंद कर सकती है !
सेवाधर्मः परमगहनो योगिनामप्यगम्यः।	सेवा-रूपी धर्म अत्यन्त कठिन है, योगी भी वहाँ तक नहीं पहुँच सकते।
स्तोत्रं कस्य न तुष्टये ! (कुमार०)	प्रशंसा से कौन प्रसन्न नहीं होता !
स्त्रियश्चरित्रं पुरुषस्य भाग्यं देवो न जानाति कुतो मनुष्यः !	स्त्री के चरित्र और पुरुष के भाग्य को भगवान् भी नहीं जानता, मनुष्य भला क्या जानेगा !
स्त्रियो नष्टा ह्यभर्तृकाः।	पति-हीन स्त्रियाँ नष्ट हो जाती हैं।
स्त्रीणां पतिः प्राणा न बान्धवाः। (कथा०)	स्त्रियों का जीवन पति है, बन्धु नहीं।
स्त्रीणां प्रियालोकफलो हि वेषः। (कुमार०)	स्त्रियाँ सौन्दर्यवर्द्धक परिधान पहनती हैं।
स्त्री पुंवच्च प्रभवति यदा तद्धि गेहं विनष्टम् ।	जब स्त्री पुरुषवत् प्रभावशाली हो जाती है तब घर नष्ट हो जाता है।
स्त्रीबुद्धिः प्रलयावहा।	स्त्री की बुद्धि प्रलयकारिणी होती है।
स्त्रीभिः कस्य न खण्डितं भुवि मनः।	भूमि पर स्त्रियों ने किस के हृदय को खण्डित नहीं किया !
स्त्री विनश्यति रूपेण।	स्त्री रूप से नष्ट होती है।
स्त्रीषु वाक्संयमः कुतः ! (कथा०)	स्त्रियों में वाणी का संयम कहाँ !
स्नापितोऽपि बहुशो नदीजलैर्गर्दभः किमु हयो भवेत् क्वचित् ।	नदी के जल से बहुत बार नहाने पर भी क्या कहीं गधा भी घोड़ा बनता है।
स्नुषात्वं पापानां फलमधनगेहेषु सुदृशाम् ।	निर्धन घरों की पुत्रवधू बनना सुन्दरियों के पापों का फल है।
स्पृशन्ति न नृशंसानां हृदयं बन्धुबुद्धयः। (नैषध०)	सम्बन्धियों की सीख क्रूर जनों के हृदय को प्रभावित नहीं करती।
स्पृशन्त्यास्तारुण्यं किमिव न हि रम्यं मृगदृशः !	यौवन में प्रविष्ट होती हुई मृगनयनी की कौनसी बात सुंदर नहीं होती।
स्वकर्मसूत्रग्रथितो हि लोकः।	संसार अपने कर्मों के सूत्र से गूँथा हुआ है।
स्वगृहे पूज्यते मूर्खः।	मूर्ख अपने घर में ही पूजा जाता है।
स्वग्रामे पूज्यते प्रभुः।	ग्रामपति अपने गाँव में ही पूजा जाता है।
स्वदेशजातस्य नरस्य नूनं गुणाधिकस्यापि भवेदवज्ञा ।	अपने देश के गुणी व्यक्ति की भी उपेक्षा की जाती है।
स्वदेशे पूज्यते राजा।	राजा की पूजा अपने ही देश में होती है।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।	अपने धर्म में मरना अच्छा है; पर-धर्म भयंकर होता है।
स्वपन्त्यज्ञा हि निश्चेष्टाः, कुतो निद्रा विवेकिनाम् !	अज्ञानी गहरी नींद में सोते हैं, विवेकियों को नींद कहाँ !

स्वपदाच्च्यवमानस्य कस्याज्ञां को हि मन्यते! (कथा०)	अपनी पदवी से च्युत हुए की आज्ञा कौन मानता है!
स्वभाव एवैष परोपकारिणाम्।	परोपकारियों का यह स्वभाव ही है।
स्वभावतः सर्वमिदं हि सिद्धम्।	यह सब स्वभाव से ही सिद्ध है।
स्वभावस्वच्छानां पतनमपि भाग्यं हि भवति।	स्वभावतः पवित्र व्यक्तियों का पतन भी भाग्यार्थ ही होता है।
स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते। (रघु०)	पवन स्वयमेव अग्नि का सारथि बन जाता है।
स्वसुखं नास्ति साध्वीनां तासां भर्तृसुखं सुखम्। (कथा०)	सतिस्त्रियों का अपना कोई सुख नहीं होता; वे पति के सुख को ही अपना सुख समझती हैं।
स्वस्थः को वा न पण्डितः!	कौन स्वस्थ मनुष्य बुद्धिमान् नहीं।
स्वस्थे चित्ते बुद्धयः संभवन्ति।	स्वस्थ चित्त में ही सुविचार उत्पन्न होते हैं।
स्वादुभिस्तु विषयैर्हृतस्ततो दुःखमिन्द्रियगणो निवार्यते। (रघु०)	स्वादिष्ट विषयों से आकर्षित इन्द्रियों को उनसे हटाना कठिन है।
स्वाधीना दयिता सुतावधि।	सन्तान से पूर्व ही स्त्री स्वाधीन होती है।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः। (अभिज्ञा०)	हंस दूध ले लेता है और उसमें मिले जल को छोड़ देता है।
हं हो पद्मसरः कुतः कतिपयैर्हंसैर्विना श्रीस्तव!	अरे कमलसर! कुछ हंसों के विना तुम्हारी शोभा कहाँ।
हतं ज्ञानं क्रियाहीनम्।	क्रिया-रहित ज्ञान व्यर्थ है।
हतं निर्नायकं सैन्यम्।	सेनानी के विना सेना निकम्मी है।
हतश्चाज्ञानतो नरः।	मनुष्य अज्ञान से मारा जाता है।
हरति मनो मधुरा हि यौवनश्रीः। (किरात०)	यौवन की मधुर शोभा मन को हर लेती है।
हस्तस्य भूषणं दानम्।	दान हाथ का गहना है।
हितः परोऽपि स्वीकार्यो हेयः स्वोऽप्यहितः पुनः। (कथा०)	हितकारक बेगाना भी स्वीकार्य है और अहित-कारक अपना भी त्याज्य।
हितप्रयोजनं मित्रम्।	मित्र भलाई के लिए ही होता है।
हितभुक्, मितभुक्, शाकभुक्।	हितकर वस्तु खानेवाला, थोड़ा खानेवाला, साग-सब्ज़ी खानेवाला (स्वस्थ रहता है)।
हितं मनोहारि च दुर्लभं वचः। (किरात०)	हितकर तथा मनोहर वचन दुर्लभ हैं।
हितोपदेशो मूर्खस्य कोपायैव न शान्तये। (कथा०)	हितकारक उपदेश मूर्ख को कुपित करता है, शान्त नहीं।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा। (रघुवंशे)	सुवर्ण की खराई खोटाई अग्नि में ही परखी जाती है।
अर्थो हि लोके पुरुषस्य बन्धुः।	संसार में धन ही मनुष्य का बन्धु है।

द्वितीय परिशिष्ट
हिन्दी सूक्तियों के संस्कृत पर्याय

हिन्दी	संस्कृत
अंगूर खट्टे हैं।	१. अलभ्यं हीनमुच्यते। २. दुष्प्रापा द्राक्षा अम्लाः।
अंडा सिखावे वच्चे को तू चीं-चीं मत कर।	१. वालः शिक्षयति वृद्धान्। २. वृद्धानां मन्त्रदो वालः।
अंडे सेवे कोई वच्चे लेवे कोई।	पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये।
अंडे होंगे तो वच्चे वहुतेरे हो जायँगे।	स्थिरे मूले ध्रुवा वृद्धिः।
अन्तःकरण के अनुसार आचरण करे।	मनःपूतं समाचरेत्। (मनु.)
अँतड़ी में रूप बुकची में छब्ब।	१. रूपमन्ने छविर्वसने। २. निराहारे कुतो रूपं निर्वसने च कुतश्छविः।
अंत बुरे का बुरा।	१. दुरितस्य दुःखम्। २. दुष्टस्य कष्टम्।
अंत भले का भला।	१. भद्रस्य भद्रम्। २. शुभस्य शुभम्।
अंत मता सो गता।	अन्ते मतिः सा गतिः।
अंदर से काले वाहर से गोरे।	१. विषकुम्भाः पयोमुखाः। २. अंतःशाक्ता वहिःशैवाः।
अंधा क्या चाहे? दो आँखें।	इष्टलाभः परं सुखम्।
अंधा क्या जाने वसंत की वहार?	१. गुणान्वसन्तस्य न वेत्ति वायसः। २. लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति? ३. न भेकः कोकनदिनीकिञ्जल्कास्वादकोविदः। (कथासरित्सागर)
अंधा गुरु वहरा चेला, दोनों नरक में ठेलमठेला।	अन्धस्यान्धानुलग्नस्य विनिपातः पदे पदे।
अंधा बाँटे रेवड़ियाँ फिर फिर अपनों ही को।	विवेकरहितः खलु पक्षपाती।
अंधी पीसे कुत्ता खाय।	पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये। (पंचतंत्र)
अंधे के आगे रोवे अपने दीदे खोवे।	१. अरण्यरोदनं व्यर्थं भस्मनि हुतमेव च। २. अरण्यरुदितमिव निष्प्रयोजनम्।
अंधे के हाथ वटेर लगना।	अन्धस्य वर्तकीलाभः।
अंधे को अंधा कहने से बुरा मानता है।	न ब्रूयात्सत्यमप्रियम्।
अंधे को अँधेरे में बड़े दूर की सूझी।	वालिशस्य मतिस्फूर्तिः।
अंधे को सब अंधे ही दीखते हैं।	१. पित्तेन दूने रसने सिताऽपि तिक्तायते। २. पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्।
अंधेर नगरी चौपट राजा। टके सेर भाजी टके सेर खाजा॥	नृपे मूढे नयः कुतः?
अंधों ने गाँव लूटा दौड़ियो रे लँगड़े।	१. अयं वन्ध्यासुतो याति खपुष्पकृतशेखरः। २. अन्धैर्लुण्ठितो ग्रामः पंगो रे धाव सत्वरम्।

अंधों में काना राजा।

१. निरस्तपादपे देशे एरण्डोऽपि द्रुमायते।
२. यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।

अकेला चना भाड़ नहीं फोड़ सकता।

उत्पतितोऽपि चणकः शक्तः किं भ्राष्ट्रकं भङ्क्तुम्?

अक्ल बड़ी कि भैंस?

१. बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्। (पंचतंत्र)
२. मतिरेव बलाद् गरीयसी।
३. प्रज्ञा नाम बलं श्रेष्ठं निष्प्रज्ञस्य बलेन किम्?

अक्लमंद को इशारा, अहमक को फटकारा।

विज्ञाय संज्ञा, मूढाय दण्डः।

अक्लमंद को इशारा ही काफ़ी है।

१. अनुक्तमप्यूहति पण्डितो जनः।
२. परेङ्गितज्ञानफला हि बुद्धयः।

अच्छी बात बच्चे की भी मान लेनी चाहिए।

युक्तियुक्तं प्रगृह्णीयाद् बालादपि विचक्षणः।

अच्छी वस्तु स्वयमेव प्रसिद्ध हो जाती है।

न हि कस्तूरिकामोदः शपथेन विभाव्यते।

अच्छी संतान सुख की खान।

१. संततिः शुद्धवंश्या हि परत्रेह च शर्मणे। (रघुवंश)
२. सुखमूलं सुसन्ततिः।

अटका बनिया देय उधार।

परवशैः किन्न क्रियते?

अटकेगा सो भटकेगा।

संशयात्मा विनश्यति।

अढ़ाई पाव कंगनी चौबारे रसोई।

निस्सारस्य पदार्थस्य प्रायेणाडम्बरो महान्।

अति का भला न बोलना, अति की भली न चुप्प। अति का भला न बरसना, अति की भली न धुप्प।

अति सर्वत्र वर्जयेत्।

अदले का बदला।

१. कृते प्रतिकृतिं कुर्यात्।
२. भद्रो भद्रे खलः खले।
३. शठे शाठ्यं समाचरेत्।

अधजल गगरी छलकत जाय।

अर्द्धो घटो घोषमुपैति नूनम्।

अधिकार बड़ा है न कि बल।

स्थानं प्रधानं न बलं प्रधानम्। (पंचतंत्र)

अधेला न दे, अधेली दे।

१. अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्। (रघुवंश)
२. पणमदत्त्वा निष्कं प्रयच्छति।

अनहोनी होती नहीं होनी होवनहार।

न यद् भावि न तद् भावि भावि चेन्न तदन्यथा। (हितोपदेश)

अपना अपना ग़ैर ग़ैर।

निजो निज एव परः परश्च।

अपना टेंटर न देखे दूसरों की फुल्ली निहारे।

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥ (महाभारत)

अपना पेट तो कुत्ता भी भर लेता है।

१. जठरं को न बिभर्ति केवलम्?
२. काकोऽपि जीवति चिराय बलिञ्च भुङ्क्ते।

अपना पैसा खोटा तो परखैया का क्या दोष?

१. आत्मीयाः सदोषाश्चेत् को लाभः परदूषणैः?
२. समले सुवर्णे निकषो न निन्द्यः।

अपना वही जो आए काम।

१. स एव बन्धुः सहायको यः।
२. परोऽपि हितकरः स्वीयः।

अपना हाथ जगन्नाथ।

स्वातन्त्र्यमिष्टप्रदम्।

अपनी अपनी डफली अपना अपना राग।	स्वार्थसिद्धौ हि ये मग्नास्तेषां साम्मत्यं कुतः ?
अपनी इज़्ज़त अपने हाथ।	१. लोके गुरुत्वं विपरीततां वा स्वचेष्टितान्येव नरं नयन्ति। २. निजाधीनं स्वगौरवम्।
अपनी करनी पार उतरनी।	कृत्यैः स्वकीयैः खलु सिद्धिलब्धिः।
अपनी ग़रज़ बावली होती है।	१. अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते। (पंचतंत्र) २. किन्न कुर्वन्ति स्वार्थिनः ?
अपनी गली में कुत्ता भी शेर होता है।	निजसदननिविष्टः श्वा न सिंहायते किम् ?
अपनी छाछ को कोई खट्टी नहीं कहता।	१. सर्वः खल्वात्मीयं कान्तं पश्यति। २. न हि कश्चिन्निजं तक्रमम्लमित्यभिभाषते।
अपनी देह किसे प्यारी नहीं !	(अशेषदोषदुष्टोऽपि) कायः कस्य न वल्लभः ? (पंचतंत्र)
अपनी नाक कटे तो कटे दूसरों का सगुन तो बिगड़े।	आत्मक्षत्याऽपि विघ्नन्ति परकर्माणि दुर्जनाः।
अपनी पगड़ी अपने हाथ।	दे. 'अपनी इज़्ज़त अपने हाथ'।
अपनी बुद्धि पराया धन कई गुना दीखता है।	स्वमतिः परधनञ्चैव वृद्धवृद्धं हि दृश्यते।
अपने गरीबान में मुँह डाल कर देखना।	विरूपो यावदादर्शे पश्यति नात्मनो मुखम्। मन्यते तावदात्मानमन्येभ्यो रूपवत्तरम्। (महाभारत)
अपने दही को कोई खट्टा नहीं कहता।	दे. 'अपनी छाछ को…'
अपने पाँव पर आप कुल्हाड़ा मारना।	१. सहनं दुःखं स्वदोषेण। २. स्वकरेणांगारकर्षणम्।
अपने मुँह मियाँ मिट्ठू।	इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः।
अपयश से मौत भली।	सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते। (गीता)
अब पछताए होत क्या जब चिड़ियाँ चुग गईं खेत।	१. निर्वाणदीपे किमु तैलदानम्। २. गतस्य शोचनं नास्ति। ३. गतं शोचन्त्यपण्डिताः। ४. गते शोको निरर्थकः।
अभी दिल्ली दूर है।	अद्यापि दूरतः सिद्धिः।
अमीर को जान प्यारी, ग़रीब को जान भारी।	धनाढ्यो रक्षति प्राणान् निर्धनस्त्यक्तुमिच्छति।
अरहर की टट्टी गुजराती ताला।	पाषाणे मृगमदलेपः।
अलखामोशी नीमरज़ा।	मौनं स्वीकारलक्षणम्।
अल्पाहारी सदा सुखी।	अल्पाहारी सदासुखी।
अशरफ़ियाँ लुटीं, कोयलों पर मुहर।	१. निष्कापव्ययः, पणरक्षणम्। २. चन्दनदाहः, शमीरक्षा।
अस्सी की आमद चौरासी का खर्च।	१. अल्प आयो व्ययो महान्। २. न्यूनायेऽधिकव्ययः।
आँख और कान में चार उंगल का फ़र्क़ होता है।	श्रवणे दर्शने चैव वर्तते महदन्तरम्।
आँख न दीदा काढ़े कसीदा।	अन्धो वीक्षितुमुद्यतः।
आँख से दूर दिल से दूर।	१. दूरता स्नेहनाशिनी। २. नयनदूरं मनोदूरम्।

आँखों के अंधे नाम नयन-सुख।	१. यस्य पार्श्वे धनन्नास्ति सोऽपि धनपाल उच्यते। २. वित्तेन हीनो नाम्ना नरेशः। ३. ज्ञानेन हीनोऽपि सुबोधसंज्ञः। ४. गुणैर्विरहितोऽपि गुणाकराख्यः।
आँधी के आम।	अल्पार्घद्रव्यम्।
आई को कौन टारे?	१. अपि धन्वन्तरिर्वैद्यः किं करोति गतायुषि? २. मृत्योर्नास्ति भेषजम्।
आई तो ईद-बरात न आई तो जुम्मेरात।	सघृतं भोजनं वित्ते, दारिद्र्ये शुष्कमेव च।
आई थी आग लेने मालिक बन बैठी।	१. सूचीप्रवेशे मुसलप्रवेशः। २. अनलार्थं समायाता सञ्जाता गृहस्वामिनी।
आई है जान के साथ जायगी जनाज़े के साथ।	जीवनसंगिनी रुजा।
आए की खुशी न गए का ग़म।	१. सन्तुष्टः सदासुखी। २. लाभालाभयोः समः।
आग पानी का मेल कैसे हो सकता है?	१. सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः? २. जलानलयोः सङ्गमः कुतः?
आग लगने पर कूआँ नहीं खोदा जाता।	१. सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः? (नीतिशतक) २. न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे।
आग लगा पानी को दौड़े।	१. अन्तर्दुष्टः क्षमायुक्तः सर्वानर्थकरः किल। २. विषकुम्भः पयोमुखः।
आगे कूआँ पीछे खाई।	इतः कूपस्ततस्तटी।
आगे जगह देखकर पाँव रखा जाता है।	१. दृष्टिपूतं न्यसेत्पादम्। (मनु०) २. नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्।
आगे दौड़ पीछे चौड़।	पूर्वाधीतं तु विस्मृत्य अग्रस्थं प्रत्युत्सुकः।
आगे नाथ न पीछे पगहा, सब से भला कुम्हार का गदहा।	का चिन्ता बन्धुहीनस्य?
आज का काम कल पर मत छोड़ो।	यदद्य कार्यं न श्वः कुर्यात्।
आदत सिर के साथ जाती है।	अभ्यासो हि दुस्त्यजः।
आद बुरा अंत बुरा।	१. दुरारम्भो दुरन्तः स्यात्। २. दुर्बीजात्सुफलं कुतः?
आधा तीतर आधा बटेर।	विषमयोगो न युज्यते।
आधी छोड़ सारी को धावे। ऐसा डूबे थाह न पावे॥	यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते। ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव तु॥
आप मरे जग परलै।	१. आत्मप्रलये जगत्प्रलयः। २. आत्मनाशे जगन्नाशः।
आप मरे बिना स्वर्ग नहीं मिलता।	१. नात्मयत्नं विना सिद्धिः। २. यावन्न निधनं तावन्न स्वर्गः।
आप हारे बहू को मारे।	निजापराधे भृत्यस्य भर्त्सनम्।
आ बला, गले लग।	विपत्ते! परिष्वजस्व माम्।
आमों की कमाई नींबू में गँवाइ।	इतो लाभस्ततः क्षतिः।

आम के आम गुठलियों के दाम।	एका क्रिया द्व्यर्थकरी प्रसिद्धा।
आम बोओ आम खाओ।	यादृशमुप्यते बीजं तादृशं फलमाप्यते।
आयगा सो जायगा राजा रंक फ़क़ीर।	जातस्य हि ध्रुवो मृत्युः।
आरत काह न करइ कुकर्मू।	आर्त्तो जनः किन्न करोति पापम्।
आलस्य बुरी बला है।	१. अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति। २. आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।
आलिम वह क्या अमल न हो जिसका किताब पर।	यः क्रियावान् स पण्डितः।
आस-पास बरसे दिल्ली पड़ी तरसे।	सस्पृहा निर्धना दृष्टा निस्पृहाणां धनं बहु।
आस्मान पर थूका अपने सिर।	पङ्को हि नभसि क्षिप्तः क्षेप्तुः पतति मूर्धनि।
